[...]ES S[...] ॥श्रीः
[...]विरचिता ।
[...]CTION OF [...]
[...]योगदीपिका
EDIT[...]
OF THE BENARES [...]
UNDER THE SUPERIN[...]
R. T. H. GRIFFITH, M. A.
AND
G. THIBAUT, Ph. D.
No. 132.

श्रीविद्वद्वरमंचनाचार्यभट्टविरचिता

आश्वलायनसूत्रप्रयोगदीपिका ।

काव्यतीर्थ-न्यायोपाध्यायपदवीमता

श्रीसोमनाथोपाध्यायेन संशोधिता ।

PRAYOGADÎPIKÂ

of the Âswalâyana Srauta Sûtra,

BY PANDIT MANCHANÂ CHÂRYA BHATTA.

EDITED BY

SOMANÂTHOPÂDHYÂYA-NYÂYOPÂDHYÂYA AND KÂVYATÎRTHA.

Fasciculus I.

BENARES:

Published by the Proprietors Messrs. Braj B. Das & Co.

AND SOLD BY H. D. GUPTA,

Secretary, Chowkhamba Sanskrit Book Depot.

Printed at the Vidyâ Vilâs Press,

BENARES.

1907.

...म् ।

	रु०	आ०	पा०
	०	४	०
	२	८	०
	०	१	०
	०	४	०
	०	१२	०
	०	१	०
	०	१	०
	०	८	०
...हः	०	१	६
...ुपाठः (शिला -))	०	२	०
धातुरूपावली	०	२	०
परिभाषापाठः	०	०	६
पाणिनीयशिक्षा भाष्यसहिता	०	२	०
प्रथम परीक्षा	०	२	०
प्रथमपुस्तक हिन्दी	०	१	०
प्रश्नभूषणम् (प्रश्न विचार का बहुत उत्तम ग्रन्थ)	०	४	०
बीजगणितम् (म० म० पं० सुधाकरकृतटिप्पणीसहित)	१	८	०
मनोरमा शब्दरत्नसहिता (टाइप)	७	०	०
लघुकौमुदी टिप्पणीसहिता	०	४	०
लघुकौमुदीभाषाटीका (पं० मथुराप्रसादमिश्र कृत) (टिप्पणीसहित)	४	०	०
लक्षणावली	०	२	०
लीलावती (म० म० पं० सुधाकरकृतटिप्पणीसहित)	१	०	०
वसिष्ठसिद्धान्तः	०	१	६
विष्णु सहस्रनाम	०	१	०
शब्दरूपावली	०	१	०
शृङ्गार सप्तशती	१	८	०
समासचक्रम्	०	१	०
समासचन्द्रिका	०	१	०
सरस्वतीकण्ठाभरणम्	३	०	०
साङ्ख्यचन्द्रिका टिप्पणीसहिता	०	८	०
सिद्धान्तकौमुदी	३	०	०
सिद्धान्तमुक्तावली दिनकरीटिप्पणीसहिता	३	०	०
उपसर्गवृत्ति	०	१	०
क्षेत्रकौमुदी	०	६	०
क्षेत्रसंहिता	२	०	०

ॐश्रीः

श्रीमञ्चनार्यभट्टविरचिता ।

आश्वलायनसूत्रप्रयोगदीपिका

प्रारभ्यते ।

य एको विविधैर्यज्ञो गीयते विविधाभिधः ॥
तस्मै नमः क्रतुभुजो विष्णवे प्रभविष्णवे ॥ १ ॥
आश्वलायनसूत्रोक्तप्रयोगस्य प्रदीपिका ॥
क्रियते मंचनार्येण वृत्तिकारानुसारतः ॥ २ ॥

अथैतस्य समाम्नायस्य विताने योगापत्तिं वक्ष्यामः ॥ तत्र प्रथममग्न्याधेयस्यैव प्रयोगो वक्तव्यः, इष्टिरूपत्वात् इष्टेश्च विध्यन्तापेक्षितत्वादैष्टिकविध्यन्तस्य च दर्शपूर्णमासयोराम्नातत्वात्तद्व्याख्यानमन्तरेणाधानासंभवादिति दर्शपूर्णमासावेव प्रथमं दर्शयति ॥ अथ दर्शपूर्णमासयोः कर्मणोर्हविःषु वर्हिष्वासादितेषु होता आहूतः प्रागुदगाहवनीयादवस्थाय प्राङ्मुखो भूत्वा प्रयोगाङ्गं यज्ञोपवीतं धृत्वा ततो निष्क्रम्योपविश्य प्राङ्मुखः प्रयोगाङ्गं स्मृतिविधानेनाचमनं कृत्वा दक्षिणेनांसेनाऽऽवृत्य यत्राग्नयो विहृतास्तं देशं प्रविशति ॥ अध्वर्यो देवता आचक्ष्व । तासामानुपूर्व्यमुच्चैरुपांशुता च यजमानप्रवरनक्षत्रनामधेयानि अध्वर्युं पृष्ट्वा अध्वर्युतो देवतादीनवगम्य प्रणीतोत्करावन्तरेण ॥

अथ प्रासङ्गिकमुच्यते । अप्रणीते कर्माणि इध्ममपरेणोत्करं पूर्वेण प्रपद्यते ॥ चात्वलवत्सु कर्मसु चात्वालमपरेणोत्करं पूर्वेण

प्रपद्यते । एतदन्तरालं तीर्थमिति वदन्त्याचार्याः । एतेन यो यो विहारं प्रपद्यते होता वान्यो वा तस्य या विहिताश्चेष्टास्ता नियमेन प्राप्नो भवन्ति तस्याङ्कधारणा च नित्या भवति । तस्य यज्ञोपवीतशौचे नित्ये भवतः । तस्य विहारदेशादन्यावृत्तिश्च भवति । तत्र चेत्कर्म वर्त्तते । यत्रैकजातीयाङ्गवचनं भवति । यथा प्रपदेन बर्हिराक्रम्येति । तथा चाङ्गुल्यग्राण्यवकृष्येति । तत्र दक्षिणमङ्गं जानीयात् । अनादेशे च । एतदुक्तं भवति । यत्राङ्गस्यादेशो नास्ति कर्म चोद्यते । यथैन्द्रवायवमुत्तरेर्द्धे गृहीत्वेति । तत्रापि दक्षिणाङ्गमेव जानीयात् । कर्त्रनादेशे होतारं कर्तारं प्रतीयात् । तत्र संशयः । किमेषा परिभाषा होतारं प्रापयति, उत नियमयतीति । तत्राद्यपक्षे अरण्याहरणपिण्डपितृयज्ञसमारम्भणादिषु होतुः कर्तृत्वं प्राप्नोति । तन्नेष्यते । अतो अनेककर्तृप्रसङ्गे कर्तृविशेषमनादिष्टं तत्र होतारं प्रतीयादिति नियामकमेतत्सूत्रं ग्राह्यम् । कर्त्रनादेशे ददातीति कर्मचोदनायां यजमानं कर्तारं प्रतीयात् ॥ तत्र संशयः । किं ददातिशब्दो विवक्षितस्तदर्थो वेति । तत्र ददातिशब्दविवक्षापक्षे चतुःशरावमोदनं ब्राह्मणान्भोजयेदित्यादौ यजमानस्य कर्तृत्वं न प्राप्नोति । इष्यते च ॥ तस्माद् द्रव्योद्देशेन स्वसत्तानिवृत्तिपदार्थचोदनायां यजमानं प्रतीयादिति सूत्रार्थः । कर्त्रनादेशे प्रायश्चित्तेधिकृते जुहोति जपतीति कर्मचोदनायां ब्रह्माणं कर्तारं प्रतीयात् । पादे गृहीते ऋचं प्रतीयात् सूक्तादौ हीने पादे गृहीते सूक्तं प्रतीयात् । सूक्तादावसूक्तादावप्यधिके पादे गृहीते तृचं प्रतीयात् । जपः अनुमन्त्रणमाप्यायनमुपस्थानमेतान्युपांशु भवन्ति । बहुविषयाद्विधेरल्पविषयो विधिर्बलीयान्भवति । इति प्रासङ्गिकम् । अग्रेणाहृततरेण पादेन गत्वा उत्तरे वेदिश्रोण्याः पादं समं निधाय प्रपदेन बर्हिराक्रम्य विरलाङ्गुलिकौ पाणी धारयन्

हृदयसंमितावङ्कसंमितौ वा कृत्वा द्यावापृथिव्याः सन्धिमीक्षमाणः स्थित्वा "अग्नयेसमिध्यमानायानुब्रूही"ति श्रुत्वा "नमः प्रवक्त्र" इत्यादिकं मन्त्रं "तदद्यवाच" इत्येतामृचं जपति । जपानुमन्त्रणाप्यायनोपस्थानकर्मकरणमन्त्राः सर्वाश्चोपांशु प्रयोक्तव्याः । करणवदशब्दममनःप्रयोग उपांशु इत्युक्तत्वात् । " नमः प्रवक्त्र " इत्यादयश्च जपादयो वेदितव्याः । अनेन मन्त्रेणेदं कुर्यादित्येवं विधीयमानाः करणाः । प्रपद्येहमेवमामित्यवसाय स्वं नामादिशेत् । शिवशर्माणमित्यादि । भूतेभविष्यतीत्यादिवाचो अशान्ति वहेति । अङ्गुल्यग्राण्यवकृष्य "जातवेदो रमया पशून्मयी"ति प्रतिसन्दध्यात् । " वर्मम " इत्यादि "तदद्यवाच" इत्यृचं समाप्य अभिहिंकृत्य सामिधेनीरन्वाह । हिमित्युच्चैः स्वरेण हिंकृत्य "भूर्भुवस्वरो" मिति जपति । अस्याभिहिंकार इति संज्ञा । कौत्सस्तु भूर्भुवस्वरित्येवाह । अभिहिंकारपूर्वजपं न जपति ॥

अथ सामिधेन्यः ॥ "प्रवोवाजाअभिद्यव " इत्येका, " अग्नआयाहिवीतय " इति तिस्रः " ईनेन्योनमस्य " इति तिस्रः " अग्निंदूतंवृणीमह इत्येका, " समिध्यमानोअध्वर " इत्येका, " समिद्धोअग्नआहुत " ति द्वे इत्येकादश । आद्योत्तमयोस्त्रिरभ्यासात्पञ्चदश भवन्ति । आद्योत्तमे अध्यर्धकारं ब्रूयात् । तद्यथा । " प्रवोवाजाअभिद्यवो हविष्मतो घृताच्यादेवां जिगाति सुम्नयो३ प्रवोवाजाअभिद्यवो घृताच्या देवान् जिगातिसुम्नयो३ प्रवोवाजाअभिद्यवो हविष्मन्तोघृताच्या देवाञ्जिगाति सुम्नयो३ मग्न आयाहिवीतयेगृणानोहव्यदातये निहोतासत्सिबर्हिषि " इत्यादि । एवमुत्तमायाम् । एता ऋचः एकश्रुतिसन्ततमनुब्रूयात् । उदात्तानुदात्तस्वरितानां परः सन्निकर्ष ऐकश्रुत्यं स्वरादिमृगन्तमोङ्कारं त्रिमात्रं मकारान्तं कृत्वोत्तरस्या अर्द्धर्चेऽवस्येत्तत्सन्ततं तस्यान्ताप-

त्तिस्पर्शेषु स्ववर्ग्यमुत्तममन्तस्थासु तां तामनुनासिकां रेफोष्मस्वनुस्वाराम् । एवं शस्त्रादिषु ब्रूयात् । अध्वर्यधकारवर्जम् । सामिधेनीनामुत्तमेन प्रणवेनाग्नेमहां असीतिनिगदशेषमुपसन्तत्य ब्राह्मणभारतेतिनिगदेवसाय यजमानस्यार्षेयान्प्रवृणीते । आङ्गिरसबार्हस्पत्यभारद्वाजोतिदेवेद्धोमन्विद्ध इति निगदशेषं ब्रूयात् । हव्यवानित्यवसानम् । आवहदेवान्यजमानायेति अवसाय । देवता आवाहयति । द्वितीयया विभक्त्या देवतानामादिश्य आकारं प्लुतं कुर्वन्नावहेत्यावाहयति । प्रथमदेवताया अग्न आवहेति विशेषः । अथ देवताक्रम उच्यते । अग्निः सोमश्चाज्यभागदेवते । उभयत्र । अग्निमग्नीषोमौ प्रधानदेवते । अनयोर्मध्ये प्रजापतिर्वा विष्णुर्वा उपांशुयागः कर्त्तव्यः । इन्द्रो वैमृधोप्यनुनिर्वाप्यः इति पौर्णमास्यामसन्ततस्त्वग्नीषोमीयं तानि अमावास्यायां तु अग्निमिन्द्राग्नी प्रधानदेवते असन्नयतः । संनयतस्त्विन्द्राग्न्योः स्थाने इन्द्रमहेन्द्रयोरन्यतरः । एवं प्रधानदेवता आवाह्य " देवां आज्यपां आवहे " ति प्रयाजानुयाजदेवताऽऽवाहनम् । " अग्निहोत्रायावहसंमहिमहिमानमावहे " ति स्विष्टकृदावाहनम् । " आवहजातवेदः सुयजायजे " ति निगदशेषमुक्त्वा तत्रैवोर्ध्वजानुरुपविशेत् । उदग्वेदे व्यूह्य तृणानि भूमौ प्रादेशं कुर्यात् " अदितिर्माते " ति मन्त्रेण । "आश्रावयज्ञ" मिति मन्त्रेणाश्रावयिष्यन्नध्वर्युमनुमन्त्रयेत् । "देवसवित " रितिमन्त्रेण प्रवृणानमध्वर्युमनुमन्त्रयेत् । मानुष इत्यध्वर्योः श्रुत्वोदायुषे पर्युत्तिष्ठेत् । उत्थाय "षष्ठिश्चाध्वर्य " इति मन्त्रमुक्त्वा " ऋतस्यपंथा " मित्यभिक्रम्य " इन्द्रमन्वारभामह " इति पार्श्वस्थपाणिभ्यामध्वर्युमाग्नीध्रं चांसयोरभिमृश्य "संमार्गोसी " तिमन्त्रेण संमार्गस्तृणैस्त्रिरभ्यात्मं मुखं संमृजीत । सकृन्मन्त्रेण द्विस्तूष्णीं स्पृष्ट्वोदकं होतृषदनस्य पश्चादवस्थाय ।

"अहेदैधिषव्ये" तिहोतृषदनमभिमन्त्र्य । अङ्गुष्ठोपकनिष्ठिकाभ्यां होतृषदनात्तृणं गृहीत्वा प्रत्यग्दाक्षिणायान्दिशि निरस्येत् । "निरस्तः परवसु" रिति । स्पृष्ट्वोदकम् "इदमहमर्वावसोः सदने सीदामी"ति दक्षिणोत्तरिणोपस्थेन वामोरूपरि दक्षिणे पादे संस्थापिते सति उपस्थो भवति एतादृशेनोपस्थेनोपविश्य "देवंबर्हि" रिति जपति। "अभिहिषहोतरि"ति जानुशिरसा बर्हिरुपस्पृश्य "भूपतय" इत्यादिकं मन्त्रशेषं जपेत् । अथ प्रदीप्त इध्मे "अग्निर्होते"त्यनेन निगदेन स्रुचावदापयेत् । "योअग्नि"मित्यवसाय "होतारमन्नथा" इति जपित्वा"घृतवतीमध्वर्यो" इतिशेषं ब्रूयात् । अथ पंचप्रयाजा भवन्ति। सर्वत्रानूयाजवर्जितानां याज्यानामागूर्भवाति । अंते वषट्कारोनुयाजसहितानाम् । येयजावह इति आगूः । वौषडितिवषट्कारः । तयोरादिस्वरयोर्याज्यान्ते प्लुतिः कार्या । याज्यांते वर्तमानानां सन्ध्यक्ष्यराणामकारं विविच्य प्लावयेत् । प्रगृह्याणि चेत्स्वरूपेणैव प्लुतिः ॥ आगूर्वषट्कारौ याज्यायाः सन्ततौ वक्तव्यौ। याज्याया उच्चैस्तरां वषट्कारः कर्त्तव्यः व्यञ्जनांतो वा । न चेद्याज्यांतः। यथा ज्येष्ठश्चमंत्रोविस्त्रर्पणा ३ इवौ०। एकारस्योदाहरणम् । इन्दुंसमह्यन्पतियेसमस्मा ३ वौ० । ओकारस्योदाहरणम्। कविमिपक्षसिप्रयज्या ३ उवौ० । ओकारस्य । सहस्रस्तुविभृथः सहद्वा ३ उवौ० । विसर्जनायोऽवर्णवर्जस्वरोपधो रेफमापद्यते । यथा प्रनोनव्येभिस्तिरतंदे ष्टयै ३ वौ० । अवर्णोपधोपि विसर्जनीयो रिफ्यते यदि स रेफप्रकृतिको भवेत् । यथा सरस्वतितमिहधातवेका ३ वौं० । यदि अवर्णोपध एव रेफप्रकृतिको विसर्जनीयो न चेत्तथासति लुप्यते। यथा युक्तग्रावाजायतेदेवकामा ३ इवौ० । ति वर्गप्रथमस्तु स्ववर्गतृतीयमापद्यते । यथा सवेदयज्ञमानुषा-

३ ग्वै॰ । मकाराकारे याज्यांते यात्प्रयुक्तं अन्तस्थामनुनासिकामापद्यते इति । यथा जिव्हामग्नेचकृषेहव्यवाहां ३ वौ इति । ये ३ यजामहे समिधोअग्नआज्यस्यवेतू ३ वौषट् । एवं सर्वत्र द्रष्टव्यम् । " वागोज " इति सर्वत्र वषट्कारमनुमन्त्रणम् । वसिष्ठशुनकात्रिवध्र्यश्वराजन्यव्यतिरिक्तानां " तनूनपादग्नआज्यस्य व्येत्वि " ति द्वितीयं । वसिष्ठानां तु " नराशंसोअग्नआज्यस्य वेत्विति " द्वितीयः । " इडोअग्नआज्यस्यव्यंन्त्वि " ति तृतीयः । " बर्हिरग्नआज्यस्यवेत्वि " ति चतुर्थः । आगूर्य "स्वाहाग्निंस्वाहा सोमंस्वाहाग्निंस्वाहा प्रजापतिंस्वाहा विष्णुस्वाहा उपांशुस्वाहा अग्नीषोमौस्वाहेन्द्रवैमृधंस्वाहा देवाआज्यपाजुषाणा " इत्यादिपौर्णमास्यामावास्यां सर्वत्रोपांशुसम्बन्धीनि " अवहस्वाहायाद्प्रियाधामानीदंहविर्महोज्याय " इत्येतेषां पदानां तन्त्रस्वर एव । तन्त्रस्वराण्युपांशोरुच्चानीति वचनात् । " स्वाहाग्निंस्वाहा सोमस्वाहाग्निंस्वाहा प्रजापति विष्णुवाडुपांशुस्वाहेद्राग्नीस्वाहा देवा " इत्याद्यसंन्नयतः अमावास्यायाम् । सन्नयतस्तु इन्द्रमहेन्द्रयोरन्यतरः । एव मन्यत्रापि पञ्चमे प्रयाजे । आवाहनक्रमेण स्वाहाकारयुक्तां देवतां द्वितीयया विभक्त्यानुद्रुत्य यजेत् । सामिधेनीभृतिपंचमप्रयाजपर्यन्तं मध्यस्वरेण । आज्यभागौ प्रधानस्वरेण । प्रधानहवींषि मध्यमस्वरेण । स्विष्टकृन्मध्यमेनोत्तमेन वा । इडादिशंयुवाकान्तमुत्तमेन । शंयुवाकादूर्ध्वमासमाप्तेर्मन्द्रस्वरेण । एवं तन्त्रस्वरः ॥ अथाज्यभागौ । "अग्निर्वृत्राणिजंघनत्वंसोममासिसत्पति" रित्यनुवाक्ये । पौर्णमास्यां वार्त्रघ्नौ । "अग्निः प्रत्नेनमन्मनासोमगीर्भिष्ट्वावय" मिति वृधन्वन्तावमावास्यायाम् । "जुषाणोअग्निराज्यस्यवेत्वि" तियाज्याग्नेः । "जुषाणः सोमआज्यस्यहविषोवेत्वि" ति सोमस्य । आगूर्य द्वितीयया विभक्त्या देवतामादिश्य या-

ज्यां संधाय यजतः। यथा "ये ३ हेग्निं जुषाणोआग्निराज्यस्यवेतूवौ-षट्ये ३ ऽयजामहे सोमंजुषाणः सोमआज्यस्यहविषोवेतू वौ" ० इति। एवं सर्वत्रयाज्यासु द्रष्टव्यम्। अनुवाक्याराहितानां समैषाणामन्वा-याज्यानामेतस्मिन्नेवासने वैश्वानरीयस्य यजतीति या वैश्वानरीये-ष्टिः पत्नीसंयाजैश्चरित्वावभृथं व्रजंतीत्यत्र ये पत्नीसंयाजाः एत-न्मध्यवर्त्तिसौमिकीनां चादेशो न कर्तव्यः। आदेशप्रभृत्येतदन्तं वाग्यमनम्। इत ऊर्ध्वमपि याज्यानुवाक्ये अंतरा च प्रमादाद्वा-ग्यमनभङ्गे "इदंविष्णु" रित्यृचं "अतोदेवा" इति वा जपेत्॥

अथ प्रधानयागः। "अग्निर्मूर्द्धा, भुवोयज्ञस्ये" त्यग्नेर्याज्या-नुवाक्ये। "प्रजापतेनत्वदेतान्यन्यस्तवेमेलोकाः प्रदिशोदिशश्चे"-ति प्रजापतेः। विष्णुश्चेत् "इदंविष्णुर्विचक्रमेत्रिदेवः पृथिवीमे-षएता" मिति विष्णोः। उपांशुनामागूःप्रणववषट्कारा उच्चैर्भवं-ति प्राणसंतताश्च याज्यानुवाक्याभ्याम्। "अग्नीषोमासवेदसायु-वमेतानिदिविरोचनानी" त्यग्नीषोमयोः। "विनइन्द्रमृधोजहि मृगो-नभीमः कुचरोगिरिष्ठा" इतीन्द्रस्य वैमृधस्य इति पौर्णमास्याम्। अथामावास्याम्। "इन्द्राग्नीअवसागतंगीर्भिर्विप्रः प्रमतिमिच्छमा-नइंद्राग्न्योः ऐन्द्रसानसिंरयिंप्रससाहिषेपुरुहूतशत्रू"नितीन्द्रस्य। "म-हांइन्द्रोयओजसाभुवस्त्वमिन्द्रब्रह्मणामहानि"तिमहेन्द्रस्य। इत्यमाया-म्। यद्यग्नीषोमीय उपांशुयाजः। "अग्नीषोमायो अद्यवामा-त्यन्दिवोमामातीरश्वाजभारे"ति याज्यानुवाक्ये। अथ स्विष्टकृतः। "पिप्रीहिदेवानि" ति अनुवाक्या। "ये ३ यजामहेग्निस्विष्टकृ-तमयाडग्निरग्नेः प्रियाधामान्ययाट्सोमस्य प्रियाधामान्ययाडग्नेः प्रियाधामान्ययाट्प्रजापतेः प्रियाधामान्ययाट् विष्णोः उपांशुप्रिया-धामान्ययाडग्नीषोमयोः प्रियाधामान्ययाडिन्द्रस्य वैमृधस्य प्रि-याधामान्ययाड्देवानामाज्यपानां प्रियाधामानी" त्यादि "जुषतां

३ ग्वै॰ । मकाराकारे याज्यांते यात्प्रयुक्तं अन्तस्थामनुनासिकामापद्यते इति । यथा जिव्हामग्नेचकृषेहव्यवाहां ३ वौ इति । ये ३ यजामहे समिधोअग्नआज्यस्यवेतू ३ वौषट् । एवं सर्वत्र द्रष्टव्यम् । " वागोज " इति सर्वत्र वषट्कारमनुमन्त्रणम् । वसिष्ठशुनकात्रिवध्न्याश्वराजन्यव्यतिरिक्तानां " तनूनपादग्नआज्यस्य व्येत्वि " ति द्वितीयं । वसिष्ठानां तु " नराशंसोअग्नआज्यस्य वेत्विति " द्वितीयः । " इडोअग्नआज्यस्यव्यंन्त्वि " ति तृतीयः । " बर्हिरग्नआज्यस्यवेत्वि " ति चतुर्थः । आगूर्य "स्वाहाग्निस्वाहा सोमंस्वाहाग्निस्वाहा प्रजापतिस्वाहा विष्णुस्वाहा उपांशुस्वाहा अग्नीषोमौस्वाहेन्द्रवैमृधंस्वाहा देवाआज्यपाजुषाणा " इत्यादिपौर्णमास्यामावास्यां सर्वत्रोपांशुसम्बन्धीनि " अवहस्वाहायाद्रप्रियाधामानीदंहविर्महोज्याय " इत्येतेषां पदानां तन्त्रस्वर एव । तन्त्रस्वराण्युपांशोरुच्चानीति वचनात् । " स्वाहाग्निस्वाहा सोमस्वाहाग्निस्वाहा प्रजापति विष्णुस्वाडुपांशुस्वाहेद्राग्नीस्वाहा देवा " इत्याद्यसंन्नयतः अमावास्यायाम् । सन्नयतस्तु इन्द्रमहेन्द्रयोरन्यतरः । एव मन्यत्रापि पञ्चमे प्रयाजे । आवाहनक्रमेण स्वाहाकारयुक्तां देवतां द्वितीयया विभक्त्यानुद्रुत्य यजेत् । सामिधेनीप्रभृतिपंचमप्रयाजपर्यन्तं मध्यस्वरेण । आज्यभागौ प्रधानस्वरेण । प्रधानहवींषि मध्यमस्वरेण । स्विष्टकृन्मध्यमेनोत्तमेन वा । इडादिशंयुवाकान्तमुत्तमेन । शंयुवाकादूर्ध्वमासमाप्तेर्मन्द्रस्वरेण । एवं तन्त्रस्वरः ॥ अथाज्यभागौ । "अग्निर्वृत्राणिजंघनत्वंसोममासिसत्पति" रित्यनुवाक्ये । पौर्णमास्यां वार्त्रघ्नौ । "अग्निः प्रत्नेनमन्मनासोमगीभिष्ट्वावय" मिति वृधन्वन्तावमावास्यायाम् । "जुषाणोअग्निराज्यस्यवेत्वि" तियाज्याग्नेः । "जुषाणः सोमआज्यस्यहविषोवेत्वि" ति सोमस्य । आगूर्य द्वितीयया विभक्त्या देवतामादिश्य या-

ज्यां संधाय यजतः । यथा "ये ३ हेग्निं जुषाणोअग्निराज्यस्यवेतूवौ-षट्र् ये ३ऽयजामहे सोमंजुषाणः सोमआज्यस्यहविषोवेतू वौ"॰इति । एवं सर्वत्रयाज्यासु द्रष्टव्यम् । अनुवाक्याराहितानां सप्रैषाणामन्वा-याज्यानामेतस्मिन्नेवासने वैश्वानरीयस्य यजतीति या वैश्वानरीये-ष्टिः पत्नीसंयाजैश्चरित्वावभृथं व्रजंतीत्यत्र ये पत्नीसंयाजाः एत-न्मध्यवर्त्तिसौमिकीनां चादेशो न कर्तव्यः । आदेशप्रभृत्येतदन्तं वाग्यमनम् । इत ऊर्ध्वमपि याज्यानुवाक्ये अंतरा च प्रमादाद्वा-ग्यमनभङ्गे "इदंविष्णु" रित्यृचं "अतोदेवा" इति वा जपेत् ॥

अथ प्रधानयागः । "अग्निर्मूर्द्धा, भुवोयज्ञस्ये" त्यग्नेर्याज्या-नुवाक्ये । "प्रजापतेनत्वदेतान्यन्यस्तवेमेलोकाः प्रदिशोदिशश्चे"-ति प्रजापतेः । विष्णुश्चेत् "इदंविष्णुर्विचक्रमेत्रिदेवः पृथिवीमे-षएता" मिति विष्णोः । उपांशुनामागूःप्रणववषट्कारा उच्चैर्भवं-ति प्राणसंतताश्च याज्यानुवाक्याभ्याम् । "अग्नीषोमासवेदसायु-वमेतानिदिविरोचनानी" त्यग्नीषोमयोः । "विनइन्द्रमृधोजहि मृगो-नभीमः कुचरोगिरिष्ठा" इतीन्द्रस्य वैमृधस्य इति पौर्णमास्याम् । अथामावास्याम् । "इन्द्राग्नीअवसागतंगीर्भिर्विप्रः प्रमतिमिच्छमा-नइंद्राग्न्योः ऐन्द्रसानसिंरयिंप्रससाहिषेपुरुहूतशत्रू"नितीन्द्रस्य । "म-हांइन्द्रोयओजसाभुवस्त्वमिन्द्रब्रह्मणामहानि"तिमहेन्द्रस्य । इत्यमाया-म् । यद्यग्नीषोमीय उपांशुयाजः । " अग्नीषोमायो अद्यवामा-त्यन्दिवोमामातीरश्वाजभारे"ति याज्यानुवाक्ये । अथ स्विष्टकृतः । "पिप्रीहिदेवानि" ति अनुवाक्या । " ये ३ यजामहेग्निंस्विष्टकृ-तमयाडग्निरग्नेः प्रियाधामान्ययाट्सोमस्य प्रियाधामान्ययाडग्नेः प्रियाधामान्ययाट्प्रजापतेः प्रियाधामान्ययाट् विष्णोः उपांशुप्रिया-धामान्ययाडग्नीषोमयोः प्रियाधामान्ययाडिन्द्रस्य वैमृधस्य प्रि-याधामान्ययाड्देवानामाज्यपानां प्रियाधामानी" त्यादि " जुषतां

हविरग्नेयद्व्रविशो अध्वरस्ये” त्यनवानं यजतिप्रकृत्या वा । इति पौर्णमास्याम् । अमावास्यायां तु “य ३ येयजामहेऽग्निस्विष्टकृतमयाडग्निरग्नेः प्रियाधामान्ययाट् सोमस्य प्रियाधामान्ययाडग्नेः प्रियाधामान्ययाड्विष्णोः प्रियाधामान्ययाडिन्द्राग्न्योः प्रियाधामान्ययाड्देवानामाज्यपाना” मित्यादि पूर्ववत् । संनयतस्तु इन्द्राग्न्योः स्थाने इन्द्रमहेन्द्रयोरन्यतरः । एवमन्यत्रापि । “ये हेग्निस्विष्टकृतमयाडग्निरग्नेः प्रियाडि” त्युक्त्वा आवाहनक्रमेणैव षष्ठ्या विभक्त्या देवता अनुद्रुत्य प्रियाधामान्ययाट्शब्देनोपसन्तत्य देवानामाज्यपानामित्यादि । प्रदेशिन्याः पर्वणी उत्तमे द्वे अध्वर्युणा अञ्जयित्वा वाचस्पतिनेत्युत्तरपर्वलेपमुत्तरोष्ठेभ्यात्मं निमार्ष्टि । मनसस्पतिनेत्यधरपर्वलेपमधरोष्ठे निमार्ष्टि । स्पृष्टोदकम् । अञ्जलिनेडां प्रतिगृह्य सव्ये पाणौ निधाय इडायाः पश्चाद्दक्षिणपाणिमुत्तानाङ्गुलिं निधाय अङ्गुल्यङ्गुष्ठयोर्मध्येनाऽवान्तरेडामध्वर्युणाऽवदापयीत । तासु ततः पुनस्तेनैव मार्गेण द्वितीयं स्वयमादाय अङ्गुष्ठेनोपसंगृह्य परिगृह्याङ्गुलीः मुष्टिं कृत्वा अवान्तरेडासहितेन दक्षिणेन पाणिना दक्षिणत इडां परिगृह्य आस्यसंमितां नासिकासमितां वा धारयन्नुपह्वयते । इडोपहूतेत्यादि तस्मिन्नुपहूत इत्यन्तम् । तत्र इडाव्रष्टिहूयतामित्यन्वमुपांशु । शेषमुच्चैरुपहूय तीर्थेन निष्क्रम्य इडेभागमित्यवान्तरेडां प्राश्य तूष्णीमिडाप्राशनं कृत्वाचम्य तीर्थेन प्रविश्य वेदिपरिस्तरणैरञ्जलिमन्तर्धाय केनचित्सहकारिणा अप आसेचयित्वा मार्जयेत् । “पृथिवीभागोसी”ति चतुर्धाकरणभक्षणम् । ततः “कइदंकस्माऽदा”इत्यन्वाहार्याभिमर्शनम् । क इदं कस्माअदा इत्यस्य सोमप्रकरणेभिधानात् । प्राक्सोमात्तूष्णीमिति केचित् । अथानुयाजास्त्रय एकैकं प्रेषितो यजति । नात्रागूः । देवंबर्हिः १ देवोनराशंसः २ देवो

अग्निः ३। स्विष्टकृदनवानं यजतिप्रकृत्या वा।प्रकृति पक्षेअमर्त्यते-
त्यवसानम् । प्रेषितः सूक्तवाकं ब्रूयात् । इदं द्यावापृथिवी इत्यादि
नमोदेवेभ्य इत्यन्तम् । तयोराविदीत्यवसाय आवाहनक्रमेणैव प्र-
थमया विभक्त्या देवतामादिश्य "इदं हविरजुषतावीबृधतमहोज्या-
योक्रत"त्युपसंतनुयात् । द्विदेवत्ये "इदं हविरजुषेतामवीवृधेतां
महोज्यायोक्रातां"बहुदैवत्ये "हविरजुषन्तामवीवृधतमहोज्यायोक्रत"
त्यूहः । "अग्निरिदं हविः सोम इदं हविः । अग्निरिदं हविः ।
प्रजापतिः । विष्णुः । उपांशु । इदं हविरित्युच्चैः । "अग्नी-
षोमाविदं० जुषे० धेतां० क्रातां० । इन्द्रोवैमृध इदं हविः" इति
पौर्णमास्याम् । "अग्निरिदं हविः । सोमइदं हविः । अग्निरिदंह-
विः । उपांशु पूर्ववत् । इन्द्राग्नीइदं हविः । जुषे० धेतां क्रातां"
इत्यमावास्यायामसन्नयतः । सन्नयतस्तु ऐन्द्राग्नस्थाने इन्द्र इदं महेन्द्र
इदं हविरिति वा । देवाआज्यपा इत्यादि यथापठितमेव ब्रूयात् ।
अयं यजमान इत्यवसाय यजमानस्य द्वे नामनी आदिशति । व्या-
वहारिकं नाक्षत्रं च यज्ञेश्वरशर्मा रौहिणः आयुराशास्त इत्यादि ।
नाक्षत्रनामग्रहणप्रकार उच्यते । कार्त्तिकः रौहिणः मार्गशीर्ष आर्द्र-
कः पुनर्वसुः पुष्यः तिष्य इति वा । आश्लेषः माघः फाल्गुनः ।
हस्तः चैत्रः स्वातिः विशाखः अनुराधः ज्यैष्ठः मूलकः आषाढः
श्रवणः श्रावण इति वा । धनिष्ठः शातंभिषजः शतभिषगिति वा ।
प्रौष्ठपदः रैवतः आश्वयुजः अश्वयुगिति वा । अपभरणः । तथा
चोक्तं रोरेमृमज्येचिषु वृद्धिरादौष्ठान्सेववान्त्यश्रवगश्वयुक्षु । शेषेषु
नाम्नोर्कपरः स्वरोन्त्यः स्वाद्योरदीर्घः सविसर्गः इष्ट इति । शंयु-
वाकाय संप्रेषितस्तच्छंयोरावृणीमह इत्याहानुवाक्यवद्ब्रूयात्प्रणवर-
हितम् । अथाध्वर्युर्वेदं प्रयच्छति तं "वेदोसी"ति मन्त्रेण गृहीत्वा
उदायुषेत्येतेनोपोत्थाय गार्हपत्यस्य पश्चादुपविश्य पत्नीसंयाजान्य-

जति । तत्र अध्वर्युप्रत्ययेन देवताक्रमः । सोमः त्वष्टा राका सिनीवाली कुहूर्देवानांपत्नीरग्निर्गृहपतिः । तत्र राकायास्तिस्रः काम्याः । इतरास्तु नित्याः । "आप्यायस्वसमेतुतेसन्तेपयांसिसमुयंवाजा" इति सोमस्य । "इहत्वष्टारमग्रियन्तन्नस्तुरीय"मिति त्वष्टुः । "राकामह"मिति द्वे राकायाः । "सिनीवालिपृथुष्टुक" इति द्वे सिनीवाल्याः । "कुहूमह" मिति द्वे कल्पजे कुह्वाः । "देवानां पत्नीरुशतीरदन्तुन"इति द्वे देवानां पत्नीनाम् । "अग्निर्होतागृहपतिर्हव्यवाडाग्नि" रित्यग्नेः गृहपतेः । पूर्ववत्पत्न्यञ्जनादि । आज्यं पाणितलेवदापयीत । पूर्ववदिडामुपहूय तूष्णीं प्राश्याचम्य शंयुवाको वदेन्न वा । वेदं पत्नी प्रदाय वाचयति । "वेदोसिवित्तिरसी" त्यादि "कामायत्वे" त्यन्तम् । पत्नी प्रजाकामा चेद्वेदशिरसा नाभिदेशमालभेत । अथ होता पत्न्या योक्त्रं "प्रत्वामुञ्चामिवरुणस्ये" त्यृचा विमुच्य द्विगुणं कृत्वा गार्हपत्यस्य पश्चात् प्राक्पाशं निधाय तस्योपरिष्टाद्वेदं विस्रस्य उदगग्रं निधाय वेदेन संश्लिष्टं प्रोक्षणीपात्रं पुरो निधायाद्भिः पूरयित्वा स्वयं पत्नीं चाभिमृश्य पत्नीं वाचयति पूर्णमसीत्यादि । अथ पूर्णपात्रात्प्रतिदिशमुदकमुदुक्षन्स्वयमुदुक्षतीं पत्नीं वाचयति । "प्राच्यां दिशि देवा" इत्यादि । अथ पत्न्या उत्तानमञ्जलिमात्मनश्च सव्यमुत्तानं हस्तं योक्त्रस्याधस्तान्निधायाभ्यात्मं पूर्णपात्रं निनयन्वाचयेत् "माहंप्रजा"मिति । पत्नीद्वित्वे बहुत्वे वा सर्वासां योक्त्राणि क्रमेण विमुच्य सर्वाणि ग्रहैव द्विगुणीकृत्य योक्त्रविमोचने मन्त्रावृत्तिः । पूर्णपात्राभिमर्शनवाचनोदुक्षणनिनयनानि सर्वासां युपगच्छवन्ति । अथ दक्षिणपाणिना वेदतृणान्यग्रे गृहीत्वा अविधुन्वन् "तन्तुंतन्व" न्नित्यनेन सव्येन पाणिना वेदतृणानि सन्ततं स्तृणन् गार्हपत्यादाहवनीयं गच्छेत् । शेषमन्तर्वेदि निधाय प्रत्यगुद-

गाहवनीयादवस्थाय स्थाल्याः स्रुवेणाज्यमादाय सर्वप्रायश्चित्तानि जुहोति। अयाश्चेत्येका कल्पजा । प्रथमस्याग्निरयसौदेवता "अयादे-वा" इति द्वे। द्वितीयस्या देवा देवता। तृतीयस्या विष्णुर्देवता। भूः स्वाहा। भुवः स्वाहा। स्वः स्वाहा। भूर्भुवः स्वाहा। एवं सप्ताहुतीः। व्याहृतीनां व्यस्तसमस्तानां क्रमेणाग्निवायुसूर्यप्रजाप-तयो देवताः। इति हुत्वा। "ॐचमेस्वरश्चम" इति संस्थाजपेनो-पस्थाय तीर्थेन निष्क्रमेत्। एतावद्दर्शपूर्णमासयोर्होतृकर्म ॥

अथ ब्रह्मण इत्यादि। ब्रह्मा कर्माङ्गाचमनं कृत्वा होतृवत्तीर्थे-न विहारं प्रपद्य समस्तपाण्यङ्गुष्ठाग्रेणाहवनीयं परीत्य आहवनीय-स्य दक्षिणतो ब्रह्मासनं भवति तस्य दक्षिणत उदङ्मुखो ब्रह्मा-सनात्तृणं निरस्याहवनीयमभिमुखो होतृवदुपविशति । उपविश्य जपति "ब्रहस्पतिर्ब्रह्मे" ति। अथाध्वर्युराह "ब्रह्मन्नपः प्रणेष्या-मी" ति। श्रुत्वा ब्रह्मा "भूर्भुवस्वः बृहस्पतिप्रसूत" इति जपित्वा "ॐप्रणये" त्यतिसृजेत् । प्रणवाद्युच्चैरूर्ध्वं वा प्रणवात्। अत ऊर्ध्वं वाग्यत आस्ते आहविष्कृत उद्वासनात्। अन्यत्र होतृवद्वा-ग्यमनम्। "ब्रह्मन् प्रोक्षिष्यामी" ति श्रुत्वा "भूर्भुवस्वरि" त्येवमा-दि जपित्वा "ॐप्रोक्षे" त्यतिसृजेत्। "परिगृहीष्यामी" ति श्रु-त्वा "परिगृहाणे" त्यतिसृजेत्। "ब्रह्मन्निध्मंप्रोक्षिष्यामी"ति श्रु-त्वा भूरिसेवमादि जपित्वा "ॐप्रोक्षे" त्यतिसृजेत्। बर्हिः प्रोक्षणे एवमेव। "ब्रह्मन्प्रवरायाश्रावयिष्यामी" ति श्रुत्वा भू-रित्यादिजपित्वा "ॐमाश्रावये" त्यतिसृजेत्। अथ प्राशित्रमा-नीयमानमीक्षते "मित्रस्यत्वे" त्यनेन। प्राशित्रमञ्जलिना प्रतिगृ-ह्णामीति देवस्यत्वेत्यनेन पृथिव्यास्त्वेत्यनेन कुशेषु प्राग्दण्डं प्राशि-त्रहरणं निदधाति। अंगुष्ठोपकनिष्ठिकाभ्यां गृहीत्वा "निष्क्रम्याग्ने-ष्ट्वास्येन प्राश्नामी"त्यनेन प्राश्नाति दन्तैरभिन्दन्। आचम्योदकं

भक्षयेत्सत्येनत्वेत्यनेन पुनराचम्य इन्द्रस्यत्वेत्यनेन नाभिमालभेत् । प्रविश्य विहारं प्रक्षाल्य प्राशित्रहरणं त्रिरनेनाभ्यात्ममथो निनयेत् । इडां भक्षयित्वा होतृवन्मार्जयित्वास्मिन् ब्रह्मभागं निदध्यात् । पश्चात्कुशेषु यजमानभागं निदध्यात् । अन्वाहार्यमवेक्षेत । " प्रजापतेर्भागं " इत्यनेन । अन्वाहार्यादङ्गुष्ठोपकनिष्ठिकाभ्यां गृहीत्वा प्राणापानावित्यनेनास्पृशन्नवघ्राय अथ दक्षिणाग्रहणं होतृवत्कृत्वा स्वकीयभागं गृहीत्वा ब्रह्मभागं निदध्यात् । शिष्टं ब्रह्मन्प्रणस्याम इति श्रुत्वा "बृहस्पतिर्ब्रह्माब्रह्मसदन आशिष्टे" त्येवमादि जपित्वा " ॐप्रतिष्ठे " त्यतिसृजेत् । संस्थिते कर्मणि ऋत्विजां जघन्यसर्वप्रायश्चित्तानि जुहुयात् । " अयाश्चाग्न " इत्येवमादिभिर्मन्त्रैः होतृवत् । अथ संस्थाजपः । तीर्थेन निष्क्रम्यानियमः ॥

इत्याश्वलायनसूत्रप्रयोगदीपिकायां मञ्चनार्यभट्टविरचितायां प्रथमोऽध्यायः ॥

अथ पावमानेष्ट्यादयो द्वितीयाध्याये समाम्नाता इष्टयो वक्ष्यन्ते । तासां दर्शपूर्णमासिकमेव तन्त्रम् । दर्शपूर्णमासाविष्टीनां प्रकृतिरिति वचनात् । आज्यभागौ तु सर्वत्र वार्त्रघ्नावेव । एतदभिप्रायेण पौर्णमासेनेष्टिपशुसोमा उपदिष्टा इत्युक्तमाचार्येण । तस्यायमर्थः । पौर्णमासेन कर्मणा इष्ट्यादयो व्याख्याताः न दर्शेन । एतदत्र फलति । वार्त्रघ्नावाज्यभागौ भवतो न वृधन्वन्ताविति । यत्तु जैमिनिना सानाय्यं तावत् द्रव्यत्वादित्यत्र पशोः सान्नाय्यविकारत्वमुक्तम् । यद्यपि प्रकृतिभावनिर्णये द्रव्यसामान्यं दुर्बलमिति स्थितं तथापि औपमानिकाद्द्रव्यसामान्यात्प्रत्यक्षं देवतासासामान्यं बलवदेव । तस्मादग्नीषोमीयपुरोडाशविकारत्वादुपपन्नं वार्त्रघ्नावाज्यभागाविति । इष्टिषु तु यत्र पौर्णमासप्रकृतत्वं न्यायतो

वक्तुमशक्यं तत्राज्यभागयोर्वाचनिकत्वं द्रष्टव्यम्। सोमे अपूर्वेपि पौर्णमासातिदेशं कुर्वतस्तत्र वृत्तिकारस्यायमाशयः। असमाम्नातानामिष्टीनां सोमे प्रयुज्यमानानां पौर्णमासमेव तन्त्रं कार्यं नार्थात्तन्त्रं विकार इति। तैरिष्टिपशुसोमैरमावास्यायामेव यजेत पौर्णमास्यां वा यजेत्। न प्रकृतिवत् द्व्यहकालता कार्या। राजन्योऽमावास्यायां पौर्णमास्यां चाग्निहोत्रं जुहुयात्। अमावास्यापौर्णमासीतोऽन्यत्र तपस्विने ब्राह्मणाय होमद्रव्यमग्निहोत्रकाले दद्यात्। यस्तु राजन्यो वाङ्मनसयोर्वाच एव वा यथार्थत्वप्रवर्तनशीलः यो वा सोमयाजी भवति राजन्यः स तदाग्निहोत्रं जुहुयात्। नाऽमावास्यापौर्णमासयोरेव नियमः। अनेकेष्वर्थेष्वनेकेषामर्थानामुपदेशे सति प्रथमस्य प्रथमो द्वितीयस्य द्वितीय इत्यानन्तर्ययोगो ग्राह्यः। याज्यानुवाक्ये एकैकस्य द्वे द्वे कृत्वा आनन्तर्ययोगो ग्राह्यः। अदृष्टादेशे चेद्याज्यानुवाक्ये ततो निसे भवतः। एतदुक्तं भवति। यत्र कर्मणि देवतामुद्दिश्य याज्यानुवाक्ये स्वशास्त्रे नादिष्टे तथाऽध्वर्युशास्त्रेप्यादेशो न दृश्यते तत्र कर्मणि तस्यै देवतायै येऽस्मच्छास्त्रे प्रसिद्धे ते याज्यानुवाक्ये कर्त्तव्ये॥

अथाग्न्याधेयमुच्यते॥ तच्च कृत्तिकासु रोहिण्यां मृगशिरसि पूर्वोत्तराफाल्गुनीषु विशाखयोरुत्तरयोः प्रोष्ठपदयोः एतेषां सप्तानां नक्षत्राणां मध्ये कस्मिंश्चिदादधीत। ग्रीष्मवर्षाशरत्सु कालेषु क्षत्रियवैश्यरथकारा यथाक्रममादधीरन्। नक्षत्रपर्वणि तु पूर्ववत्। अथ वा यः कश्चिद्यस्मिन्कस्मिंश्चिदेवादधीत। नक्षत्रपर्वणि तु पूर्ववत्। सोमाधानं कर्तुमिच्छन् न ऋतुमीक्षेत न नक्षत्रमीक्षेत। एतदग्न्याधेयमङ्गहीनाश्रोत्रियषडङ्गादिशूद्रवर्जमधिकारः। इत्याधानकालः॥ अश्वत्थाच्छमीगर्भादरणी आहरेत्। यजमानः अनपेक्षमाणो यो अश्वत्थशमीगर्भ इति। शमीकोटरजोऽश्वत्थः शमीगर्भो नि-

गद्यते । शम्या संसक्तमूलो वा शमीच्छायां गतो ऽपि वेति हरदत्ते जैमिनिसूत्रेण । अत्र सूत्रे शमीगर्भशब्दे संशयः । किं शम्या गर्भः शमीगर्भः शम्या उपरि यो जात इत्यर्थः । एवं तत्पुरुषो ग्राह्यः । उत्तमशमी गर्भे यस्येति । शमी यस्योपरि जायते इत्यर्थः। एवं बहुव्रीहिर्ग्राह्य इति । तत्र तत्पुरुष एव ग्राह्यो न बहुव्रीहिः । शमीगर्भशब्दस्य अन्तोदात्तस्य वेदे प्रयोगात् । पूर्णाहुत्यन्तमग्न्याधेयं भवति । इष्टयस्तु वैकल्पिक्यः । तत्र यदि अध्वर्युरिष्टिं कुर्यात् तदन्तं तदाग्न्याधेयं भवति । अथ पूर्णाहुत्यन्तमग्न्याधेयम् । केचित्तु पूर्णाहुत्यन्तमग्न्याधेयमग्निहोत्रहोमार्थमिच्छन्ति । नेतरकर्मार्थम् । अन्यथा कर्मार्थे तस्मिन्निष्टयो नित्या भवन्ति । केचित्त्वाग्नेयीमेवेष्टिं नित्यामिच्छन्ति । अन्या अनित्याः । अथ गार्हपत्यागारे अग्न्याधेये क्रियमाणे ब्रह्मणः स्थानासनयोर्विकल्पः । तथारण्योः प्रदानकाले तथा ब्रह्मौदनश्रपणकाले तथा अजबन्धनकाले तथा समिदाधानकाले अथ ब्रह्मौदनप्राशनकाले निरसनोपवेशने कृत्वा ब्रह्मजपं जपति । तत आहवनीयाधानकाले दक्षिणत आहवनीयस्य निरसनोपवेशने कृत्वा ब्रह्मजपं जपित्वास्ते आपूर्णाहुतिहोमात् । चेष्टास्वमन्त्रासु स्थानासनयोर्विकल्पः । सर्वत्र स्थानासनमाकर्मणः परिसमाप्तेः। अथ होता । यदि अध्वर्यवः इष्टीस्तनुयुः तत्र आवाहने विशेषः । आज्यभागावावाह्य "अग्निं आवह अग्निं पवमानं आवह देवाः आज्यपामि"त्यादि । पञ्चमे प्रयाजे। "ये३ यजामहेस्वाहाग्निं स्वाहा सोमंस्वाहाग्निंपवमानं स्वाहा देवा" इत्यादि । वात्रघ्नावाज्यभागौ । आग्नेयस्याग्निर्मूर्द्धेत्यनुवाक्या याज्यायां विशेषः । " अयमग्निः सहस्रिण " इति याज्या । "अग्नआयूंषिपवसेग्नेपवस्वस्वपा" इत्यग्नेः पवमानस्य । अथ स्विष्टकृतः । "सहव्यवानमर्त्य" इत्यनुवाक्या । "ये ३,० हे

ग्निं स्विष्टकृतमयाडग्निरग्नेः प्रियाधामान्ययाट्सोमस्य प्रियाधामा-न्ययाडग्नेः प्रियाधामान्ययाडग्नेः पवमानस्य प्रियाधामान्ययाड्दे-वानामाज्यपानां प्रिया० जुषतां हविरग्निर्होता पुरोहित" इति याज्या । संयाज्ये इत्युक्तेः स्विष्टकृद्यागसंबन्धिन्यौ याज्यानुवाक्ये प्रतीयात् । सूक्तवाके । "अग्निरिदं हविः सोम इदं हविः अग्नि-रिदं हविः अग्निःपवमान इदं हविः देवा आज्यपे"त्यादि । अन्य-दवस्थानादिनिष्क्रमणान्तं पौर्णमासेन व्याख्यातम् । अन्यत्रापि सर्वत्र देवतागमे नित्यानामपायो या स्विष्टकृतमन्तराज्यभागौ च तास्तत्स्थाने एष समानजातिधर्मः । तथा देवताया देवतयोर्देव-तानां वा आगमे सर्वासां प्रसिद्धानामपायो भवति । यस्य प्राकृ-तस्य स्थाने वैकृतं तज्जातीयमागतं भवति तद्वैकृतं प्राकृतधर्मकं वक्तव्यम् । प्राकृतं त्वपनेतव्यम् । यथा पित्र्यायां सामिधेन्यः ॥

अथ द्वितीयेष्टिः ॥ तस्यामावाहने विशेषः । आज्यभागावावा-ह्य "अग्निंपावकंआ३वहा अग्निंशुचिंआवह देवाः" इत्यादि । पं-चमे प्रयाजे "ये ३ यजामहेस्वाहाग्निंस्वाहा सोमंस्वाहाग्निंपावकं स्वाहाग्निंशुचिंस्वाहादेवा" इत्यादिवृधन्वन्तावाज्यभागौ भवतः । "सनः पावकदीदिवोग्नेपावकरोचिषे" त्यग्नेः पावकस्य याज्यानु-वाक्ये भवतः "अग्निः शुचिव्रततमउदग्नेशुचयस्तवे" त्यग्नेः शुचेः । अथ स्विष्टकृतः "साह्वान्विश्वाअभियुज" इत्यनुवाक्या । "ये ३ ग्निंस्विष्टकृतमयाडग्निरग्नेः प्रि०सोमस्यप्रि०डग्नेः पावकस्यप्रि० डग्नेः शुचेः प्रि० देवानामाज्यपाना" मित्यादि० "जुषतांहविराग्नि-र्होतापुरोहित" मिति याज्या । सूक्तवाके । "अग्नि रिदं हविः सोमइदं अग्निः शुचिरिदं देवा आज्यपे" त्यादि । अन्यदर्शेन व्याख्यातम् ॥

अथ तृतीयेष्टिः ॥ तस्यामिष्टौ सामिधेन्यौ प्रक्षिपति । "समिं-

गद्यते । शम्या संसक्तमूलो वा शमीच्छायां गतो ऽपि वेति हरदत्ते जैमिनिसूत्रेण । अत्र सूत्रे शमीगर्भशब्दे संशयः । किं शम्या गर्भः शमीगर्भः शम्या उपरि यो जात इत्यर्थः । एवं तत्पुरुषो ग्राह्यः । उत्तमशमी गर्भे यस्येति । शमी यस्योपरि जायते इत्यर्थः। एवं बहुव्रीहिर्ग्राह्य इति । तत्र तत्पुरुष एव ग्राह्यो न बहुव्रीहिः । शमीगर्भशब्दस्य अन्तोदात्तस्य वेदे प्रयोगात् । पूर्णाहुत्यन्तमग्न्याधेयं भवति । इष्टयस्तु वैकल्पिक्यः । तत्र यदि अध्वर्युरिष्टिं कुर्यात् तदन्तं तदाग्न्याधेयं भवति । अथ पूर्णाहुत्यन्तमग्न्याधेयम् । के चित्तु पूर्णाहुत्यन्तमग्न्याधेयमग्निहोत्रहोमार्थमिच्छन्ति । नेतरकर्मार्थम् । अन्यथा कर्मार्थे तस्मिन्निष्टयो नित्या भवन्ति । के चित्वाग्नेयीमेवेष्टिं नित्यामिच्छन्ति । अन्या अनित्याः । अथ गार्हपत्यागारे अग्न्याधेये क्रियमाणे ब्रह्मणः स्थानासनयोर्विकल्पः । तथारण्योः प्रदानकाले तथा ब्रह्मौदनश्रपणकाले तथा अजबन्धनकाले तथा समिदाधानकाले अथ ब्रह्मौदनप्राशनकाले निरसनोपवेशने कृत्वा ब्रह्मजपं जपति । तत आहवनीयाधानकाले दक्षिणत आहवनीयस्य निरसनोपवेशने कृत्वा ब्रह्मजपं जपित्वास्ते आपूर्णाहुतिहोमात् । चेष्टास्वमन्त्रासु स्थानासनयोर्विकल्पः । सर्वत्र स्थानासनमाकर्मणः परिसमाप्तेः। अथ होता । यदि अध्वर्यवः इष्टीस्तनुयुः तत्र आवाहने विशेषः । आज्यभागावावाह्य "अग्निं आवह अग्निं पवमानं आवह देवाः आज्यपामि"त्यादि । पञ्चमे प्रयाजे। "ये३ यजामहेस्वाहाग्निं स्वाहा सोमंस्वाहाग्निंपवमानं स्वाहा देवा" इत्यादि । वार्त्रघ्नावाज्यभागौ । आग्नेयस्याग्निर्मूर्द्धेत्यनुवाक्या याज्यायां विशेषः । " अयमग्निः सहस्रिण " इति याज्या । "अग्नआयूंषिपवसेग्नेपवस्वस्वपा" इत्यग्नेः पवमानस्य । अथ स्विष्टकृतः । "सहव्यवानमर्त्य" इत्यनुवाक्या । "ये ३,० हे

ग्निं स्विष्टकृतमयाडग्निरग्नेः प्रियाधामान्ययाट्सोमस्य प्रियाधामान्ययाडग्नेः प्रियाधामान्यथाडग्नेः पवमानस्य प्रियाधामान्ययाड्देवानामाज्यपानां प्रिया० जुषतां हविरग्निर्होता पुरोहित ” इति याज्या । संयाज्ये इत्युक्तेः स्विष्टकृद्यागसंबन्धिन्यौ याज्यानुवाक्ये प्रतीयात् । सूक्तवाके । “अग्निरिदं हविः सोम इदं हविः अग्निरिदं हविः आग्निःपवमान इदं हविः देवा आज्यपे”त्यादि । अन्यदवस्थानादिनिष्क्रमणान्तं पौर्णमासेन व्याख्यातम् । अन्यत्रापि सर्वत्र देवतागमे नित्यानामपायो या स्विष्टकृतमन्तराज्यभागौ च तास्तत्स्थाने एष समानजातिधर्मः । तथा देवताया देवतयोर्देवतानां वा आगमे सर्वासां प्रसिद्धानामपायो भवति । यस्य प्राकृतस्य स्थाने वैकृतं तज्जातीयमागतं भवति तद्वैकृतं प्राकृतधर्मकं वक्तव्यम् । प्राकृतं त्वपनेतव्यम् । यथा पित्र्यायां सामिधेन्यः ॥

अथ द्वितीयेष्टिः ॥ तस्यामावाहने विशेषः। आज्यभागावावाह्य “अग्निंपावकंआ३वहा अग्निंशुचिंआवह देवाः ” इत्यादि । पंचमे प्रयाजे “ये ३ यजामहेस्वाहाग्निंस्वाहा सोमंस्वाहाग्निंपावकं स्वाहाग्निंशुचिंस्वाहादेवा” इत्यादित्वृधन्वन्तावाज्यभागौ भवतः । “सनः पावकदीदिवोग्नेपावकरोचिषे” त्यग्नेः पावकस्य याज्यानुवाक्ये भवतः “अग्निः शुचिव्रततमउदग्नेशुचयस्तवे” त्यग्नेः शुचेः । अथ स्विष्टकृतः “साह्वान्विश्वाअभियुज” इत्यनुवाक्या । “ये ३ ग्निंस्विष्टकृतमयाडग्निरग्नेः प्रि०सोमस्यप्रि०डग्नेः पावकस्यप्रि० डग्नेः शुचेः प्रि० देवानामाज्यपाना” मित्यादि० “जुषतांहविरग्निमीडेपुरोहित” मिति याज्या । सूक्तवाके । “अग्नि रिदं हविः सोमइदं अग्निः शुचिरिदं देवा आज्यपे” त्यादि । अन्यद्दर्शेन व्याख्यातम् ॥

अथ तृतीयेष्टिः ॥ तस्यामिष्टौ सामिधेन्यौ प्रक्षिपति । “समिं-

ध्यमानो अध्वर" इत्यस्या उपरिष्टात् । उत्तमसमीपा उपोत्तमा तस्याः प्राक् "पृथुपाजा अमर्त्य" इति द्वे आवपति । यत्र यत्र धाय्या इत्युच्यते । तत्र तत्र एते ऋचावेतद्धर्मके वेदितव्ये आवाहने आज्यभागावावाह्य । अग्नीषोमौ इन्द्राग्नी विष्णुरिति त्रीणि देवता भवन्ति । तिसृणां मध्ये एका देवता विकल्पेन भवति । अदितिर्नित्यो भवति । "अग्निमग्नआ ३ सोममावह इन्द्राग्नी आवह अदितिं आवह देवा आज्यपा"मित्यादि पञ्चमे प्रयाजे "ये ३ स्वाहाग्निस्वाहा सोमंह स्वाहा इन्द्राग्नीस्वाहा अदितिस्वाहा देवा" इत्यादि । पुष्टिमन्तावाज्यभागौ । "अग्निनारायिमश्नवद्भय-स्फानो अमीवहे" त्याज्यभागयोरनुवाक्ये । याज्ये नित्ये । आधानां त्रयाणां दर्शपूर्णमासप्रकरणे उक्ता याज्यानुवाक्याः । तत्राग्नीषोमयोः पौरोडाशिके वेदितव्ये । नोपांशुयाजसंबन्धिन्यौ । "उतत्वामादतेमहीमहीमूषुमातरंसुव्रताना" मित्यृचावदितेर्वेदितव्ये । अथ स्विष्टकृतः । "प्रेद्धोअग्नेदीदिही" त्यनुवाक्या । "ये ३ ग्नि स्विष्टकृतमयाडग्निरग्नेः प्रि० सोमस्यप्रि०इन्द्राग्न्योः प्रि०अदित्या प्रि० देवाना" मित्यादि० । "जुषतांहविरिमोअग्नेवीततमानि" इति याज्या । विराजावित्युक्त एते संयाज्ये प्रत्येतव्ये सर्वत्र सूक्तवाके । "अग्निरिदं०सोमइदं०इदाग्नीइदं०ये०क्रातांअदितिः इदं-देवाआज्यपा" इत्यादि । अन्यत्पौर्णमासवत् । अथ प्रासङ्गिकम् । इति तिस्रः । अस्यायमर्थः । तिस्र इष्टय एवं तन्त्रका भवंति । अन्या अपीष्टयो भवन्ति । तास्वन्यथा तन्त्रा भवन्ति । उक्तेष्टित्रयमध्ये यदि देवतान्यत्वं भवाति तथापि तत्प्रथमायामाम्नातं तन्त्रं तदेव प्रथमायां भवाति । द्वितीयस्यामाम्नातं तन्त्रं तदेव द्वितीयायां भवति । यच्च तृतीयस्यामाम्नातं तदेव तृतीयस्याम् । नान्यथातन्त्रं कार्यम् । इति तिस्र इष्टयः । अथ वा आद्योत्तमे इष्टी भवतः । अथ

वा आद्या वा इष्टिर्भवति । सा षढविका भवति सर्वदेवतायुक्ता त-थासाति तदाज्यभागयुक्तायां प्रथमायां धाय्ये भवतः । विराजौ तु संयाज्ये भवतः । इति मात्रो विकारो यस्यामिष्टौ भवति असाविष्टिर्वैराजतन्त्रं विजानीयात् । एवं चाध्वर्युवशाद्यदाऽऽद्यैव क्रियते तदा द्वितीयतृतीययोरपि देवतास्तस्यामेव यष्टव्याः । तदनुसारेण प्रयोग उच्यते । आवाहने विशेषः । "अग्निमग्नआ० सोममावह अग्निमाव० अग्निंपवमानं० अग्निंपावकं० अग्निंशुचिं०इन्द्राग्नी-आवह अदितिंआ०देवाः "इत्यादि । पञ्चमे प्रयाजे । "ये३ स्वाहाग्निं० सोमं० ग्निं० अग्निंपवमानं स्वाहाग्निंपावकं० ग्निंशुचिं हेन्द्राग्नी स्वाहा अदितिं आ०देवा" इत्यादि । अग्न्याधेयप्रभृति चातुर्मास्यपर्यन्तं या इष्टयस्तासां प्रधानमुपांशुप्रकारः । अग्न्याधेयप्रभृत्यात उपांशु हविष इति वचनात् । वार्त्रघ्नावाज्यभागौ प्रधानानां याज्यानुवाक्या इष्टित्रये उक्ताः । अथ स्विष्टकृतः । "प्रेद्धो अग्ने" इत्यनुवाक्या । "ये३ ग्निंस्विष्टकृतमया।डग्निरग्नेः प्रि०ट्सोमस्यप्रि० डग्नेः प्रि० अग्नेः पवमानस्य प्रि० अग्नेः पावकस्य प्रि० अग्ने शुचेः प्रि०इन्द्राग्न्योः प्रिया०अदित्या प्रिया०देवानामाज्यपाना" मित्यादि " जुषतां हविरिमा अग्ने " इति याज्या सूक्तवाके "अग्निरिदं सोम इदं अग्निरिदं अग्निः पवमानः इदं अग्निः पावकः इदं अग्निः शुचिः इदं इन्द्राग्नी इदं०षे० धेक्रातां अदितिः इदं हविः देवा" इत्यादि । पौर्णमासवत्सर्वं संस्थाजपान्तम् । यदा अग्निः पवमानः केवलः क्रियते पूर्वकारिवशात् तदा प्रथमायामेव तन्त्रं भवति । एवमग्नेरपि केवलस्य । यस्मिन्कालेऽग्न्याधानं सेष्टिकं समाप्तं भवति तस्मात्कालादारभ्य द्वादशरात्रमजस्रा अग्नयो भवन्ति यं अधिगता श्रीः । तस्य सर्वकालमजस्रा अग्नयो भवन्ति । गतश्रीर्नाम प्राप्तश्रीरित्यर्थः । इत्यग्न्याधेयं समाप्तम् ॥

अथाग्निहोत्रमुच्यते । अग्न्युत्सर्गे कृते नित्यधृतगार्हपत्यं यजमानः प्राक् प्रणयनात्संप्रेष्यत्युद्धराहवनीयमिति स्वयं होमित्वे न संप्रैषो भवति । अथ गार्हपत्यं प्रज्वाल्य दक्षिणाग्निमानयन्ति । वैश्यकुलाद् यस्मात्कस्माच्चिद्वित्तवतो वा दक्षिणाग्निमानयेत् । एकयोनय इत्यन्ये मन्यन्ते । अस्मिन्पक्षे गार्हपत्यादेव दक्षिणाग्नेरुद्धरणं कार्यम् । अथ वा नित्यधृतस्य दक्षिणाग्नेः प्रज्वलनं कार्यम् । अथ वा अरणिमन्थनं कार्यम् । यथोक्तेन विधानेन यत एव दक्षिणाग्नेराहरणमाधाने प्रारब्धं तत एव कर्तव्यमाद्यन्ताद् । एवं प्रकारेण दक्षिणाग्निप्रणयनं कृत्वा गार्हपत्यादाहवनीयं ज्वलन्तमादाय पात्रान्तरे कृत्वा अथ "देवन्त्वादेवेभ्य" इति मन्त्रेण पात्रस्थमाहवनीयमुद्यमेद् । अथ " उद्ध्रियमाण उद्धरपाप्मन" इति मन्त्रेणाहवनीयायतने निदधाति सायम् । यथा सायं तथा प्रातरपि गार्हपत्यं प्रज्वाल्येत्यादि सर्वं कार्यम् । विशेषस्तूच्यते । व्युष्टायां प्रज्वलनादि भवति तमाहवनीयमुखे कृत्वा निदध्यादायतनं प्रणयनमन्त्रेण । "अन्हायदेन" इत्यस्य स्थाने "रात्र्यायदेन" इति कृत्वा प्रणयेद् । " अमृताहुतिमि" ति मन्त्रेण आहवनीये निदध्याद् । अतः कालादूर्ध्वमजस्रधृताग्निरपि आहिताग्निर्व्रतचारी भवत्याहोमात् । अनुदितहोमी च आ उदयाद् व्रतचारी भवति । अत्र व्रतशब्देन यथासंभवं चातुर्मास्यव्रतानि सत्रिधर्माश्च यथासंभवं गृह्यन्ते । अथाग्निहोत्रद्रव्याहरणं करोति । ततोऽस्तमित आदित्ये होमः कार्यः । होतृवत्कर्माङ्गमाचमनं कृत्वा तीर्थेन प्रपद्य एकैकमग्निं सोदकेन पाणिना त्रिः परिसमूहति तूष्णीम् । अथ "ऋतसत्याभ्या" मिति मन्त्रं जपित्वा पर्युक्षेद् । त्रिस्त्रिरेकैकमग्निं पुनः पुनरुदकमादाय । त्रिरेव च मन्त्र अग्निनामानन्तर्ये विकल्पो भवति । अथ वा दक्षिणमेवाग्निं प्रथमं पर्युक्षेद् । न विकल्पेन कुर्या-

त्। एवं ह्यर्थवादे श्रूयते। "अग्नीनां दक्षिणः पिता गार्हपत्यः पुत्रः पौत्र आहवनीयः" तस्मादनेन क्रमेण पर्युक्षेत्। परिसमूहनेपि एष एव वेदितव्यो विधिः। अथ गार्हपत्यादविच्छिन्नामुदकधारां हरेत् "तन्तुन्तन्वन् जस" इत्यृचा आहवनीयात्। अयमाकारो मर्यादायां नाभिविधौ। अथ पश्चाद्गार्हपत्यस्योपविश्य अकृत्वा निरसनोपवेशने अथ गार्हपत्या उदगङ्गारानपोहेत्। "सुहुतश्च-कृतस्थे" ति मन्त्रेण। अथ तेष्वङ्गारेष्वपोहितेषु अग्निहोत्रार्थं द्रव्य-मधि श्रयेत "अधिश्रितमि"ति मन्त्रेण। "इडायास्पद"मिति वा मन्त्रेण। दधि चेदग्निहोत्रार्थं तन्नाधिश्रयेत्। तदप्यधिश्रयेदित्येके मन्यंते। पयसा नित्यहोमः। नित्यश्चासौ होमश्च नित्यहोमः। पयसा कर्त्तव्यः। तण्डुलादिनाग्निहोत्रहोमो वा। अथाऽकामस्या-ग्निहोत्रहोमः पयसा तण्डुलादिना कर्तव्य इत्यर्थः। अथ काम्य-द्रव्याणि। यवागुरोदनो दधिसर्पिः एतानि द्रव्याणि ग्रामका-मान्नाद्यकामेन्द्रियकामतेजस्कामानामाहिताग्नीनां यथासंख्येन भ-वन्ति। यवाग्वोदनयोः क्व चित्सिद्धयोरुपादानमिच्छान्ति के चि-दत्रैव श्रयणम्। अधिश्रितं यदग्निहोत्रद्रव्यं तदवज्वलयेत्। अ-नधिश्रयं दध्यवज्वलयेत्। "अग्निष्टेतेज" इति मन्त्रेण यदव-ज्वलितं तत्स्रुवेण प्रतिषिञ्चेत् "शान्तिरसि" मन्त्रेण। न वा प्रतिषिच्यात्। तयोः प्रतिषेचनाप्रतिषेचनयोर्व्यवस्था कार्या। एतदुक्तं भवति। यदा प्रतिषेक आदौ न कृतस्तदा प्रतिषेको न कदा चिदपि भवति। यदा तु प्रतिषेक आदौ कृतस्तदा प्रतिषे-को भवति। अथ येन तृणेनाग्निहोत्रमवज्वलयितव्यं तेन तृणेन पुनर्ज्वलता तत्परिहरेत् त्रि"रन्तरितंरक्ष" इति मन्त्रेण द्विस्तू-ष्णीम्। अथाग्निहोत्रद्रव्यं तापनसमुद्गता अन्ता यस्य तथाभूतं कर्ष "निवदिवे" त्यादिभिस्त्रिभिर्मन्त्रैस्त्रीनिधानानि कुर्वन्नुदगु-

ह्रासयेत्। "सुहुतकृतस्थसुहुतमकार्ष्ट" ति मन्त्रेण। अपोहितानंगारान् इतराङ्गारमध्ये निक्षिपेत्। अथ स्रुक्स्रुवं प्रतपेत्। "प्रत्युष्ट" मित्यादिना। उत्तरतः स्थाल्याः स्रुचमासाद्य "ॐ मुन्नयानी" ति मन्त्रेणातिसर्जयीताहिताग्नि क्षीरहोता। एतदन्तं कर्म क्षीरहोता करोति। अथाहिताग्निस्तु अतिसर्जनवाक्यात् प्रागेव प्रयतोप्याचम्य अपरेण वेदिमतिव्रज्य दक्षिणतस्तूष्णीमुपविशेदित्येके। विहारस्य दक्षिणत आहवनीयस्य समीपे उपविशेदित्यन्ये। अथातिसर्जनवाक्यं श्रुत्वा "ओमुन्नये" त्यतिसृजेदाहिताग्निः। उभयत्रापि प्रणवस्त्रिमात्रः। प्रवसिते यजमाने क्षीरहोतारमन्योतिसृजेत्। अन्यस्याभावे क्षीरहोतैवात्मानमतिसृजेत्। अन्यत्राजमानं प्रवसितो यजमान एव करोति। स्वयं होमेन यजमान एवातिसर्जनं प्रत्यतिसर्जनं करोति। एवमतिसृष्टः क्षीरहोता "भूरिडे" त्यादिचतुर्भिर्मन्त्रैश्चतुरः स्रुवान्पूरयित्वा स्थाल्या गृहीत्वा स्रुचि प्रक्षिपति। यो यजमानः पुत्राणामनुज्येष्ठमिच्छेत् तस्य क्षीरहोता अग्र्यं स्रुवं पूर्णतममुन्नयेत्। अथ वास्य यजमानस्य यः प्रियः पुत्रो भवति तमेव प्रति पूर्णं स्रुवमुन्नयेत्। बहुपुत्रस्य यजमानस्य चतुर्थादुपरि प्रिये पुत्रे सति पञ्चमं स्रुवं तूष्णीमुन्नयेदित्येके। सूत्रे पुनरुन्नयनग्रहणात्। अत एव केचित्पञ्चमं स्रुवं तूष्णीं सर्वेषामिच्छन्ति। पञ्चावत्तिनामपरे यदुचितं तद्ग्राह्यम्। अथाग्निहोत्रस्थालीमभिमृश्य समिधं स्रुचं गृहीत्वा गार्हपत्यस्योपरि हृत्वा प्राणसम्मितं कृत्वाहवनीयसमीपं नीत्वा तस्य पश्चात्पूर्वमेव स्थापितेषु प्रागग्रेषु कुशेषु उपसाद्य जान्वाच्य समिधमादध्यात्। आहवनीये "रजतांत्वे" ति यजमानेनाग्नय इदन्नममेति। समिदाधानवन्निपातितजानुरेवोदकं स्पृशेत् "विद्युदसि" तिमन्त्रेण। अथ प्रदीप्तां समिधं द्व्यंगुलमात्रे देशेभिजुहुयात् जा-

न्वारब्ध "भूर्भुवःस्वरोमि"ति मन्त्रेण । अस्याः पूर्वाहुतिरिति संज्ञा । यजमानः "अग्नयेज्योतिषइदं नममे" ति त्यजेत् । एतां हुत्वा कुशेषु स्रुचं सादयति निपतितजानुरेव । अथ तथाभूत एव गार्हपत्यमवेक्षते । "पशून्मेयच्छे" ति मन्त्रेण । अन्ये तु गार्हपत्यं गत्वा तस्य पश्चात् प्राङ्मुखो भूत्वा तमवेक्षेतेति मन्यन्ते । अथ जान्वाच्योत्तरासंज्ञकामाहुतिं जुहुयात् अमन्त्रकाम् । पूर्वस्याः आहुतेर्भूयसीं तया चासंसृष्टां पूर्वाहुतेः प्रागुदग्देशे उत्तरतो वा । अस्यामाहुत्यां हूयमानायां प्रजापतिशब्दं चतुर्थ्यंतं ध्यायेत् । स्वाहाकारस्य केचिद्ध्यानमिच्छन्ति । केचिदुपांशुप्रयोगम् । "प्रजापतये इदं न ममे" ति त्यागः । अग्निहोत्रहोमादन्यत्रापि तूष्णीं होमेषु चोद्यमानेषु एष एव विधिः प्रत्येतव्यः । अथ उत्तरस्या आहुतेर्भूमिष्ठं स्रुच्यवस्थाप्य तदाहवनीयस्योपरि त्रिरनुप्रकम्प्य कुशेषु स्रुचं निधाय पुष्करलेपमग्रमारभ्य बिलमानीय हस्तलेपं कुशमूलेषु निमार्ष्टि "पशुभ्यस्त्वे"ति मन्त्रेण । अथ दक्षिणत अंगुली उत्तानाः करोति कुशानां दक्षिणतो न कुशमूलानाम् । अथ प्राचीनावीती भूत्वा अंगुलीरंगुष्ठं चान्तरेण तूष्णीं "स्वधापितृभ्य" इति वा मन्त्रेण अपोऽवनीय " वृष्टिरसी " तिमन्त्रेणोपस्पृश्य स्वीयमनन्तरं कर्म कुर्यात् । अथ याजमानमुच्यते । तत्र क्षीरहोता समिधमाधीयमानामाहिताग्निरनुमन्त्रयते समिदाधानमन्त्रेण । अस्वाहाकारेण तेन ऋषिणेत्यनेन च । "ता अस्यस्तुददोहुस" इत्यृचा पूर्वाहुतिमनुमन्त्रयेत हूयमानाम् । उत्तराहुतिमुत्थायानुमन्त्रयते "भूर्भुवःस्व" रिति मन्त्रेण । अथ वाहुतिमीक्षमाण एव मन्त्रोक्तानि फलान्याकाङ्क्षेत । "उपत्वाग्नेदिवेदिव" इति तिसृभिः आग्नेयीभिश्च प्रत्यहमुत्तराहुतिमनुमन्त्रयते । "अग्नआयूंषिपवस" इति तिसृभिः संवत्सरे संवत्सरेनुमन्त्रयते । तदाह च । "उपत्वाग्नेदिवेदिव" इ-

स्वासां निवृत्तिरित्येके । अन्ये त्वाग्नेयीभिरग्नेरनुमन्त्रणमिच्छन्ति ना-हुतेः । इति याजमानम् ॥ स्वयं होमित्वे तु विशेष उच्यते । तत्र स-मिदाधानानन्तरं समिदनुमन्त्रणमित्येके । पूर्वाहुतेः अनुमन्त्रणं कुशेषु सादनादूर्ध्वं कार्यम् । केचित्तु समित्पूर्वाहुत्योरनुमन्त्रणं गार्हपत्या-वेक्षणादूर्ध्वमिच्छन्ति । उत्तराहुत्यनुमन्त्रणं स्रुग्घस्त एवोत्थाय भ-वति । इति स्वयं होमित्वे विशेषः । अन्यत्र क्षीरहोत्रा व्याख्यातं वेदितव्यम् ॥

अथाग्निहोत्रं यवाग्वा पयसा वा स्वयं पर्वणि जुहुयात् न द्र-व्यान्तरेण । तथा स्वयमेव । पर्वणोन्यत्र काले ऋत्विजां मध्ये कश्चिदेको जुहुयात् । शिष्यो वा जुहुयात् । अथ क्षीरहोतुः प्र-योगः ॥ यदुक्तं "वृष्टिरसिवृश्चमेपाप्मानमसुश्रद्धे"त्यप उपस्पृश्येति । तदनन्तरमुदगावृत्य भक्षयेत् हुतशेषं यद्यपरयोर्होमः । होमे त्व-परयोरग्न्योर्हुत्वा भक्षयेत् । "आयुषेत्वे" ति प्रथमं भक्षयेत् "अ-न्नाद्यायत्वे" ति उत्तरं भक्षयेत् । यथा प्रथमभक्षे मन्त्रान्ते प्राश्ना-मीति तथोत्तरेपि वेदितव्यः । अथापरयोर्होमः । प्रत्यगुदगुपविश्य जान्वाच्येत्यादिभिराहवनीयसमिद्धर्मैरुपेतो गार्हपत्ये समिधमादध्या-त्तूष्णीम् । अथ तथाभूत एव स्थाल्याः स्रुवेणादाय "अग्नेगृहप-तये स्वाहे" ति मन्त्रेण प्रदीप्तां द्व्यंगुलमात्रेभिजुहुयात् । उत्तराहु-तिराहवनीयवद्वेदितव्या । इति गार्हपत्ये दक्षिणाग्नौ समिदाधाने गार्हपत्यवद्वेदितव्यम् । "अग्नयेसंवेशपतयेस्वाहे"ति दक्षिणाग्नौ पूर्वाहुतिः । "अग्नयेन्नादायान्नपतयेस्वाहे"ति वा । उत्तरा तु नित्या वेदितव्या । आहवनीयहुतशेषं विहाराद्बहिर्यथोक्तकाले भक्षयित्वा विहारं प्रविश्याभ्यात्ममपः स्रुचा निनयते "सर्पदेवजनेभ्यः स्वाहे" ति मन्त्रेण । त्रिवारं मन्त्रः क्रिया च । अथैनां कुशैः प्रक्षा-ल्य चतस्रः पूर्णाः स्रुचोऽपराजितायां निषिञ्चति "ऋतुभ्यः

स्वाहे" त्यादिभिश्चतुर्भिर्मन्त्रैः। पञ्चमीं स्रुचं कुशदेशे पूर्णां निनयति "पृथिव्याममृतमिष्टे"ति मन्त्रेण। षष्ठीं स्रुचं तूदकपूर्णामेव पश्चाद्गार्हपत्यस्य निनयेत् "प्राणममृते" ति मन्त्रेण। अथ गार्हपत्ये स्रुचं प्रतापयेदित्येके। आहवनीय इत्यपरे। अथान्तर्वेद्याः स्रुचं स्थापयति। परिचारकाय वा प्रयच्छेत्। अथ समिधो गृहीत्वाग्रेणाहवनीयं गत्वा तस्य तस्याग्नेर्दक्षिणत उदङ्मुखस्तिष्ठन्नेकैकस्मिन्नग्नौ तिस्रः तिस्रः समिध आदध्यात्। सर्वत्रापि प्रथमं समन्त्रं द्वितीयतृतीये तु सर्वत्रापि तूष्णीमादध्यात्। केचिदाहवनीये समिध आधायोत्तरेणाहवनीयमपरेण गार्हपत्यं गत्वा गार्हपत्यदक्षिणाग्न्योः समिदाधानमिच्छन्ति। अपरे तु दक्षिणेन दक्षिणाग्निं गार्हपत्यदक्षिणाग्न्योः समिदाधानमिच्छन्ति। अत्र यदुचितं तद्ग्राह्यम्। आहवनीये प्रथमसमिदाधाने मन्त्रः "दिदिही" ति। गार्हपत्ये " दीदाये " ति। दक्षिणाग्नौ " दीदिदाये " ति। एतेषु मन्त्रेषु केचित्स्वाहाकारमन्ते कुर्वन्ति। " ऋतसत्याभ्यांत्वे " ति पर्युक्षणमुक्तं तदत्रापि कर्तव्यम्। ताभ्यां पर्युक्षणाभ्यां परिसमूहने व्याख्याते। पर्युक्षणयोः पूर्वं भवतः। ततश्चायं पर्युक्षणधर्मः त्रिस्त्रिरेकैकं पुनः पुनरुदकमादायेति। तत्र क्रमः। तथा मन्त्रः। एते सर्वे परिसमूहनेपि भवन्ति। सर्वेषामतिदेशात्। तत्र मन्त्रलिङ्गत्वा "ऋतसत्याभ्यां त्वापरिसमूहामी"त्यूहितव्यमित्येके। अन्ये तु मन्त्रं नेच्छन्ति विलिङ्गात्। ऊहस्य चानभिप्रेतत्वात् यत्र हि सूत्रकारस्य समानप्रकारेषु शब्दान्तरमभिप्रेतं भवति तत्र दर्शयति राध्यायदेनइति तु प्रणयेदिति। तथा च एवमुत्तरा अक्रातामक्रतेति यथार्थमिति। अत्र चैवमदर्शितत्वान्न मन्त्रविकारोत्राभिप्रेत इति ज्ञायते तस्मान्न मन्त्र इति॥ इति सायंहोमः॥ एवमेव प्रातर्होमेपि सर्वं भवति। विशेषस्तूच्यते। उदयसमीपे अपहृते

तमसि उदिते वा आदित्ये सर्वोयं विधिर्भवति । प्रातः पर्युक्षणे " सत्यऋताभ्यांत्वापर्युक्षामी " ति मन्त्रः कार्यः । "ओमुन्नेष्यामी " त्यतिसर्जनमन्त्रो भवति । " हरिणींत्वासूर्यज्योतिषमहरिष्टकामुपदधेस्वाहे " ति समिदाधानम् । " भूर्भुवःस्वरोंसूर्योज्योतिर्ज्योतिः सूर्यः स्वाहे " ति मन्त्रेण होमः कार्यः । न तु सायंहोमवत्तथाभूतेनात्र पुष्करमार्जनम् । किं तु विपरीतङ्कार्यम् । इत्यग्निहोत्रहोमः ॥

प्रवत्स्यन्नाहिताग्निः शुचिर्भूत्वा अग्निहोत्रवत्तूष्णीं विहृत्य प्रज्वाल्य विहाराद्बहिः कर्माङ्गाचमनं कृत्वा तीर्थेन विहारं प्रविश्य तं तमग्निमतिक्रम्य तस्य तस्य पश्चात्प्राङ्मुखः स्थित्वा तं तमुपतिष्ठति । तत्र " शंस्यपशून्मेपाहि " इति मन्त्रेणाहवनीयमुपतिष्ठेत । अथ दक्षिणात्तदेव गत्वा गार्हपत्यमुपतिष्ठते " नर्यप्रजांमेपाही " ति मन्त्रेण । अथ दक्षिणाग्निमुपतिष्ठते " अथर्वपितुंमेपाही " ति मन्त्रेण । अथ तत्रस्थ एव गार्हपत्याहवनीयौ पश्येत् । "इमान्मेमित्रावरुणावि " ति मन्त्रेण । अथ गार्हपत्यदक्षिणाग्न्युपस्थानार्थं यथा आगतस्तथाहवनीयोपस्थानदेशपर्यन्तं प्रत्यागत्याहवनीयस्य प्रदक्षिणं कुर्वन् तमेवोपतिष्ठेत । " ममनामे " ति मन्त्रेणेत्येके । अन्ये तु यथेतं प्रत्येत्य विहारस्य प्रदक्षिणं कुर्वन् आहवनीयमुपतिष्ठेत इति वदति । अथाग्नीन् रक्षमाणः प्रव्रजेत् " माप्रगामे " ति षट्कं सूक्तं जपन् । अत्र सूत्रे सूक्तग्रहणमप्रतिरथसूक्तवद्व्याख्येयम् । सूक्तं समाप्य दूरादग्निभ्यो वाचं विसृजेत् । अस्मात्प्राक्सर्वत्र वाग्यमः कार्यः । "सदासुगः पितुमाँअस्तुपन्था" इत्यनया ऋचा पन्थानमवरोहति । एवमग्निमुपस्थायैव प्रवसितव्यं नान्यथा । यदि बलानुपस्थिताग्निः प्रवासमापद्यते तत " इहैवसन्नि " ति मन्त्रेण अग्निमुपतिष्ठते । प्रतिदिशं कल्प-

यित्वा । एतदुक्तं भवति । प्राच्यां दिश्याहवनीयं कल्पयेत् । प्रतीच्यां गार्हपत्यम् । दक्षिणस्यां दक्षिणाग्निम् । तेनैव मानेन पूर्ववत्कर्माङ्गाचमनं कृत्वा तीर्थेन प्रपद्य तं तमग्निमतिक्रम्य तस्य पश्चात्प्राङ्मुखः स्थित्वा तन्तमग्निमेकैकमुपतिष्ठते " इहैवसन्नि" ति मन्त्रेण न युगपत्सर्वान् । मन्त्रस्यैकप्रकाशत्वात् । अथ पूर्वोक्तेन विधानेन प्रव्रजेत् । अथ उभयत्रापि प्रवसितोपि याजमानं कुर्यात् । तत्राप्यात्मसंस्कारान्यथा कुर्यात् यथा व्रतचर्यादीन् धर्मान् तथानुमन्त्रणादींश्च । तत्र कार्यपरिसमाप्तौ शुचिर्भूत्वा " अपिपन्थामगन्महीं " त्येतया ऋचा प्रत्यागच्छति । अग्नेर्गृहसमीपं प्राप्यैव एतामृचं जपति । आगच्छगतां वा सेवाशान्त्यर्थमियमृग्भवतीति देवस्वामिनः । अथ गृहसमीपे शुचिर्भूत्वा समित्पाणिर्वाग्यतोग्नीन् ज्वलतः श्रुत्वा आहवनीयसमीपमागत्याहवनीयमीक्षेत " विश्वदीनी " ति मन्त्रेण । अथ याः समिधो गृहीतास्तासामेकैकामेकैकस्याग्नेः समीपे निदधाति । अथ प्रत्यगुदगाहवनीयादवस्थाय तमेवोपतिष्ठते " ममनामतवचे " त्यनेन । ततो या उपनिहिताः समिधस्ता अग्निष्वभ्यादध्यात् । तत्र "अगन्मविश्ववेदस " मित्याहवनीये समिधमादध्यात् । " अयमग्निर्गृहपतिः " इति मन्त्रेण गार्हपत्ये " अयमग्निः पुरीष्य " इति मन्त्रेण दक्षिणाग्नौ । अथ तत्रस्थ एव गार्हपत्याहवनीयावीक्षेत " इमान्मेमित्रावरुणावि" ति मन्त्रेण । अथ यथेतं प्रत्येत्य परिसमूहति प्राक् दशरात्रात् ॥

अथ नैमित्तिकम् । यदि तु ऊर्ध्वं दशरात्रात्प्रवासादागच्छति तदाज्यं संस्कृत्य प्रत्यगुदगाहवनीयादुपविश्य जान्वाच्य चतुर्गृहीतमाज्यं स्रुचा जुहुयात् " मनोज्योति"रिति मन्त्रेण । एकामेव । एके त्वाचार्या यावत्यो होमाहुतयः स्युस्तावत्य आ-

तमसि उदिते वा आदित्ये सर्वोयं विधिर्भवति । प्रातः पर्युक्षणे "सत्यऋताभ्यांत्वापर्युक्षामी" ति मन्त्रः कार्यः । "ओमुन्नेष्यामी" त्यतिसर्जनमन्त्रो भवति । "हरिणींत्वासूर्यज्योतिषमहरिष्टकामुपदधेस्वाहे" ति समिदाधानम् । "भूर्भुवःस्वरोंसूर्योज्योतिर्ज्योतिः सूर्यः स्वाहे" ति मन्त्रेण होमः कार्यः । न तु सायंहोमवत्तथाभूतेनात्र पुष्करमार्जनम् । किं तु विपरीतङ्कार्यम् । इत्यग्निहोत्रहोमः ॥

प्रवत्स्यन्नाहिताग्निः शुचिर्भूत्वा अग्निहोत्रवत्तूष्णीं विहृत्य प्रज्वाल्य विहाराद्बहिः कर्माङ्गाचमनं कृत्वा तीर्थेन विहारं प्रविश्य तं तमग्निमतिक्रम्य तस्य तस्य पश्चात्प्राङ्मुखः स्थित्वा तं तमुपतिष्ठति । तत्र "शंस्यपशून्मेपाहि" इति मन्त्रेणाहवनीयमुपतिष्ठेत । अथ दक्षिणात्त्देव गत्वा गार्हपत्यमुपतिष्ठते "नर्यप्रजांमेपाही" ति मन्त्रेण । अथ दक्षिणाग्निमुपतिष्ठते "अथर्वपितुंमेपाही" ति मन्त्रेण । अथ तत्रस्थ एव गार्हपत्याहवनीयौ पश्येत् । "इमान्मेमित्रावरुणावि" ति मन्त्रेण । अथ गार्हपत्यदक्षिणाग्न्युपस्थानार्थं यथा आगतस्तथाहवनीयोपस्थानदेशपर्यन्तं प्रत्यागत्याहवनीयस्य प्रदाक्षिणं कुर्वन् तमेवोपतिष्ठेत । "ममनामे" ति मन्त्रेणेत्येके । अन्ये तु यथेतं प्रत्येत्य विहारस्य प्रदक्षिणं कुर्वन् आहवनीयमुपतिष्ठत इति वदति । अथाग्नीन् रक्षमाणः प्रव्रजेत् "माप्रगामे" ति षट्कं सूक्तं जपन् । अत्र सूत्रे सूक्तग्रहणमप्रतिरथसूक्तवद्व्याख्येयम् । सूक्तं समाप्य दूरादग्निभ्यो वाचं विसृजेत् । अस्मात्प्राक्सर्वत्र वाग्यमः कार्यः । "सदासुगः पितुमांअस्तुपन्था" इत्यनया ऋचा पन्थानमवरोहति । एवमग्निमुपस्थायैव प्रवसितव्यं नान्यथा । यदि बलानुपस्थिताग्निः प्रवासमापद्यते तत "इहैवसन्नि" ति मन्त्रेण अग्निमुपतिष्ठते । प्रतिदिशं कल्प-

यित्वा। एतदुक्तं भवति। प्राच्यां दिश्याहवनीयं कल्पयेत्। प्रतीच्यां गार्हपत्यम्। दक्षिणस्यां दक्षिणाग्निम्। तेनैव मानेन पूर्ववत्कर्माङ्गाचमनं कृत्वा तीर्थेन प्रपद्य तं तमग्निमतिक्रम्य तस्य पश्चात्प्राङ्मुखः स्थित्वा तन्तमग्निमेकैकमुपतिष्ठते "इहैवसन्नि" ति मन्त्रेण न युगपत्सर्वान्। मन्त्रस्यैकप्रकाशत्वात्। अथ पूर्वोक्तेन विधानेन प्रव्रजेत्। अथ उभयत्रापि प्रवसितोपि याजमानं कुर्यात्। तत्राप्यात्मसंस्कारान्यथा कुर्यात् यथा व्रतचर्यादीन् धर्मान् तथानुमन्त्रणादींश्च। तत्र कार्यपरिसमाप्तौ शुचिर्भूत्वा "अपिपन्थामगन्मही" त्येतया ऋचा प्रत्यागच्छति। अग्नेर्गृहसमीपं प्राप्यैव एतामृचं जपति। आगच्छगतां वा सेवाशान्त्यर्थमियमृग्भवतीति देवस्वामिनः। अथ गृहसमीपे शुचिर्भूत्वा समित्पाणिर्वाग्यतोग्नीन् ज्वलतः श्रुत्वा आहवनीयसमीपमागत्याहवनीयमीक्षेत "विश्वदीनी" ति मन्त्रेण। अथ याः समिधो गृहीतास्तासामेकैकामेकैकस्याग्नेः समीपे निदधाति। अथ प्रत्यगुदगाहवनीयादवस्थाय तमेवोपतिष्ठते "ममनामतवचे" त्यनेन। ततो या उपनिहिताः समिधस्ता अग्निष्वभ्यादध्यात्। तत्र "अगन्मविश्ववेदस" मित्याहवनीये समिधमादध्यात्। "अयमग्निर्गृहपतिः" इति मन्त्रेण गार्हपत्ये "अयमग्निः पुरीष्य" इति मन्त्रेण दक्षिणाग्नौ। अथ तत्रस्थ एव गार्हपत्याहवनीयावीक्षेत "इमान्मेमित्रावरुणावि" ति मन्त्रेण। अथ यथेतं प्रत्येत्य परिसमूहति प्राक् दशरात्रात्॥

अथ नैमित्तिकम्। यदि तु ऊर्ध्वं दशरात्रात्प्रवासादागच्छति तदाज्यं संस्कृत्य प्रत्यगुदगाहवनीयादुपविश्य जान्वाच्य चतुर्गृहीतमाज्यं स्रुचा जुहुयात् "मनोज्योति"रिति मन्त्रेण। एकामेव। एके त्वाचार्या यावत्यो होमाहुतयः स्युस्तावत्य आ-

हुतयः कर्तव्या इति वदन्ति । तामेतामाहुतिमतीतहोमसंपत्त्यर्थं केचिन्मन्यन्ते । तेषां पक्षे होमो न कर्तव्यः । अन्ये तु कालातिपत्तिदोषनिर्घातार्थमाहुतिं मन्यन्ते । तेषां पक्षे होमोपि कर्तव्य एव । एवं दर्शपूर्णमासात्ययेपि पाथिकृतीं कृत्वा अतीतानि कर्माणि कुर्यादित्येके । नेत्यपरे । अथ प्रयोगः । दशरात्रादधिकप्रवासे आहुतिं हुत्वा परिसमूहति आहवनीयगार्हपत्यदक्षिणाग्नीन् । अथ विहारादुदक् प्राङ्मुखस्तूष्णीमुपविश्य "भूर्भुवः स्व" रितिवाचं विसृजेत् । अथ गृहान्पश्येत् । "गृहामाबिभीत" इतिमन्त्रेण । अनाहिताग्नेरप्येष विधिः समानो वेदितव्यः । अथ गृहान्प्रविशेत् "गृहानहंसुमनस"इति मन्त्रेण । अथ गृहानीक्षमाणः "शिवंशग्म" मिति त्रिर्जपेत् । अस्मिन्नहनि गृहमागता मनुष्या आहिताग्निना यदवगतं यच्चानवगतमप्रियं तदुभयाविधमपि न ज्ञापयेयुः । अनुपस्थिताग्नेरपि । "अपि पन्थामगन्मही"त्यादि समानम् । अथ पक्षान्तरमुच्यते । प्रवसन्प्रत्येत्य च "अभयंवोभय" इति मन्त्रेण सर्वानग्नीनुपतिष्ठते । नान्यथेति प्रवसन्ब्राह्मणः श्रूयते । अत्र के चिदस्मिन्नपि पक्षे प्रथमपक्षोक्तं सर्वमपि भवतीति उपस्थानमात्रं निवर्तते इति वदन्ति । अन्ये तु एतस्मिन्पक्षे नान्यद्भवतीति । अस्मिन्पक्षे प्रयोगः कर्तव्यः । प्रवत्स्यन् शुचिर्भूत्वाग्नीन्प्रज्वाल्याचम्य तीर्थेन विहारं प्रविश्य गार्हपत्यस्य पश्चादवस्थाय सर्वानग्नीन्युगपदुपतिष्ठते । अथ प्रव्रजेदनपेक्षमाण इति प्रथमकल्पेन समानम् । अनुपस्थिताग्नेरपि प्रतिदिशमग्नीन्कल्पयित्वानेन विधिनोपस्थाय प्रथमकल्पवद्व्रजेत् । अथ कार्यसमाप्तौ शुचिर्भूत्वा "अपिपन्थामगन्मही"ति मन्त्रेणागत्याचम्याग्नीन् ज्वलतः श्रुत्वा विहारं तीर्थेन प्रविश्य प्रत्यग्गार्हपत्यादवस्थाय सर्वानग्नीनुपतिष्ठते "अभयं व"इति मन्त्रेण । अथ विहा-

रादुदगुपविश्येत्यादि प्रथमकल्पेन समानम्। इत्यनुपस्थिताग्नेरपि समानमेव सर्वम्। अहरहर्वाग्निहोत्रहोमोपस्थानसमये सायं प्रातः "अभयंव" इतिमन्त्रेणोपस्थानं कुर्यात्। अनाहिताग्नेस्तु प्रवासविधिं गृह्ये वक्ष्यामः॥ इति प्रवासोपस्थानविधिः।

अथ पिण्डपितृयज्ञः॥ अमावास्यायामपराह्णे पिण्डपितृयज्ञः कार्यः। यदा तूभयोरह्नोरमावस्या भवति तदा तु यदहश्चन्द्रमा न दृश्यते तदहरपराह्णे पिण्डपितृयज्ञः कार्यः। तत्र शुचिर्भूत्वा विहारं प्रविश्य दक्षिणाग्नेरेकोल्मुकं प्राग्दक्षिणस्यां दिशि प्रणयेत् "ये रूपाणी" ति मन्त्रेण। एतदुक्तं भवति। क्व चित्काष्ठे अनेकमुल्मुकं भवति क्व चिदेकं तत्र यदेकं तत्प्रणयेत् नान्यदिति। येषां कर्मणामत्र दिशो नादिष्टास्तानि सर्वाणि प्राग्दक्षिणां दिशं कृत्वा कर्त्तव्यानि। यथा मध्यात्प्राग्दक्षिणार्धाच्चावदानम्। येषां वा दिगादेशः कृतस्तानि यथादिशमेव भवन्ति। यथा दक्षिणाग्नेः प्रागुददिति। अथातिप्रणीतस्याग्नेरुपसमाधानं कुर्यादित्येके। दक्षिणाग्नेरित्यन्ये उभयोरित्यपरे। अथातिप्रणीतदक्षिणाग्नि परिस्तीर्य दक्षिणाग्नेः प्रागुदक्प्रत्यगुदग्वैकैकशः पात्राणि सादयेत्। चरुस्थाली शूर्पस्फ्योलूखलमुसलस्रुवध्रुवकृष्णाजिनसकृदाच्छिन्नेध्मेक्षणकमण्डलूनित्येतेन। अत्र चरुस्थालिशूर्पं गृहीत्वा दक्षिणतोऽग्निष्ठं शकटमुच्यते तदारुह्य तत्र शूर्पे चरुस्थालीं कृत्वा सशिखा यथा भवति तथा व्रीहीन् पूरयेत्। अथ तां शिखां छिन्द्यात्। शूर्पे पतितान् व्रीहीन् अग्निष्ठे निदध्यात्। अथ कृष्णाजिने उलूखलमुसले कृत्वा स्थाल्यां ये व्रीहयः तानवहन्यात्। व्रीहितण्डुलान्विविच्य एवं यावत्सर्वे तण्डुला भवन्ति। तानवहतान्सकृत्प्रक्षाल्य दक्षिणाग्नौ श्रपयेत्। ततो दक्षिणाग्नेरारभ्य अर्वागतिप्रणीतात् स्फ्येन लेखामुल्लिखेत् "अपहताअसुरा" इतिमन्त्रेण।

ततस्तां लेखामभ्युक्ष्य सकृदाच्छिन्नैर्दर्भैरवस्तृणाति। अथाज्यं सर्पिरनुत्पूतं नवनीतं वा तूष्णीमुत्पूतं भवति । ततस्तदाज्यं ध्रुवायां कृत्वा दक्षिणाग्नेर्दक्षिणतः स्थापयेत् । आञ्जनाभ्यञ्जनकशिपूपबर्हणानि च । अथाज्येनाभिघार्य स्थालीपाकं प्राग्दक्षिणत उद्वास्य लेखायामासादयेत् । यद्यपि सूत्रे स्थालीपाकासादनं पूर्वमेव पठितं तथाप्येतावत्कृत्वासादयेदिति सूत्रं योज्यम् । अथ प्राचीनावीती भूत्वा दक्षिणाग्नौ तूष्णीमिध्मं प्रक्षिपेत् । अथ मेक्षणेनादायावदानसंपदा जुहुयात् । एतत्तदुक्तं भवति । स्रुवेण मेक्षणमभिघार्य मेक्षणेन स्थालीपाकाद्धविरवदाय स्रुवेण प्रत्यभिघार्य हविरनक्तं च दक्षिणाग्नेः प्रत्यगुदगुपविश्य जुहुयात् "सोमायपितृमत" इति मन्त्रेण। द्वितीयामप्याहुतिमेवं जुहुयात् । "अग्नयेकव्यवाहनाये" ति मन्त्रेण । आहुतिद्वयमपि स्वाहाकारेण जुहुयात् । तदाग्निं पूर्वं सोमं तु पश्चाज्जुहुयात् । यज्ञोपवीती च । स्वाहाकारपक्षे विप्रतिपत्तिः। केचित्सोमायपितृमते स्वधानमः स्वाहेत्यधिकं स्वाहाकारमिच्छन्ति । एव "मग्नयेकव्यवाहनाये" त्यत्रापि । अन्ये तु स्वधानम इत्यस्य स्थाने स्वाहाकारमिच्छन्ति । तेषां पक्षे " सोमायपितृमते स्वाहा अग्नयेकव्यवाहनाये" त्येवमेव । अथ यथाभूतेन होमः कृतस्तथाभूतेनैव मेक्षणमनुप्रहृत्य प्राचीनावीती भूत्वा लेखां त्रिरुदकेनोपसिञ्चेत् । "शुन्धन्तांपितर" इति त्रिभिर्मन्त्रैः । यत्र यत्र लेखोपरि उदकं निक्षिप्तं तत्र तत्र पिण्डं दद्यात् । पराङ्मुखेन पाणिना पितृतीर्थेन पितामहाय प्रपितामहाय चेति " एतत्त" इति मन्त्रेण । अत्र मन्त्रे असावितिपदस्थाने प्रथमया आमन्त्रणविभक्त्या तस्य नाम गृह्णीयात् । अथाचार्यमतान्युच्यन्ते । गाणगारिमतम् । तेषां पितृपितामहप्रपितामहानां ये प्रेताः स्युः तस्मै तस्मै पिण्डान्निपृणीयात् । ये तु जीवन्ति तान्प्रत्यक्षम-

र्चयेत्। अस्याः क्रियायाः पित्राद्यर्थत्वात्। तौल्वलिमतम्। यद्यपि जीवान्तर्हितास्तथापि पितृभ्यः प्रेतेभ्य एव दद्यात्। न जीवतामर्चनं कार्यम्। क्रियां प्रति पित्रादीनां गुणत्वात्। गुणत्वं च नानाजातिगतानां पिण्डभोक्तृत्वायोग्यत्वात्। अथ गौतममतम्। पितृपितामहप्रपितामहानां मध्ये यो जीवति तस्यापि पिण्डदानं कार्यमेव। क्रियाया ह्यर्थकारित्वात्। अथास्माभिर्जीविमृतानामुपायविशेषः कथ्यते। यदुक्तं परेभ्यो दद्यादिति। न तावदत्र कर्त्तव्यमनधिकारात्। यदुक्तं प्रत्यक्षमर्चयेदिति तदपि न कर्तव्यम्। अनधिकारादेव। यदुक्तं जीवान्तर्हितेभ्यो निपृणीयादिति तदपि न। अनधिकारादेव। एतानि पक्षे दूषणानि यथासंभवं वेदितव्यानि। किं तर्ह्यनुष्ठेयं भवति, ये पित्रादीनां षण्णां मध्ये जीवा भवन्ति तेषां पिण्डान् जुहुयात्। न तेभ्यो निपृणीयात्। यस्य तु सर्वे जीवा भवन्ति तस्य सर्वहुतं भवति। अथ सर्वसम्मतः प्रयोगः। यदि पितृणां नामानि न जानीयात् तथा सति पिण्डदानमन्त्रे नामस्थाने ततः पितामहप्रपितामहेत्येतान् शब्दान्कुर्यात्। अथ निपृतात्पिण्डाननुमन्त्रयेत न हुतान् "अत्रपितर" इति मन्त्रेण। सव्यावृदुदङ्मुखोऽनुच्छ्वसन्नास्ते यावच्छक्नोति। अथ पिण्डान्प्रतिपर्यावर्तते "अमीमदन्ते" ति मन्त्रेण। अथ चरोः प्राणभक्षं भक्षयेत्। अथ यदुक्तं निनयनं प्राचीनावीती लेखां त्रिरुदकेनोपनयेदित्यादि, तदत्र पिण्डेषु कर्तव्यम्। अथ पिण्डेष्वभ्यञ्जनं तैलेन करोति। "असावङ्क्ष्वे" ति मन्त्रेण। असावित्यस्य स्थाने पिण्डदानवन्नामपदं वेदितव्यम्। अथ पिण्डानञ्जनेनाञ्जयेत् "असावङ्क्ष्वे"ति मन्त्रेण। असाविति मन्त्रपदं पूर्ववद्व्याख्येयम्। अथ पिण्डेषु वासार्थे दशां दद्यात् ऊर्णासूत्रं वा। पञ्चाशद्भ्यो वर्षेभ्य ऊर्ध्वं यो यजमानः स्यात्स वासार्थे स्वलोम दद्यात् " एतद्वः पितर" इति मन्त्रेण। द-

शादिष्वपि मन्त्रः। अत्र केचिदभ्यञ्जनाञ्जनवत्प्रतिपिण्डेष्वभेदेन वासोदानमिच्छन्ति मन्त्रावृत्तिं च। अन्ये तु पिण्डत्रयेपि सकृदेव मन्त्रं मन्यन्ते। अथोत्थाय सर्वान्पिण्डानुपतिष्ठते "नमोवः पितर" इति मन्त्रेण। "मनोन्वाहुवामह" इति च तिसृभि ऋग्भिः। पिण्डेष्वेव च भक्तिः कार्या। उपस्थाय पिण्डान्प्रगमयेत् "परेतने" तिमन्त्रेण। अथ दक्षिणाग्नेःपिण्डदेशाद्दक्षिणाग्निं प्रत्यागच्छेत्। "अग्नेतमद्याश्वन्नस्तोमै" रित्यृचा ततो गार्हपत्यं प्रत्येयात् "यदंतरिक्षे" इतिमन्त्रेण। अथ "वीरंमेदत्तपितर" इतिमन्त्रेण पिण्डानां मध्यममाददीतेति सूत्रे क्रियापदमध्याहर्तव्यम्। अथ पत्नीं प्राशयेत्। अथ पत्नी प्राश्नाति तथा ब्रूयादित्यर्थः। "आधत्तपितर" इतिमन्त्रेण मध्यमं पिण्डं प्राश्नीयात्। इतरावप्सु क्षिपेत्। अथ वातिप्रणीतेग्नौ। अथ वा यजमानस्य अभिनवान्नकाम्याभावे स तौ पिण्डौ प्राश्नीयात् महारोगेण वाभितप्तः प्राश्नीयात्। मरणजीवनयोरन्यतरां गतिं गच्छेत्॥

अथानाहिताग्नेः पिण्डपितृयज्ञ उच्यते॥ यथाहिताग्निर्दक्षिणाग्नौ करोति एवमेवाऽनाहिताग्निर्गृह्याग्नौ कुर्यात्। अयन्तु विशेषः। स्थालीपाकं श्रपयित्वातिप्रणयनं कुर्यात्। ततो जुहुयादिति वेदार्थक्रमे विशेषः। तथा "अग्नेतमद्याश्वन्नस्तौमैः, यदन्तरिक्ष" इतिमन्त्राभ्यां गृह्याग्निं प्रत्यागच्छेत्। "यदन्तरिक्ष" इतिमन्त्रे गार्हपत्यशब्दलोपः कार्य इति विशेषः। अन्यदाहिताग्निवत्। अथाहितानाहिताग्न्योः समानं द्वाभ्यां द्वे द्वे पात्रे उत्सृजति। अतिरिक्ते कमण्डलौ तृणं द्वितीयं गृहीत्वा उत्सर्गो भवति। इति पिण्डपितृयज्ञः॥

अथाऽन्वारम्भणीयेष्टिः॥ अथ प्रकृताग्न्याधानस्यानन्तरायां पौर्णमास्यां दर्शपूर्णमाणारम्भः। तत्र दर्शपूर्णमासारम्भेष्टिर्भवति।

तस्याः प्रयोग उच्यते। तस्यामग्नाविष्णू सरस्वती सरस्वानग्नि-भगी इति चतस्रो देवताः। आवाहने आज्यभागावावाह्य "अ-ग्नाविष्णू ३ आवह सरस्वन्तम् आवह अग्निभगिनम् आ-वह देवांआज्यपामि"त्यादि पञ्चमे प्रयाजे। "ये ३ स्वाहाग्निंस्वाहा सोमंस्वाहा अग्नाविष्णूस्वाहा सरस्वतीस्वाहा सरस्वन्तंस्वाहा अ-ग्निभगिनंस्वाहा देवा" इत्यादि। वार्त्रघ्नावाज्यभागौ। प्रधान-स्य। "अग्नाविष्णूसजोषसे" ति द्वे कल्पजे अग्नाविष्ण्वोः। "पावकानः सरस्वतीपावीरवी" ति सरस्वत्याः "पीपिवांसं-सरस्वतोदिव्यंसुपर्णवायस" मिति सरस्वतः। "आसवंसवितु-र्यथासनोराधांस्याभरे" त्यग्नेर्भगिनः। प्रकृतिवत्संयाज्ये। "ये ३ ग्निस्विष्टकृतमयाडग्निरग्नेः प्रियाधामान्ययाट्सोमस्य० डग्नावि-ष्ण्वोः प्रि० सरस्वत्याः प्रि० सरस्वतः प्रि० अग्नेर्भगिनः प्रि० देवानामि" त्यादि सूक्तवाके। "अग्निरिदं० सोमइदं० अग्ना-विष्णूइदं० जुषेतामवीवृधेतांमहो० क्रातांसरस्वतीइ० सरस्वान्इ० अग्निर्भगीइदं० देवाआज्यपा" इत्यादि। पौर्णमासवदन्यत्सर्वं संस्थाजपान्तम्॥ इत्यन्वारम्भणीयेष्टिः॥

आधानानन्तरं तस्मिन्नेव संवत्सरे महान्व्याधिः पुत्रादिहा-निर्भवेत्तदा उत्सर्गेष्ट्याऽग्नीनुत्सृज्य पुनराधानं कुर्यात्। अथ उ-त्सर्गेष्टिराचार्येणानुक्तापि पूर्वकारिकानुसारेणोच्यते। तस्याग्निः, अग्निर्वैश्वानरः, वरुणः, अग्निरंशुमान्, मित्रः इति पञ्चदेवताः। आवाहने आज्यभागावावाह्य "अग्निमावह अग्निं वैश्वानरमावह वरुणमावह अग्निमंशुमन्तमावह देवांआज्यपामि" त्यादि। पञ्चमे प्रयाजे "ये ३ स्वाहाग्निंस्वाहा सोमंस्वाहाग्निंवैश्वानरंस्वाहा वरुणंस्वाहाग्निमंशुमन्तंस्वाहा मित्रंस्वाहा देवाआज्यपा" इत्यादि। वार्त्रघ्नावाज्यभागौ। प्रधानस्य "अग्निमूर्धाभुवोयज्ञस्ये" त्य-

ग्नेः । "वैश्वानरोअजीजनत्पृष्टोदिवी " ति अग्नेर्वैश्वानरस्य । "अ-वतेहेड उदुत्तममि " ति वरुणस्य । " अप्स्वग्नेसधिष्ठवयदग्नेदि-विजाअसी " त्यग्नेरंशुमतः । " मयोदध " इति वा याज्या । "अभियोमहिनादिवंप्रसमित्रमर्तो अस्तु प्रयस्वानि " ति मित्रस्य । प्रकृतिवत्संयाज्ये । " ये ३ ग्निंस्विष्टकृतमयाडग्निरग्नेः प्रियाधा-मान्ययाट्सोमस्य प्रियाधामा० अग्नेः प्रि० अग्निर्वैश्वानरस्य प्रि० वरुणस्य प्रि० अग्नेरंशुमतः प्रि० मित्रस्य प्रि० देवानामि " त्यादि सूक्तवाके " अग्निरिदं० सोमइदं० अग्निरिदं० अग्निर्वै-श्वानरइदं० वरुणइदं० अग्निरंशुमानिदं० मित्रइदं० देवाआज्यपा" इत्यादि पौर्णमासवत्संस्थाजपान्तम् । उत्सर्गेष्ट्या देवताद्वित्वमपि के चित् अग्निः, अग्निर्वैश्वानरश्चेति ॥ इति उत्सर्गेष्टिः ॥

अथ पुनराधेयेष्टिः ॥ तस्यां बुद्धिमदिन्दुमद्गुणविशिष्टाव-ग्नी आज्यभागदेवते । गुणयोरावाहनादौ व्यपदेशः कार्यः । बु-द्धिमदिन्दुमन्तावित्याचक्षते । तथानुद्रुतिरित्यवेति वचनात् । अ-ग्निः अग्निरग्निः पवमान आज्यभागौ । आवाहने " अग्निंबुद्धि-मन्तमावह अग्निमिन्दुमन्तमावह अग्निमावह देवां " इत्यादि । इत्यनुब्राह्मणपक्षे । " अग्निमग्नआवह अग्निं पवमानमावह अ-ग्निमावह देवां " इत्यादि । इत्यनुब्राह्मणपक्षे । प्रयाजेषु विभ-क्तिप्रयोगः " समिधः समिधोग्नेग्नआज्यस्यव्यन्तुवौ० तनूनपाद-ग्निमग्नआज्यस्यवेतुवौ इ० नराशंसोअग्नआज्यस्यवेतु इडोअ-ग्निनाग्नआज्यस्यव्यन्तु बर्हिरग्निरग्नआज्यस्यवेतु ये ३ स्वाहा-ग्निंबुद्धिमन्तंस्वाहा अग्निमिन्दुमन्तंस्वाहा अग्निस्वाहादेवा " इ-त्यादि अनुब्राह्मणपक्षे " स्वाहाग्निस्वाहाग्निपवमानंस्वाहाग्नि-स्वाहादेवा " इत्यादि । " समिधाग्निंदुवस्यतेहूपुब्रवाणित " इ-त्याज्यभागयोः पुरोनुवाक्ये " ये ३ यजामहेग्निंबुद्धिमन्तञ्जु-

षाणो अग्निराज्यस्यवेतुवौ० ये ३ महेग्निमिन्दुमन्तञ्जुषाणो अ-ग्निरिन्दुमानाज्यस्यहविषोवेतू ३ वौ"। अनुब्राह्मणपक्षे प्रथमाज्यभागस्य पौर्णमासवद्याज्यानुवाक्ये। द्वितीयस्य "अग्नआयूंषिपवस" इत्यनुवाक्या। ये ३ यजामहेग्निपवमानंजुषाणो अग्निः पवमानाज्यस्यहविषोवेतुवौ ३"। प्रधानस्य "अधाह्यग्नेक्रतोर्भद्रस्याभिष्टेअद्यगीर्भिर्गृणन्त" इत्यृचावग्नेर्याज्यानुवाक्ये। अथ स्विष्टकृतः "एभिर्नोअर्कैरि" त्यनुवाक्या। आगूर्य "अग्निस्विष्टकृतमयाडग्निरग्नेर्बुद्धिमतःप्रियाधामान्ययाट् अग्नेरिन्दुमतः प्रिया० अग्नेः प्रि० देवानामि" त्यादि "जुषतांहविरग्नेतमद्ये" ति याज्या। अनुब्राह्मणपक्षे "अग्निस्विष्टकृतमयाडग्निरग्नेः प्रिया० अग्नेः पवमानस्यप्रि० देवानामि" त्यादि० "जुषतांहविरग्नेतमद्ये" ति याज्या। अनुयाजेपि विभक्तिप्रयोगः "देवंबर्हिरग्नेर्वसुवनेवसुधेयस्यवेतु देवोनराशंसोग्नौवसुवनेवसुधेयस्यवेतु" तृतीयास्तु प्राकृत एव। सूक्तवाके। "अग्निर्बुद्धिमानिदंहविः अग्निरिन्दुमानिदंहविः अग्निरिदं० देवा" इत्यादि। अनुब्राह्मणपक्षे "अग्निरिदंहविः अग्निः पवमानइदंहविः अग्निरिदंहविः देवआज्यपा" इत्यादि। अन्यत्सर्वं संस्थाजपान्तं पौर्णमासवत्। प्रागुत्तमादनुयाजात्सर्वमप्युपांशुस्वरेण सुमन्द्रस्वरेण वा प्रयोक्तव्यम्। प्रधानं तूपांश्वेव। सर्वोपांशुत्वे आवहादीनां मन्द्रस्वरः। मन्द्राण्युपांशुतन्त्राणीति वचनात्। सुमन्द्रपक्षे तन्त्रस्वरो भवति। पुनराधेये द्वितीया अपि वारुणीष्टिरापस्तम्बेनोक्ता, नाश्वलायनेन। तस्यामग्नीवरुणौ देवता। "त्वंनोअग्ने, सत्वन्नोअग्ने" इति याज्यानुवाक्ये द्वे। अन्यत्सर्वं पौर्णमासवत्संस्थाजपान्तम्॥ इति पुनराधेयेष्टिः॥

अथाग्रयणेष्टिः॥ आग्रयणं व्रीहिश्यामाकयवानाम्। प्रत्येकमा-

हुतयः पृथक् पृथक् भवन्ति । एकमेव च समानतन्त्रं वा । तस्याः प्रयोग उच्यते । सामिधेनीषु "पृथुयाजा अमर्त्य" इति द्वे धाय्ये। आवाहने आज्यभागावावाह्य अनन्तरम् "अग्निमावह इद्राग्नी आवहविश्वान्देवानावह सोममावह द्यावापृथिवी आवह"इति चतस्रो देवताः । अस्यामिष्टौ आद्यं हविरुच्चैः । इतराण्युपांशु । पञ्चमे प्रयाजे "स्वाहाग्निस्वाहा सोमंस्वाहाग्निस्वाहेन्द्राग्नीस्वाहा विश्वान्देवान्स्वाहा द्यावापृथिवी स्वाहा देवा" इत्यादि । "स्वाहाग्नेन्द्रौ स्वाहे"ति वा वार्त्रघ्नावाज्यभागौ । वृधन्वन्तौ वा । प्रधानस्य "अग्निर्मूर्द्धाभुवोयज्ञस्ये" त्यग्नेः । "ऐन्द्राग्नी अवसागतङ्गीर्भिर्विप्रः प्रमतिमिच्छमान"इति इद्राग्न्योः । अग्नीन्द्रपक्षे तु "आग्राये अग्निंमिन्धतेसुकर्माणः सुरुचोदेवयन्त" इत्यग्नीन्द्रयोर्याज्यानुवाक्ये । "विश्वेदेवास आगतयेकेचज्मामहिनो अतिमाया"इति विश्वेषां देवानाम् । "सोमयास्तेमयोभूवोयातेधामानिदिवियापृथिव्यामि"ति सोमस्य । "महीद्यौः पृथिवीचनः प्रपूर्वजेपितरानव्यसीभिरि"ति द्यावापृथिव्योः । विराजौ संयाज्ये " प्रेद्धो अग्ने, इमोअग्न " इत्येते । " अग्निस्विष्टकृतमयाडग्नि० सोमस्य० अग्ने० इद्राग्न्योः अग्नेन्द्रयोर्वा विश्वेषां देवानां प्रि० सोमस्य० द्यावापृथिव्योः प्रि० देवाना"मित्यादि । अथ ब्रह्मणः प्राशित्रभक्षणे विशेषो भवति । ब्रह्मा प्राशित्रं गृहीत्वा दक्षिणेन पाणिना सव्ये पाणौ कृत्वा इतरेणाभिमृशेत् । " प्रजापतयेत्वे "ति मन्त्रेण । ततो निष्क्रम्य उपविश्य प्राङ्मुखो भूत्वा नित्यप्राशित्रं जपित्वा " भद्रान्त" इत्यनेन प्राश्नाति । अवान्तरेडायां यो विहितो भक्षजपो मन्त्रश्च एवं ग्रहणे निर्दिष्टमाचार्येण स तस्य जपस्य अवान्तरेडायाः प्राप्तत्वात् । प्राशनस्थानं स्पर्शविधानात्प्राप्नोति । न तस्योदनप्राशने वचनम् । इतरथा ह्येतेन भक्षिणो भक्षान् । नित्यनिर्देशात् । अ-

न्यस्यापि। देवस्वामिनः सर्वेण वाभिमृशेत् “प्रजापतयेत्वे” ति मन्त्रेण। नैष्टिति पाठः। नियवचनं किमर्थं माभूदुपदेश इत्युपदेशः। इत्युपदेश इत्यनेन भक्षिणो भक्षानि प्राश्येति वा वचनात्। “सत्येनत्वे”त्यनेन पूर्ववदाचम्य ततो नाभ्यालम्भनं कुर्यात् “अमामसी”ति मन्त्रेण। इति ब्रह्मणो विशेषः। होतुरवान्तरेडाभक्षणे विशेषः। “इडेभाग” मिति जपित्वावान्तरेडां सव्ये पाणौ कृत्वा दक्षिणेन हस्तेनाभिमृशेत् “प्रजापतयेत्वे”ति मन्त्रेण। “भद्रान्तः” इति प्राश्य आचम्य नाभिदेशं दक्षिणेन पाणिनाभिमृशेत् “अमामसी” ति मन्त्रेण। ततः सूक्तवाके। “अग्निरिदं हविः सोम इदं० इदाग्नी० षेतां० क्रातां०”। पक्षे देवताद्वन्द्वे चेति सूत्रेण आनङ् भवति। “अग्नेद्रौ० षे० धे० क्रातां विश्वेदेवा इदं० षन्तां० धेत० क्रत० सोम इदं० द्यावापृथिवी इदं०, षेता० घेता० क्रातां देवा आज्यपा” इत्यादि। पौर्णमासवत्संस्थाजपान्तं सर्वम्॥ इत्याग्रयणेष्टिः॥

नैमित्तिकी यज्ञविभ्रेष्टिरुक्ता आपस्तम्बेन॥ तस्यामाग्निरिन्द्रः सोमो देवता। आज्यभागावावाह्य अनन्तरम् “अग्निमावह इन्द्रमावह सोममावह देवांआज्यपामि” त्यादि। पञ्चमे प्रयाजे। “स्वाहाग्निंस्वाहा सोमंस्वाहाग्निंस्वाहेन्द्रंस्वाहा सोमंस्वाहा देवा” इत्यादि। वार्त्रघ्नावाज्यभागौ “अग्निर्मूर्द्धाभुवोयज्ञस्ये”त्यग्नेः। “ऐन्द्रं सानसिंरयिंप्रसत्साहिष” इतीन्द्रस्य। “सोमयास्तेमयोभुवोयातेधामनि” इति सोमस्य। प्रकृतिवत्संयाज्ये। “अग्निंस्विष्टकृतमयाडग्निरग्नेः प्रिया० सोमस्य प्रि० अग्नेः प्रि० इन्द्रस्य प्रि० सोमस्य प्रि० देवानामाज्यपा”मित्यादि। सूक्तवाके। “अग्निरिदं० सोम इदं० अग्निरिदं० इन्द्र इदं० सोम इदं० देवा आज्यपा” इत्यादि। पौर्णमासवत्संस्थाजपान्तम्॥ इत्यापस्तम्बोक्ता वि-

भ्रष्टेष्टिः ॥

अथ काम्येष्टयो वक्ष्यन्ते ॥ तत्रायुष्कामेष्टिः ॥ तस्याम् "आनो अग्नेषु चेतुनात्वं सोममहेभग"मिति जीवातुमतोराज्यभागयोरनुवाक्ये । नित्ये याज्ये । द्वे प्रधानदेवते । अग्निरायुष्मान्, इन्द्रस्त्राता । "आयुष्टेविश्वतो दधादि" ति द्वे कल्पजे याज्यानुवाक्ये अग्नेरायुष्मतः । "त्रातारमिन्द्रमवितारमिन्द्रंमाते अस्यां सहसावन्यरिष्टावि"तीन्द्रस्य त्रातुः । " पाहिनो अग्ने पायुभिरग्नेत्वं पारयानव्यो अस्मानि" ति स्विष्टकृतः संयाज्ये । पौर्णमासवदन्यत्सर्वं संस्थाजपान्तम् ॥ इति आयुष्कामेष्टिः ॥

अथ स्वस्तिगमनार्थं स्वस्त्ययनीष्टिः ॥ " अग्नेरक्षाणो अंहसस्त्वन्तः सोमविश्वतोरक्षाराजन्न" इति रक्षितवन्तावाज्यभागयोः पुरोनुवाक्ये । नित्ये याज्ये । " अग्निः स्वस्तिरिमान्देवता, स्वस्तिनोदिवो अग्ने पृथिव्या आरे अस्मदमतिमारे अंह " इति याज्यानुवाक्ये । "पाहिनो अग्नेपायुभिरग्नेत्वं पारयानव्यो अस्मानि" ति संयाज्ये । पौर्णमासवदन्यत्सर्वं संस्थाजपान्तम् ॥ इति स्वस्त्ययनेष्टिः ॥

अथ पुत्रकामेष्टिः ॥ अग्निः पुत्री देवता । वार्त्रघ्नावाज्यभागौ । "यस्मैत्वंसुकृतेजातवेदोयस्त्वाहृदाकीरिणामन्यमान" इत्यग्नेः पुत्रिणः । "अग्निस्तुविश्रवस्तममि"ति द्वे संयाज्ये । पौर्णमासवदन्यत् ॥ इति पुत्रकामेष्टिः ॥

अथाग्नेयीष्टिः॥ तस्यां धाय्ये विराजौ । अग्निर्मूर्द्धन्वान्देवता । वार्त्रघ्नौ । " अग्निर्मूर्द्धा भुवोयज्ञस्ये " त्यग्नेर्मूर्धन्वतः । समानं संस्थाजपान्तम् ॥ अथाऽपराऽऽग्नेयीष्टिः ॥ धाय्ये विराजौ । अग्निः कामो देवता । "तुभ्यन्ता अङ्गिरस्तमाश्यामतं काममग्नेतवोती"ति अग्नेः कामस्य । पौर्णमासवदन्यत् ॥

अथ वैमृधीष्टिः ॥ धाय्ये विराजौ । इन्द्रो वैमृधो देवता । "विनइन्द्रमृधोजहि मृगोनभीमः कुचरोगिरिष्ठा" इति याजानुवाक्ये । पौर्णमासवदन्यत् ॥ अपरावैमृधीष्टिः ॥ धाय्ये विराजौ । इन्द्रो वैमृधो देवता । "सद्युतिमिन्द्रे"ति द्वे कल्पजे याज्यानुवाक्ये । पौर्णमासवदन्यत् ॥

अथैन्द्रीष्टिः ॥ धाय्ये विराजौ । इन्द्रो दाता देवता इन्द्रः पुनर्दाता देवता । "यानिनोधनानी"ति द्वे कल्पजे उभयोरपि याज्यानुवाक्ये पौर्णमासवदन्यत् ॥

अथाशेष्टिः । धाय्ये विराजौ । आशा देवता आशापाला वा । "आशानामाशापालेभ्य" इति द्वे कल्पजे उभयोरपि याज्यानुवाक्ये । पौर्णमासवदन्यत् ॥

अथ लोकेष्टिः ॥ धाय्ये विराजौ । पृथिव्यन्तरिक्षं द्यौरिति तिस्रो देवताः । "पृथिवींमातरंमहीमि" ति तिस्रः कल्पजास्त्रयाणां याज्यानुवाक्याः । आद्ये तु पृथिव्यां:, द्वितीयतृतीये, अन्तरिक्षस्य तृतीयप्रथमे दिवः । पौर्णमासवदन्यत्सर्वम् ॥

अथ मित्रविन्देष्टिः ॥ महावैराजी तस्या एव संज्ञा । धाय्ये विराजौ । अग्निः सोमो वरुणो मित्र इन्द्रो बृहस्पतिः सविता पूषा सरस्वती त्वष्टेत्येकप्रदाना दश देवताः । आवाहनकाले द्वितीयाविभक्त्या पृथक् आदिश्य सकृदेवावहशब्दं कुर्यात् । सर्वा आदिश्य सकृदेकप्रदाना इति वचनात् । पञ्चमे प्रयाजे पुरस्तात्सकृदेव स्वाहाकारमुक्त्वा सर्वा देवता आदिश्य "स्वाहादेवाआज्यपा" इत्यादि । "अग्निः सोमोवरुण" इति विकल्पजा पुरोनुवाक्या । प्रतिलोममादिश्य "यजत्त्वष्टारं सरस्वतीं पूषणं सवितारं बृहस्पतिमिन्द्रं मित्रं वरुणं सोममग्निमि"त्यादिश्य "त्वष्टारूपाणी" त्यनया कल्पजया यजति । स्विष्टकृति षष्ठ्या वि-

भक्त्या सर्वाः पृथगादिश्य सकृदेव प्रियाधामान्ययाट्शब्दमुक्त्वा देवानामाज्यपानामित्यादि । सूक्तवाके । प्रथमया विभक्त्या सर्वाः पृथगादिश्य सकृदेव "इदंहविरजुषतामि" त्यादि एकवच्छब्देन ब्रूयात् । तथा चोक्तम् । तथोत्तरेषु निगमेष्वेकामिव संस्तुयात् । पौर्णमासवदन्यत् । आग्नेयादीनां मित्रविन्दान्तानामिष्टीनामनुक्तकामानां शास्त्रान्तरात् कामा अन्वेषणीयाः ॥

अथ स्नुषाश्वशुरीयेष्टिः । तयाभिचरन्यजेत । इन्द्रः सूरो देवता । "इन्द्रः सूरोअतरद्रजांसी" ति द्वे कल्पजे याज्यानुवाक्ये । "जुष्टोदमूनाअग्नेशर्द्धमहतेसौभगाये" ति संयाज्ये । पौर्णमासवदन्यत् ॥

विरुद्धानां सम्पत्तिकामः संज्ञानीष्ट्या यजेत ॥ अग्निर्वसुमान् सोमो रुद्रवान् इन्द्रो मरुत्वान् वरुण आदित्यवान् इत्येकप्रदानाश्चतस्रो देवताः । एकप्रदानप्रयुक्तविशेषा मित्रविन्दायामुक्ताः । "अग्निः प्रथमोवसुभिरि" ति द्वे कल्पजे याज्यानुवाक्ये पौर्णमासवदन्यत् ॥

विरोधकाम ऐन्द्रामारुत्या यजेत ॥ इन्द्रो मरुतश्च द्वे द्वे देवता । "ऐन्द्रसानसिंरयिंप्रससाहिष" इतीन्द्रस्य । "मरुतोयस्यहिक्षयेप्रशर्द्धायमारुतायस्वभानव" इति मरुताम् । तत्रैवं विशेषः । "एन्द्रसानसिमि" ति पुरोनुवाक्यामनूच्य "प्रशर्द्धाय मारुतायस्वभानव" इति यजति । "मरुतोयस्यहिक्षय" इति पुरोनुवाक्यामनूच्य "प्रसाहिष" इति यजति । ऐन्द्रीमनूच्य मारुत्या यजति मारुतीमनूच्यैन्द्र्या यजेति । इन्द्रपूर्वं निगमेषु आवाहनादिषु उत्तमे प्रयाजे च । प्रधानादूर्ध्वं स्विष्टकृदादिषु मरुतः प्रथमं पश्चादिन्द्रम् । पौर्णमासवदन्यत् ॥ अथेयमिष्टिः सम्पत्तिकामानां प्रकृत्या भवति ऐन्द्रीमनूच्यैन्द्र्या यजेत । मारुतीमनूच्य मा-

रुत्या यजेत । उक्ता याज्यानुवाक्याः । प्रकृत्यैव निगमनम् । अन्यत्पौर्णमासेन समानम् । संपत्तिकामः संज्ञानीं च कुर्यात् । सा च पूर्वमेवोक्ता ॥

अथ शत्रुभिरभिभूयमानः प्रधृष्यमाणः ऐन्द्या बार्हस्पत्या यजेत ॥ इन्द्राबृहस्पती देवता । "आन इन्द्राबृहस्पती अस्मे इन्द्राबृहस्पती" इति याज्यानुवाक्ये । केवलेन्द्रपक्षेप्येते एव । अन्यत्समानम् ॥

अथ वैश्वानरीयेष्टिः ॥ अग्निर्वैश्वानरो देवता । "वैश्वानरो अजीजनत्पृष्टोदिवी" ति याज्यानुवाक्ये । अन्यत्समानम् ॥

अथ व्रातपत्येष्टिः ॥ अग्निर्व्रतपतिर्देवता । "त्वमग्ने व्रतपा असि यद्धोवयं प्रमिनामव्रतानी" ति याज्यानुवाक्ये । अन्यत्समानम् ॥

अथ पवित्रेष्टिः ॥ तस्याम् "अपामिदन्ययनं नमस्तेहरसेशोचिष" इति द्वे कल्पजे धाय्ये "पृथुयाजा अमर्त्य" इत्येतयोः स्थाने। पावकवन्तावाज्यभागौ। आज्यभागावावाह्य प्रधानदेवता आवाहयति। अग्निं पवमानं सरस्वतीं प्रियामग्निं पावकं सवितारं सत्यप्रसवमग्निं शुचिं वायुं नियुत्वन्तमग्निं व्रतपतिं दधिक्रावाणमग्निं वैश्वानरं विष्णुं शिपिविष्टमिति दश । " अग्नीरक्षांसिसेधतियोधारयापावकये " त्याज्यभागयोः पुरोनुवाक्ये । "यत्तेपवित्रमर्चिषी" ति पूर्वस्याज्यभागस्य याज्या । "आकलशेषुधावती" त्युत्तरस्य याज्या । अथ प्रधानानाम् । "अग्नआयूंषिपवसेअग्नेपवस्वपा" इत्यग्नेः पवमानस्य । "उतनः प्रियाप्रियास्विमाजुह्वानायुष्मदानमोभि" रिति सरस्वत्याः प्रियायाः । "सनः पावकदीदिवोग्नेपावकरोचिषे" त्यग्नेः पावकस्य । "आविश्वदेवंसत्पतिनप्रमियेसवितुर्दैव्यस्यतादि" ति सवितुः सत्यप्रसवस्य । "अग्निः शुचिव्रतमउदग्नेशुचयस्तवे" त्यग्नेः शुचेः । "वायुरग्रोयज्ञप्रीर्वायोशुक्रोअयामित" इति वायोर्नियुत्वतः । "त्वमग्नेव्रतपाअसियद्धोवयंप्रमिनामव्रतानी" त्यग्नेर्व्रतपतेः ।

"दधिक्राव्णोअकारिषमादधिक्राः शवसापंचकृष्टीरि" ति दधिकाव्णः । "वैश्वानरोअजीजनत्पृष्ठोदिवी" त्यग्नेर्वैश्वानरस्य । "वषट्तेविष्णवासआकृणोमिमतत्तंअद्यशिपिविष्टनामे" ति विष्णोः शिपिविष्टस्य । "जुष्टोदमूनाअग्नेशर्द्धमहतेसौभगाये" ति संयाज्ये । पौर्णमासवदन्यत् ॥ एषा इष्टिराचार्येण चोक्ता इति केचित् । तेषां मते अध्वर्युवशादाग्नेयव्यतिरिक्तानां पञ्चानामेवोपांशुत्वं नाग्नेयानाम् । वैश्वानरी व्रातपती पवित्रेष्टिरिति तिस्र इष्टयः पापक्षयार्थाः । तदुक्तम् । वैश्वानरीं व्रातपतीं पवित्रेष्टिं तथैव च । ऋतावृतौ प्रयुञ्जानः पुनाति दशपौरुषमिति । तथा च दशपूर्वान्दशापरानित्यनेन सहैकविंशतिपङ्क्तिं पुनातीति बौधायनोक्तम् ॥

अथ वर्षकामेष्टिः कारीरी ॥ तस्यां "प्रतित्यंचारुमध्वरमीडे अग्निस्ववसन्नमोभिरि"ति धाय्ये पृथुयाजा अमर्त्य इत्येतयोः स्थाने । "अप्स्वग्नेसधिष्ठवप्सुमेसोमो अब्रवीदि" त्यप्सुमन्तावाज्यभागयोः पुरोनुवाक्ये । नित्ये याज्ये । अग्निर्धामच्छत् केवलोग्निर्वा मरुतः सूर्य इति तिस्रो देवताः । आवाहने आज्यभागावावाह्य "अग्निंधामच्छदं आ० मरुत आवह सूर्यं आ० देवां" इत्यादि । उत्तमे प्रयाजे"ये० स्वा० ग्नि० सो० स्वा० धामच्छदं स्वा० मरुतः स्वा० सूर्य स्वा० मरुतांप्रि० मरुतः स्वाहादेवा" इत्यादि । "ये० ग्निं स्विष्ट० रग्ने प्रि० दूसो० प्रि० डग्नेर्धामच्छदः प्रि० मरुतां सूर्यस्य प्रि० देवाना० जुषतां यत्वादेवापि०" सूक्तवाके "अ० सो० अग्निर्धामच्छद इदं० मरुत इदं० षन्तां सूर्य०" प्रधानाम् । " त्वंत्याचिदच्युताधामन्तेविश्वंभवनमि" ति अग्नेर्धामच्छदः । केवलाग्निपक्षे । " हिरण्यकेशो रजसोविसार" इति द्वे । "वाश्रेवविद्युन्मिमातिपर्वतश्चिन्महिवृद्धोविभाये"ति मरुताम् । "स्टजन्तिरश्मिमोजसावहिष्वेभिर्विहरन्यासी"ति सूर्यस्य । "अग्नेबा-

धस्त्वविमृधोयंत्वादेवापिरि"ति संयाज्ये। पौर्णमासवदन्यत्। प्रायश्चित्तहोमानन्तरम् "अच्छावद्वमि"ति चतसृभिः प्रत्यृचं चतस्रो दिश उपतिष्ठते। सूक्तेन सूक्तेन वेकैकं दिशमुपतिष्ठते। उपस्थाय संस्थाजपं कुर्यात्। तिस्रः पिण्ड्य उत्तराः पिण्डीद्रव्या मरुद्देवत्याः। इष्ट्यात्मको दर्विहोमात्मको वर्षकामस्य भवति। तत्र दर्विहोमपक्षे न होतुः प्रयोगः। इष्टिपक्षे तु। "उदीरयथा प्रवोमरुतः आयन्नरोविद्युन्महसः कृष्णं निपानं नियुत्वन्तोग्रामजित" इति त्रयाणां याज्यानुवाक्याः। अन्यत्सर्वं कारिरीवदेव॥

अथ सांवत्सरिकाणीष्ट्ययनान्युच्यन्ते॥ तेषां फाल्गुन्यां पौर्णमास्यां चैत्र्यां वा प्रयोगः। कामविशेषा अध्वर्युतो ज्ञातव्याः॥ तुरायणं नामेष्ट्ययनं सांवत्सरिकम्॥ अहरहरनुसवनं तिस्र इष्टयो भवन्ति। आग्नेयी प्रातः सवने, ऐन्द्री माध्यन्दिने, अपराह्णे वैश्वदेवी। अथ वा एकैव विहविका प्रातःसवन एव कर्तव्या। "अग्निर्मूर्द्धा भुवोयज्ञस्ये" त्यग्नेः। "ऐन्द्रसानसिंरयिंप्रससाहिष" इतीन्द्रस्य। "विश्वेदेवासआगतयेकेचज्यामहिन" इति विश्वेषां देवानाम्। पौर्णमासवदन्यत्॥ दाक्षायणो नामेष्ट्ययनम्॥ तस्मिन् द्वे पौर्णमास्यौ द्वे अमावास्ये यजेत। एतदुक्तं भवति। या पौर्णमासी या अमावास्या ते एव स्वकाले द्विरावर्तयितव्ये इति। आवृत्तयोः पूर्वे ये ते उक्ते एव न विकृत एव। अग्निरग्नीषोमौ पूर्वपौर्णमास्याम्। अग्निरिन्द्रश्चोत्तरस्यां पौर्णमास्याम्। याज्यानुवाक्याः प्राकृता एव। अग्निरिन्द्राग्नी पूर्वामावास्यायाम्॥ याज्यानुवाक्याः प्राकृता एव। उत्तरस्याममावास्यायां अग्निर्मित्रावरुणौ देवते। अग्नेः प्राकृत एव याज्यानुवाक्ये। "आनोमित्रावरुणायद्बहिष्ठं नातिविधेसुदान्" इति मित्रावरुणयोः॥ इडादधो नामेष्ट्ययनम्॥ तत्र प्रजापतिर्देवता। "प्रजापतेनत्वदेतान्यन्यस्तवे-

मालोकाः प्रदिशोदिशश्चे”ति याज्यानुवाक्ये । पौर्णमासवदन्यत् ॥ द्यावापृथिव्योरयनं नामेष्ट्ययनम् ॥ फाल्गुन्यां पौर्णमास्यामुपक्रम्य पौर्णमासेन अमावास्यापर्यन्तं यजेत् । अमावास्यामुपक्रम्य पौर्णमासीपर्यन्तमहरहरमावास्येन यजेत । तयोरुक्तः प्रयोगः । एवं व्यत्यस्य संवत्सरं यजति । अत्र दर्शपूर्णमासयोः पुनः क्रिया नास्ति ॥ इति द्यावापृथिव्योरयनम् ॥

अथास्मिन्सूत्रे असमाम्नातानामिष्टीनां शास्त्रान्तरे विहितानामनुक्तयाज्यानुवाक्यानां देवतालक्षणयाज्यानुवाक्येत्यादिलक्षणविशिष्टा याज्यानुवाक्या ग्राह्याः । तादृग्लक्षणप्रयुक्तानामनभिगमे याज्यानुवाक्याभ्यां याभ्यां काभ्यां चिदाग्नेयीभ्यां यजेत । व्याहृतिभिर्वा यजेत् । व्याहृतिपक्षे देवतामादिश्य प्रणुयाद्यजेच्च । यथा “अग्निर्भूर्भुवःस्वरो ३मि”त्यनुवाक्या । “ये ३ यजामहेऽग्निर्भूर्भुवःस्वरग्नी ३वौषडि”ति निदर्शनम् । नम्राभ्यां वा यजेत् । “इममाश्रुणुधीहवमि” ति द्वे कल्पजे याज्यानुवाक्ये एते द्वे नम्रे प्रयुज्येते । याः पुनः शाखान्तरे विहितास्तत्रैव याज्यानुवाक्यामृगारेष्टिप्रभृतयस्तासां तथैव प्रयोगः । अग्निमथनसंयुक्तानां तु वैराजतन्त्रं भवति । अग्निमन्थनेपि धाय्ये एव । केवलविराजाविति केचित् ॥

अथ चातुर्मास्यान्युच्यन्ते ॥ तेषां फाल्गुन्यां पौर्णमास्यां चैत्र्यां वा प्रारम्भः । प्रारभमाणः पूर्वेद्युरन्वारम्भणीयां वैश्वानरपर्जन्यामिष्टिं कुर्यात् । अग्निर्वैश्वानरपर्जन्य इति देवते । “ वैश्वानरोअजीजनत्पृष्टोदिवी ” त्यग्नेर्वैश्वानरस्य । “ पर्जन्यायप्रगायतप्रवांती ” ति पर्जन्यस्य । पौर्णमासवदन्यत् । अग्न्याधेयप्रभृत्येतदन्तानामिष्टीनां प्रधानहवींषि उपांशुस्वरेण । तत्रोत्सर्गेष्टिर्वैश्वानरी व्रातपती पवित्रेष्टिरित्येताश्चतस्रः सूत्रकारोक्ता न भवन्ति ।

ततस्तासामध्वर्युवशात्तन्त्रस्वर एव । चातुर्मास्येष्वपि वैश्वदेववरुणप्रघासमाहेन्द्रशुनासीराणां प्रधानहवींष्युपांश्वित्येके ॥

अथ प्रातर्वैश्वदेवीष्टिर्भवति ॥ तत्र प्रेषितो होता स्थानाचमने कृत्वा पश्चात्सामिधेनीस्थानस्य पदमात्रेऽवस्थाय प्रेषितोभिहिंकृत्य अग्निमन्थनीया अन्वाह । "अभित्वादेवसवितरि" त्येका । "महीद्यौः पृथिवीचन" इत्येका । "त्वामग्नेपुष्करादधी" ति तिसृणामर्द्धर्चे शिष्ठारमेत् । आप्रैषात् । यदि अग्निः शीघ्रं न जायेत तदा एतस्मिन्नेवावसाने "अग्नेहंसिन्पत्रिणी" ति नवर्चं सूक्तमावपेत पुनः पुनराजन्मनः । जातायेति संप्रेषितः अनन्तरप्रणवेन धनञ्जयंरणेरणेमुतब्रुवन्तुजन्तवइत्येतामुपसन्तनोति । "आयंहस्तेनखादिनमि" त्येका अस्या अर्द्धर्चे आरमेत् । प्रह्रीयमाणायेति प्रेषितः "विशामग्निस्वध्वरोंप्रदेवं देववीतय" इति द्वे "अग्निनाग्निरि" त्येका "तमर्जयन्तुसुक्रतुमि" त्येका "यज्ञेनयज्ञमयजन्तदेवा" इति परिदध्यात् । आद्योत्तमे त्रिः । अथ सामिधेनीस्थाने स्थित्वा सामिधेनीरन्वाह । "पृथुयाजाअमर्त्य" इति द्वे धाय्ये । आज्यभागावावाह्य अष्टौ प्रधानदेवता आवाहयति । "अग्निमावह सोममावह सवितारमावह सरस्वतीमावह पूषणमावह मरुतः स्वतवसआवह" केवलपक्षे "मरुतआवह विश्वान्देवानावह द्यावापृथिवीं आवह देवांआज्यपा" इत्यादि नव प्रयाजाः । प्रागुत्तमाच्चतुर आवपेत "दुरोंअग्ने, उषासानक्ता, दैव्याहोतारा, तिस्रोदेवी" उत्तमे प्रयाजे "येस्वाहाग्निंस्वाहा सोमंस्वाहाग्निंस्वाहा सोमंस्वाहाउ सवितारंस्वाहा सरस्वतींस्वाहा पूषणंस्वाहामरुतः स्ततवसः" मरुत्पक्षे "मरुतः स्वाहाविश्वान्देवान्स्वाहाउ द्यावापृथिवीस्वाहादेवा" इत्यादि । वार्त्रघ्नावाज्यभागौ । प्रधानस्य । "अग्निर्मूर्धाभुवोयज्ञस्य" इत्यग्नेः "सोम-

यास्तेमयोभुवोयातेधामानी" ति सोमस्य । " आविश्वदेवं वाममद्ये " ति सवितुः । "पावकानः सरस्वतीपावीरवीकन्याचित्रायुरि" ति सरस्वत्याः । "पूषन्तवव्रतेवयंशुक्रन्तेअन्यदि " ति पूष्णः । "इहेहवस्वतवसः प्रचित्रमर्कंगृणतेतुराये " ति मरुतां स्वतवसाम् । " मरुतोयस्यहिक्षयेराइवेदचरमाअहेवे " ति केवलमरुत्पक्षे । " विश्वेदेवासआगतयेकेचज्मा " इति विश्वेषां देवानाम् । " महीद्यौः पृथिवीचनः प्रपूर्वजेपितरानव्यसीभिरि " ति द्यावापृथिव्योः । विराजौ संयाज्ये । "प्रेद्धो अग्नइमो अग्न" इति । "ये ३ ग्निस्विष्टकृतमयाडग्निरग्नेः प्रि० सोमस्य प्रि० ऽग्नेः प्रि० सोमस्य प्रि० सवितुः उ प्रि० सरस्वत्याः प्रि० पूष्णः प्रि० मरुतां स्वतवसां प्रि"० केवलपक्षे "मरुतां प्रि० विश्वेषांदेवानां प्रि० द्यावापृथिव्योः उ प्रि० देवानामि " त्यादि । " जुषतांहविरिमोअग्न ". इति याज्या । नवानुयाजाः " देवंबर्हिः १, देवीर्द्वारः २, देवीउषासानक्ता ३, देवीजोष्ट्री ४, देवीऊर्जाहुती ५, देवीदैव्या ६, देवीस्तिस्रः७, देवोनाराशंसः ८, देवोअग्निः ९ " सूक्तवाके "अग्निरिदं० सोमइदं० अग्निरिदं० सोमइदं० सविताउ० इदं० सरस्वतीदं० पूष्णेदं० मरुतः स्वतवसइदं० ष धंक्रत" । केवलपक्षे "मरुत इदं० षं० क्रत, विश्वेदेवा इदं० षं० धं० क्रत, द्यावापृथिवी इदं० षेता० धेतां क्रातां देवा आज्यपा" इत्यादि । अनुयाजानां सूक्तवाकस्य शंयुवाकस्य वोपरिष्टाद्वाजिनयागः । "शंनोभवन्तुवाजिन" इत्यनुवाक्या । आदिश्य "वाजेवाज" इति ऊर्ध्वज्ञुरनवानं यजति । प्रकृत्यैव तिष्ठतोनुवषट्करोति । "अग्नेवीहीवौषट्" । "वाजिनस्याग्ने वीही" ति वा । वाजिनभक्षमिडामिव प्रतिगृह्य "अध्वर्यउपह्वयस्व, ब्रह्मन्नुपह्वयस्व, अग्नीनुपह्वयस्व, यजमानोपह्वयस्व, यन्मेरेत" इति मन्त्रेण प्राणभक्षं भक्षयेत् ।

ब्रह्मा च । यजमान एव प्रत्यक्षं भक्षयति । पौर्णमासवदन्यत् । पौर्णमासं कृत्वा चातुर्मास्यव्रतानि कुर्यात् । केशानि वर्तयेदित्यादि । आद्योत्तमयोर्वेत्यन्तम् ॥

अथ पञ्चम्यां पौर्णमास्यां वरुणप्रघासा भवन्ति ॥ तीर्थेन प्रविश्य पश्चाद्दर्शपौर्णमासिकाया वेदेर्निरसनोपवेशने कृत्वा प्रेषितोऽग्निप्रणयनीया अन्वाह । अभिहिंकृत्य । "प्रदेवं देव्याधिये"ति तिस्रः । आद्यां सप्रणवामुपांशु त्रिरन्वाह । तृतीयवचने प्रणवेनावसाय " अनुष्ठ्रस्य अग्निमनुव्रजन्नयमुष्मप्रदेवयुरि" त्याद्याः प्रतिपद्यते । "इडायास्त्वापदेवयमि"त्येका । "अग्नेविश्वेभिरि"त्येका ॥ अस्या अर्द्धर्च आरमेत् । निहितेऽग्नावप्रेषितः "कुलायनमि"त्यर्धर्चे "सीदहोतरि"त्येतामुपसन्तनुयात् । " निहोताहोतृषदन" इति द्वे । उत्तमया परिधानीयया परिधाय प्रक्रमस्थाने निरसनोपवेशने कृत्वा "भूर्भुवःस्वरि"ति वाचं विसृजेत ॥ अथ ब्रह्मा अग्निप्रणयने क्रियमाणे तदा वाग्यमनं दक्षिणतश्च व्रजन् जपति "आशुःशिशान"इति सूक्तं समाप्य दक्षिणतोऽग्नेर्निरसनोपवेशने कृत्वा ब्रह्मजपं जपति । इति ब्रह्मत्वम् ॥ अथ हविष्वासन्नेषु होता मन्त्रितस्थानाचमने कृत्वा तीर्थेन प्रविश्य अग्निमन्थनादिपूर्वकं वैश्वदेववत्कुर्यात् । विशेषस्तूच्यते । आवाहने पूषान्तं वैश्वदेववदावाह्य । "इन्द्राग्नी आवह, मरुत आवह, वरुणमा० कमावह, देवां आज्यपामि " त्यादि । स्रुगादापने विशेषः । " घृतवतीमध्वर्यूस्रुचमास्येथां देवयुवं विश्ववारा" इति । घृतवतीपदस्य स्रुचमिति पदस्य च न ऊहः । अनर्थत्वात् । अत्र नव प्रधानदेवताः । अग्निः, सोमः, सविता, सरस्वती, पूषा, इन्द्राग्नी, मरुतः, वरुणः, कः इति । तत्राद्यानां पञ्चानां याज्यानुवाक्या वैश्वदेव्यामुक्ता । "इन्द्राग्नीअवसागतंश्रथदूद्वत्रमि" तीन्द्राग्न्योः । "मरुतोयस्यहिक्षयेराइवेदचरमा"

इति मरुताम्। "इमम्मेवरुणतत्वायामी" ति वरुणस्य। "कयान-श्चित्रआभुवदूहिरण्यगर्भ" इति कस्य। वाजिनभक्ष उपवहयाचने प्रतिप्रस्थाता तृतीयो भवति। "वेदोसिवेदोविदीये" ति वेदद्वयं प-त्न्यै प्रदाय वाचयेत्। "वेदौस्थौवित्तीस्थैाविदेयकर्मणीस्थः क-रणेस्थः क्रियासंसनीस्थः सनितास्थः सनेयंघृतवन्तं कुलायिनंरा-यस्पोषं सहस्रिणं वेदौदत्तांवाजिनं यंबहवउ१जीवन्ति योजनानाम-सद्रशी तौविन्देय प्रजांविन्देय कामायवामि" ति। सर्वमन्यद्वैश्वदे-व्या समानम्। आहवनीयद्वित्वेपि यद्येकवचनेन संप्रेषः क्रियते तदा आहवनीयाभिधायिनामूहः कर्तव्यः। यदापुन"रग्निभ्यां प्रणीयमानाभ्यामग्निभ्यां समिध्यमानाभ्यामि"ति द्विवचनयुक्तप्रैषः क्रियते तदा ऋक्षु नोहः। अर्चे नोहेदित्युक्तत्वात्। निगदे तु आ-हवनीयाभिधायिनामूहः कर्तव्यः। स उच्यते। अग्ने महान्तौ स्थः ब्राह्मणभारतौ प्रवरोपि द्विवचनेनैव अभिधायकत्त्वात् वासिष्ठा मैत्रावरुणकौडिन्याविति। "देवेद्धौ मन्विद्धौ ऋषिष्टुतौ विप्रानु-मदितौ कविशस्तौ ब्रह्मसंशितौ घृताहवनौ प्रण्यौ यज्ञानां रथ्याव-ध्वराणां रथिनावि" ति केचित्। "अतूतौ होतारौतूर्णिर्हव्यवाहौ आस्यात्रेजुहौ देवानाचमसौ देवपानावरा इवाग्ने नेमिर्देवांस्युपां-परिभाकास्थ आवहतं देवान्यजमानाया अग्निमग्नआवहतमि "त्या-दि। "आवहतं जातवेदसौसुयजायजेतमयाडग्निरग्नेः प्रियाधामानि यक्षतामग्नेर्होतुः प्रियाधामानियक्षतां स्वंमहिमानमेज्याइषः कृणुतां सोअध्वराजातवेदसौ जुषेतां हविरि"त्यादि। एवं तु पदमप्यूहेत् ए-वमप्याहवनीयम्। संस्थितायामवभृथं व्रजन्ति। तत्रावभृथेष्टिः कृ-ताकृता उपरिष्टाद्वक्ष्यामः॥ समाप्तो वरुणप्रघासः॥ अथ द्वयोर्मा-सयोरैन्द्राग्नः॥ तस्य प्रयोगस्तृतीयाध्याये वक्ष्यते॥

अथ द्वयोर्मासयोः साकमेधाः॥ तत्र पूर्वेद्युस्तिस्र इष्टयः।

अनुसवनं पूर्वाह्णे अग्नये नीकवतेष्टिः । तत्रावाहने आज्यभागावावाह्य "अग्निमनीकवन्तमावह देवा आज्यपा" इत्यादि । वार्त्रघ्नावाज्यभागौ पञ्चमे "स्वाहाग्निं स्वाहा सोमं स्वाहाग्निमनीकवन्तं स्वाहा देवा" इत्यादि । "अनीकवन्तमूतय" इति कल्पजानुवाक्या । "सैनानीकेनसुविदत्र" इति याज्या । "प्रियाधामान्ययाडग्नेरनीकवतः प्रिया० अग्निरनीकवानिदंहविः" । पौर्णमासवदन्यत् ॥ मध्यन्दिने । मरुद्भ्यः सान्तपनेभ्य इष्टिः ॥ आवाहने आज्यभागावावाह्य "मरुतः सान्तपनानावह" । पञ्चमे प्रयाजे "स्वाहामरुतः सान्तपनान्स्वाहादेवा" इत्यादि । वृधन्वन्तावाज्यभागौ । "सान्तपनाइदंहविर्योनोमरुतोअभिदुर्हणायु" रिति प्रधानस्य याज्यानुवाक्या । "प्रियाधामान्ययाण्मरुतांसान्तपनानांप्रि० मरुतः सान्तपनाइदं० षं० धं० क्रत" । पौर्णमासवदन्यत् ॥ अपराह्णे मरुद्भ्यो गृहमेधेभ्य इष्टिः ॥ आज्यभागप्रभृतीडान्ते स्थानाचमने कृत्वा आज्यभागौ यजति । नात्र स्रुगादापनम् । के चित्स्रुगादापनं कुर्वन्ति । "आग्निनारयिमश्नवद्वयस्फानोअमीवहे" ति पुष्टिमन्तौ आज्यभागोः पुरोनुवाक्ये । निसे याज्ये । प्रधानस्य "गृहमेधासआगतप्रबुध्न्यावईरतेमहांसी" ति याज्यानुवाक्ये । विराजौ संयाज्ये । अनिगदोत्र भवति । अनिगद इति वचनात् । "ये ३ यजामहेग्निंस्विष्टकृतमिमो अग्नेवीततमे" ति याज्या । पौर्णमासवदन्यत् ॥ अथ यस्यां रात्र्यां गृहमेधीया संस्थिता तस्या उषःकाले पौर्णदर्वं भवति । तत्र यदि पूर्वकारिणो वषट्कारप्रदानं कुर्वन्तो होतारं चोदयेयुः तदा होता शुचिर्भूत्त्वा तीर्थेन प्रविश्य निरसनोपवेशने कृत्वा "पूर्णादर्वी" ति द्वे कल्पजे याज्यानुवाक्ये ब्रूयात् । याज्यायामिन्द्रं शतक्रतुमादिशेत् ॥ अथ क्रीडिनेष्टिः ॥ मरुतः क्रीडिनो देवताः । आवाहने आज्यभागावावाह्य "मरुतः क्रीडिनआवह स्वाहा

७

मरुतः क्रीडिनः स्वाहे" त्यादि । "उतब्रुवन्तुजन्तवोयंकृन्नुरग्घ-भीत" इति परोक्षवार्त्रघ्नयोराज्यभागयोः पुरोनुवाक्ये । नित्ये या-ज्ये । "क्रीडंवः शर्द्धोमारुतमत्यासोनयेमरुतः स्वंच" इति प्रधा-नस्य याज्यानुवाक्ये । "जुष्टोदमूनाअग्नेशर्द्धमहतेसौभगाये" ति-संयाज्ये । "प्रियाधामान्ययाण्मरुतांक्रीडिनांप्रियाधामे" त्या-दि० "जुषतांहाविरग्नेशर्द्धमहते" ति याज्या । "मरुतः क्रीडिन इदंहविः" । पौर्णमासवदन्यत् ॥ अथ माहेन्द्रीष्टिः ॥ सा वरुण-प्रघासेन व्याख्याता । विशेषस्तूच्यते । अष्टौ प्रधानदेवताः । अ-ग्निः, सोमः, सविता, सरस्वती, पूषा, इन्द्राग्नी, इन्द्रो, वृत्रहेंद्रो, महेन्द्रो, वेति तिसृणां विकल्पः । विश्वकर्मा चेत्यष्टौ । इन्द्राग्नीप-र्यन्तानां वरुणप्रघासे आवाहनमुक्तम् । "तइन्द्रमावह वृत्रहेन्द्रमा-वह महेन्द्रमावह" । त्रयाणां मध्ये अन्यतमः । "विश्वकर्माण-मावह देवांआज्यपां" इत्यादि । उत्तमे प्रयाजे ऐन्द्राग्नपर्यन्तं वरुणप्रघासवत् । "स्वाहेन्द्रंस्वाहावृत्रहेन्द्रंस्वाहामहेन्द्रं" वा । "स्वा-हाविश्वकर्माणंउ० स्वाहा" इत्यादि । वार्त्रघ्नावाज्यभागौ । प्रधानस्य ऐन्द्राग्नपर्यन्तानां षण्णां वरुणप्रघासे उक्ता याज्यानुवाक्याः । इन्द्रस्य याज्यानुवाक्ये तु दर्शे उक्ते । महेन्द्रस्य च । "आतूनइन्द्रवृ-त्रहंननुतेदायिमहइन्द्रियाये" ति वृत्रहेन्द्रस्य । "विश्वकर्मन्हविषावा-वृधानो यातेधामानिपरमाणियावमे" ति विश्वकर्मणः । स्विष्टकृतः इन्द्राग्नान्तं वरुणप्रघासवत् । याडिन्द्रस्य वृत्रहेन्द्रस्य महेन्द्रस्य वा० यान्हविश्वकर्मणः । सूक्तवाके ऐन्द्राग्नान्तं वरुणप्रघासवत् । "इ-न्द्र इदं० वृत्रहेन्द्र इदं० महेन्द्र इदमि" ति वा । "विश्वकर्मा इदं ह०" । वाजिनावभृथवर्जं वरुणप्रघासवदन्यत् । स्रुगादापनवेदग्र-हणपत्नीवाचनानि प्रकृतिवत् ॥ दक्षिणाग्नेरग्निमतिप्रणीय पित्र्या ॥ तस्मिन्नेवाग्नौ दक्षिणाग्नौ वा पित्र्या नामेष्टिः कर्त्तव्या । सा शंयव-

न्ता सर्वत्र उपांशु प्रयोज्या। आगुरादय उच्चैरेव। आवाहनादिमन्द्र-स्वराणि जपलोपे भवन्ति। होतावभृथवषट्कारानुमन्त्रणाभिहिङ्का-रवर्जम्। अत्र जपशब्द उपांशुत्वधर्माधिकमन्त्रोपलक्षणार्थः। वषट्कारानुमन्त्रणस्य जपत्वाभावप्रतिषेधात्। तत्तूपांशु प्रयोज्याः सर्वे मन्त्रा लुप्यन्ते। यानि प्राङ्मुखानि तानि दक्षिणामेव प्राचीं कृत्वा कर्त्तव्यानि॥ अथ होता मन्त्रितः स्थानाचमने कृत्वा अ-तिप्रणीतविहारं दक्षिणाग्निविहारं वा तीर्थेन वेदिश्रोण्योत्तरयेत्ये-वमादि कृत्वा प्रेषितोभिहिङ्कृत्य "उशंतस्त्वानिधीमही" त्येतामृचं त्रिरनवानमन्वाह। ताः सामिधेन्यस्तासामुत्तमेन प्रणवेन "आवहदे-वान् पितॄन्यजमानाये"ति निगदमुपसन्तनोति। अर्था "दग्नेमहां असी"त्येवमादिनिगदस्यार्षेयस्य च लोपः। अस्यामिष्टौ देवाः पितरश्चेज्यन्ते इति देवशब्दवत्सु मन्त्रेषु देवशब्दानन्तरं पितृशब्दं ब्रूयात्। देवशब्दं केवलन्न ब्रूयात्। "इडामहैदेवान् पितॄनीडेन्या-न्नमस्वा" इति। "इदं मेदेवाः पितरोहविर्जुषन्तामि"त्येवमादिषु अर्थात्प्राप्तस्य प्रतिपत्तिवाक्यगो निगमार्थः अतः प्रतिपत्तिवाक्याद-न्यत्र पितृशब्दो न प्रयोक्तव्य इत्येके मन्यन्ते। "आवहदेवान् पितॄ-न्यजमानाये" ति अवसाय आज्यभागावावाह्य "पितॄन्त्सोमवत आवह" अथ वा "सोमंपितृमन्तमावह"। अनयोर्विकल्पः। "पितॄन् बर्हिषदः आवह पितॄनग्निष्वात्तान् आवह"। यमपक्षे "यममावह" वैस्वतपक्षे "वैवस्वन्तमावह देवा आज्यपा आवह"। अग्निहोत्रायेत्यस्य स्थाने "अग्निंकव्यवाहनमावह आवहजातवेदः सुयजायजे"त्या-वाहनम्। अत ऊर्ध्वं प्रादेशादि लुप्यते। सीदहोतरित्युक्तः तूष्णीं होतृसदनमवेक्ष्य तूष्णीं निरसनोपवेशने करोति। मन्त्राणां क्रियाविशेषणत्वान्मन्त्रलोपेपि न क्रियालोपः। तूष्णीं जानुशिरसा बर्हिरुपस्पृश्य स्रुगादापनमाह बर्हिर्वर्ज चतुरः प्रयाजान्यजति।

उत्तमे प्रयाजे "ये स्वाहाग्निं स्वाहासोमंस्वाहापितॄन्त्सोमवतः स्वाहा सोमंपितृमन्तं वा स्वाहा पितॄन्बर्हिषदः स्वाहा पितॄनग्निष्वात्तान्" यमश्चेत्तदा " स्वाहायमं" वैवस्वतश्चे"त्स्वाहावैवस्वतस्वाहा अग्निंकव्यवाहनं स्वाहा देवा" इत्यादि । "अनो अग्नेसुचेतुनात्वं सोममहेभगमि"ति जीवातुमतोराज्यभागयोः पुरोनुवाक्ये । नित्ये याज्ये ॥ अथ होता ब्रह्मा च सव्योत्तर्युपस्थौ प्राचीनावीतिनौ हविर्भिश्चरतः "उदीरतामवरउत्परासस्वयाहिनः पितरः सोमपूर्वे" इतिं द्वे अनुवाक्ये पितॄणां सोमवताममनवानमुक्त्वा शिष्टेनार्द्धर्चेन प्रणुयात् । अध्वर्युणा "स्वधे"ति प्रेषितः होता "ये स्वधामहे"इत्यागूर्य "ये स्वधेति" वा आगूर्य देवतामादिश्य "उपहूताः पितरः सोम्यास"इति याज्यामुक्त्वा "स्वधानम"इति । नित्याः प्लुतयः । एवमेवेतरेषामपि द्वे द्वे अनुवाक्ये तृतीया याज्या । "त्वं सोमं प्रचिकितोमनीषासोमोधेनुमि"त्यनुवाक्या । त्वं सोमपितृभिः संविदान"इति याज्या । "सोमस्यपितृमतः बर्हिषदः पितरआहं पितॄनि"त्यनुवाक्ये । "इदं पितृभ्योनमो अस्त्वद्ये"ति याज्या पितॄणां बर्हिषदाम् । "अग्निष्वात्ताः पितरोये चेहे" त्यनुवाक्या । " ये अग्निदग्धा" इति याज्या पितॄणामग्निष्वात्तानाम् । यमपक्षे "इयमप्रस्तरमि" ति द्वे अनुवाक्ये । "परेयिवांसमि"ति यमस्य याज्या । वैवस्वतस्याप्येष एव । अयं तु विशेषः । आद्योत्तमे अनुवाक्ये मध्यमा याज्या । "येतानूपुर्देवत्राजेहसानात्वदग्नेकाव्यात्वन्मनीषा" इत्यनुवाक्या । " स प्रत्नष्वे"ति याज्या अग्नेः कव्यवाहनस्य । निगदोत्र न भ भवति । आवाहनेपि पित्र्यायां पक्षाविति वचनात् । आगूर्याग्निं कव्यवाहनमादिश्य यजेत् । अतः प्राकृतोपस्थं सव्यं चोभयोः तूष्णीं पर्वाञ्जनम् इडा प्रकृत्या भवति । प्रकृत्यात ऊर्ध्वमिति वचनात् । इडानिगदे उपांशुप्रयोज्यलोपं के चिदिच्छन्ति ।

यदि अध्वर्यवो वषट्कारक्रियां कुर्वन्ति तदा आज्यभागाभ्यामूर्ध्वं प्रकृत्या भवति। वषट्कारक्रियायां चोर्ध्वमाज्यभागाभ्यामिति वचनात्। उभयथापि जपादिलोपस्तुल्य एव। अन्यन्मन्त्रलोपादिति वचनात्। वषट्कारक्रियापक्षे एकैकानुवाक्या। मध्यमा उद्धरेत्। "यो अग्निः कव्यवाहनस्त्वमग्नईडितो जातवेद" इति संयाज्ये। अनिगदे एव। अथेडामुपहूयावान्तरेडां प्राणभक्षं भक्षयित्वा बर्हिष्यनुप्रहरेयुः। इडाभक्षणं चात्र नास्ति। न वा मार्जनम्। बर्हिर्वर्जं द्वावनुयाजौ यजति। सूक्तवाके "अग्निरिदं० सोम इदं० पितरः सोमवन्त इदं० षन्ता० धन्तः क्रत० सोमः पितृमानिदं० क्रते"ति वा। "पितरोबर्हिषदः इदं० जुषन्ता० न्धन्त० क्रत० पितरोग्निष्वात्ता इदं० षं० धं० क्रत० यमइ० क्रते"ति यमपक्षे। वैवस्वतपक्षे "वैवस्वत इदं० क्रत अग्निः कव्यवाहनइ० क्रत देवाआज्यपा क्रत अस्यामृधे" त्यादि। न चात्र नामादेशः। शंयुवाकः प्रकृत्या। एतदन्ता पित्र्येष्टिः॥ संस्थितायां प्राग्वानुयाजाभ्यां दक्षिणावृद्भूत्वा दक्षिणाग्निमुपतिष्ठते "अयाविष्ठे" त्यनेन मन्त्रेण। अनतिप्रणीतपक्षे अनावृत्त्यैवोपस्थानं भवति। तथास्थितस्यैवाभिमुखसम्भवात्। उभयोरपि पक्षयोरावृत्त्यैव गार्हपत्याहवनीयावुपतिष्ठेत। "सुसंदृशंत्वे" ति आवहनीयम्। "अग्निन्तमन्य" इति गार्हपत्यम्। "माप्रगामाम्नेत्वंन्न" इति षट्कचतुष्के जपन्त एनं गार्हपत्यं गच्छन्ति पूर्वेण गार्हपत्यं सूक्ते समापयन्ति। यदि प्रागनुयाजादेव उत्थानं तदा सव्यावृतोनुयाजादि कुर्यात्। यदि संस्थितायां तदा सव्यावृतः सञ्चारार्थं व्रजति। तदाध्वर्यवो यदुपदिशन्ति तत्कर्तव्यम्॥ अथ पित्र्याब्रह्मत्वम्॥ ब्रह्मा शुचिर्भूत्वा दक्षिणाग्निविहारं प्रविश्य वृतो दक्षिणेनातिप्रणीतं गत्वा तूष्णीं निरसनोपवेशने करोति। ब्रह्म-

जपश्चात्र न भवति । लुप्तजपत्वात् । प्रणीतासर्जनादिषु जपाः सर्वत्र न भवन्ति । अतिसर्जने प्रणयेदित्यादि अतिसर्जननामैव भवति । अथ प्राशित्रावेक्षणं तूष्णीमेव गृह्णाति । तूष्णीमेव प्राग्दण्डं निदधाति । अङ्गुष्ठोपकनिष्ठिकाभ्यां गृहीत्वा तूष्णीमवघ्राय बर्हिष्यनुप्रहरेत् । तूष्णीमन्वाचामति । प्राशित्रप्रक्षालनमभ्यात्ममपां निनयनं नेडाया भक्षणं न मार्जनं च । "ओंप्रतिष्ठे" ति समिधमनुजानीत । न च पूर्वो जपः । ततः संस्थितायां सर्वप्रायश्चित्तानि समन्त्रकाणि जुहुयात् । संस्थितायां प्राग्वानुयाजाभ्यामग्न्युपस्थानादि कुर्यात् । ततः संस्थाजपं करोतीति विशेषः । समाप्ता पित्र्या ॥ त्र्यम्बकेभ्यः प्रत्येत्य आदित्येष्ट्या चरन्ति ॥ तस्यां धाय्ये विराजौ । आज्यभागावावाह्य "अदितिमावह देवांआज्यपामि" त्यादि । "स्वाहादितिस्वाहे" ति । पञ्चमे प्रयाजे "अग्निनारयिमश्नवद्गयस्फानोअमीवहे" ति पुष्टिमतोराज्यभागयोः पुरोनुवाक्ये । नित्ये याज्ये । "उतत्वामदितेमहिमहीमूषुमातरमि" ति प्रधानस्य । "प्रेद्धोअग्ने० प्रियाधामान्ययाडादित्याः प्रियाधा० हविरिमोअग्ने" इति याज्या । "अग्निरिदं० सोमइदं० अदितिरिदं० देवाआज्यपा" इत्यादि । पौर्णमासवदन्यत् । अनीकवतेष्टीरारभ्य एतदन्ताः साकमेधा उच्यन्ते ॥ समाप्ताः साकमेधाः ॥

अथ पञ्चम्यां पौर्णमास्यां शुनासीरीयेष्टिः कार्या ॥ तस्यां वैश्वदेववत्कल्पः । विशेषस्तूच्यते । दश प्रधानदेवताः आपस्तंबोक्ताः अग्न्यादिषु पूषान्ताः पञ्च । इन्द्राग्नी विश्वेदेवा इन्द्रः शुनासीरः वायुः सूर्य इत्येताः पूषान्ताः । वैश्वदेव्यामुक्ता याज्यानुवाक्या । इद्राग्नोर्वरुणप्रघासे उक्ते । "विश्वेदेवासआगतयेकेचज्मे" ति विश्वेषां देवानाम् । "इद्रंवयंशुनासीरमि" ति क-

रूपजानुवाक्या। "अश्वायन्तोगव्यन्त" इतीन्द्रस्य शुनासीरस्य याज्या। "सत्वंनोदेवमनसेशानायप्रहुतिमि" ति वायोः। "तरणिर्विश्वदर्शतश्चित्रन्देवानामि" ति सूर्यस्य अत्र सूर्य उपांशु। स्वपक्षे अष्टौ देवताः। वायुर्नियुत्वान्वायुर्वा षष्ठः। शुनासीरौ इन्द्रो वा शुनासीरः। इन्द्रो वा शुनः एतेषां त्रयाणामन्यतमः। सूर्योऽष्टमः। पूषान्तानामुक्तयाज्यानुवाक्याः। "आवायोभूषशुचिपा उपनः प्रयाभिर्यासिदाश्वांसमच्छे" ति वायोर्नियुत्वतः। केवलवायुसूक्ते। शुनासीराविमांवाचञ्जुषेथांशुनंनः फालाविकृषन्तुभूमिमि" ति शुनासीरयोः। इन्द्रस्य शुनासीरस्योक्ते। "शुनानंहुवेममघवानमिन्द्रमश्वायन्तोगव्यन्तोवाजयन्त" इतीन्द्रस्य शुनस्य। सूर्यस्योक्ते वाजिनवर्जमन्यद्वैश्वदेववत्कुर्यात्। समाप्य चातुर्मास्यानि सोमेन यजेत। अशक्तावैन्द्राग्नेन पशुना। अथ वा पुनश्चातुर्मास्यानि प्रयोक्तव्यानि। पुनः प्रयोगपक्षे न वैश्वानरपार्जन्यावभ्यसेत्॥ चातुर्मास्याङ्गपश्वकरणादशक्तस्य सवनीयेष्टिर्बौधायनोक्ता॥ तत्राग्निरिन्द्रो विश्वेदेवा देवता। "अग्निर्मूर्द्धाभुवोयज्ञस्ये" त्यग्नेः "ऐन्द्रसानसिंप्रससाहिष" इतीन्द्रस्य। "विश्वेदेवासोयेकेचज्मामहिनोअहिमाये" ति विश्वेषां देवानाम्। तत्र श्लोकः। चातुर्मास्येषु सर्वेषु श्रथदूत्वं प्रयोजयेत्। ऐन्द्राग्नस्य मरुत्पक्षे "मरुतो यस्यरा इव"॥

इति मञ्चनार्यभट्टविरचितायामाश्वलायनसूत्रप्रयोगदीपिकायां द्वितीयोऽध्यायः॥

अथ पाशुकं चातुर्मास्येषु॥ कपिलपक्षे प्रयोगः उच्यते। तत्रायं विशेषः। पूर्ववद्वैश्वानरपार्जन्यौ। प्रातर्वैश्वदेवपर्वणि अग्निप्रणयनं भवति। परिधौ पशु नियुञ्जति। तत्र परिव्ययणीय प्राह "युवासुवासा" इति। स्थानाचमने कृत्वा अग्निमन्थनं

भवति । सामिधेनीषु द्वे धाय्ये आवपेत । आवाहने विशेषः । "अग्निमग्नआवह सोममावह अग्निमावह सोममावह सवितारं०आवह सरस्वतीमावह पूषणमावह मरुतःस्वतवसआवह विश्वान्देवानावह वनस्पतिमावह द्यावापृथिवीउ०आवह देवांआज्यपामि" त्यादि । संमार्गैः सम्मृज्य प्राष्टताहुतीर्जुहुयात । "जुष्टोवाच" इत्यादि हुत्वा "प्रशास्तः तीर्थेनप्रपद्यस्वे" ति प्रशास्तारं प्रपाद्य "मित्रावरुणयोरि" ति मन्त्रेण दण्डदानम् । मैत्रावरुणोपि दण्डं प्रतिगृह्य "भूयासमि" त्यन्तेन उत्तरेण होतारमतिव्रजेद्दक्षिणेन दण्डं हरेन्न चानेन संस्पृशेदात्मानं वान्यं वा प्रैषवचनात । दक्षिणो होतृषदनात्प्रह्वोवस्थाय वेद्यां दण्डमवष्टभ्य ब्रूयात्प्रैषान् । अथ होता होतृषदनाभिमन्त्रणादि स्रुगादापनान्तं कृत्वा एकादश प्रयाजान्यजति । मैत्रावरुणेन होता "यक्षदग्निंसमिधे" त्यादि प्रेषतः प्रेषितो होता प्रैषमाप्रीभिर्यजति । प्रैषसालिङ्गाभि ऋग्भिः । "समिधोअग्रे" ति ऋष्युक्तपक्षेणाप्रीर्ज्ञातव्याः । दशप्रयाजानिष्ट्वा "पर्यग्नये" ति प्रेषितो मैत्रावरुणोनभिहिंकृत्य "अग्निर्होतान" इति तृचमन्वाह । आद्योत्तमे त्रिर्ब्रूयात । पुनः प्रेषितो "जैदाग्नि" रित्युपप्रैषं ब्रूयात । प्रैषमुक्त्वा अन्तर्वेदि दण्डं निदध्यात । अथ होता अध्रिगुप्रैषं ब्रूयात । "दैव्याः शमितार०मेधपतिभ्योमेधंप्रास्माअग्निमि" त्यादि । दक्षिणावृदावर्तते मैत्रावरुणश्च । संज्ञप्ते पशावावर्तेत । "मैत्रावरुणस्तोकेभ्योनुब्रूही" ति प्रेषितः । "जुषस्वसप्रथस्तममि" त्येका । "इमन्नोयज्ञमि" ति पञ्चर्चं सूक्तमाद्योत्तमे त्रिः । अथ होता तस्मिन्नेवासने पुनर्निरसनोपवेशने कृत्वोपविशति । ततः पुनः स्रुगादापनमाह "होतायक्षदग्निस्वाहे" ति प्रेषितः । उत्तमाप्री याज्या । सप्रैषपक्षे "अग्निर्वृत्राणि त्वंसोमासी" ति आज्यभागयोः पुरोनुवाक्ये । मै-

त्रावरुणो ब्रूयात् । "होतायक्षदग्निमाज्यस्यजुषतामि" ति अग्नेः प्रैषः । "होतायक्षत्सोममाज्यस्ये" ति सोमस्य । "होता० ये० जुषाणोअग्निराज्यस्ये" ति याज्याग्नेः । "ये० जुषाणः सोमआज्यस्य हविष" इति सोमस्य । यजप्रैषपक्षे होतैव पौर्णमासवदाज्यभागौ यजति । अथ प्रधानानाम् । "अग्निर्मूर्द्धा भुवोयज्ञस्ये" त्यग्नेः । "सोमयास्तेमयोयातेधामानी"ति सोमस्य । "आविश्वदेवंसत्पतिंवाममद्ये" ति सवितुः । "पावकानः सरस्वतीयावीरवकिन्याचित्रायुरि" ति सरस्वत्याः । "पूषन्तवव्रतेवयंशुक्रन्तेअन्यद्यजतन्तेअन्यदि" ति पूष्णः । "इहेहवस्वतवसः प्रचित्रमर्केगृणतेतुराये" ति मरुतां स्वतवसाम् ॥

अथ वैश्वदेवः पशुः॥ तदनु सावुषाया आमिक्षायाश्च सह प्रदानम् । "विश्वेअद्यमरुत" इति पुरोनुवाक्या । "मैत्रावरुणहोतायक्षद्विश्वान्देवानामिक्षायाश्छागस्यवपायामेदसोजुषन्तां हविर्होतर्यज विश्वेदेवाः शृणुते महवंम" इति होता यजति । चात्वाले मार्जयित्वा द्यावापृथिवीभ्यां यजति । "महीद्यौः पृथिवीचनः प्रपूर्वजेपितरानव्यसीभिरि" ति याज्यानुवाक्ये । ततः स्विष्टकृदादीडान्तं कुर्यात् । अथ वैश्वदेवेन पशुपुरोडाशेन यजति । "आनो देवानामुपवेतुशंस" इति पुरोनुवाक्या । मैत्रावरुणः " होतायक्षद्विश्वान्देवान्पुरोडाशस्यजुषतांहाविर्होतर्यजे" ति प्रेषितः । "येकेचज्मामहिन" इति यजति होता । स्विष्टकृति"इडामग्न" इति पुरोनुवाक्या । " मैत्रा० होतायक्षदग्निपुरोडाशस्यजुषतांहाविर्होतर्यजे" ति प्रैषः । "स्वदस्वहव्ये" ति यजति होता । तदिडाभक्षणम् ॥ अथ हविर्यागः ॥ अथ मनोतायै संप्रेषितो मैत्रावरुणः अनभिहिंकृत्य "त्वंह्यग्नेप्रथमोमनोते" ति सूक्तं त्रयोदशर्चं सूक्तमन्वाह । आद्योत्तमे त्रिः । "आनोविश्वआक्रागमंतु

देवा" इति पुरोनुवाक्या । "होतायक्षद्विश्वान्देवांश्छागस्यहवि-ष आदन्नद्यमध्यतोमेदउद्भृतंपुरादेषोभ्यः पुरापौरुषेय्यागृभः घस-न्नूनंघासेअज्राणां यवसप्रथमानासुमत्क्षणां शतरुद्रियाणामग्नि-ष्वात्तानां पीवोपवसनानां पार्श्वतः श्रोणितः श्रितामतउत्साद-तोङ्गादङ्गादवत्तानांकरन्नेवविश्वेदेवाजुषंतां हर्विर्होतर्यज" इति प्रैषः । "अग्नेयाहिदूत्यंमारिष" इति याज्या । अस्या अर्ध-र्च आरमेत् । वसाहोमान्ते "सरस्वतीमरुत" इत्यर्धर्चेन यजति । ततो वनस्पतियागः । "देवेभ्योवनस्पत" इत्यनुवाक्या । "हो-तायक्षद्वनस्पति०धित यत्राग्नेराज्यस्यहविषः प्रियाधामानियत्रसो-मस्याज्यस्यहविष०नियत्रविश्वेषांदेवानां छागस्यहविषः प्रिया० नियत्र वनस्पतेः प्रियापाथांसियत्रदेवानामाज्यपा० नियत्राग्नेर्हो-तुः प्रि०नितत्रैतन्प्रस्तुयसइ० वनस्पतिर्जुषतां हविर्होतर्यजे" ति प्रैषः । "वनस्पतेरशनयानियूपे"ति याज्या । अथ स्विष्टकृतः "यिप्री-हिदेवां"इत्यनुवाक्या । "होतायक्षदग्निंस्विष्टकृतमयाडग्निरग्नेरा-ज्यस्यहविषः प्रियाधामान्ययाट्सोमस्याज्यस्यहविषः प्रि०द्विश्वे-षान्देवानां"च्छागस्यहविषः प्रि० द्वनस्पतेः प्रियापाथांस्ययाड्दे-वानामि" त्यादि० जुषतांहविर्होतर्यजेति । "अग्नेयदद्यविशोअ-ध्वरस्ये" ति याज्या । तत इडावान्तरेडाप्राशनं च । तत एकाद-शानुयाजाः । तेषां "देवंबर्हिरि" त्यादयः प्रैषाः । सूत्रोक्ता याज्या एकादश । अथ सूक्तवाकप्रैषः । "अग्निमद्यहोतारमवृणी-तायंयजमानः पचन्पुरोडाशंगृह्णन्नग्नयआज्यंगृह्णत्सोमायाज्यंबध्न-न्विश्वेभ्योदेवेभ्यश्छागंसूपस्था अद्यदेवोवनस्पतिरभवदग्नयआज्ये-नसोमायाज्येनविश्वेभ्योदेवेभ्यश्छागेनाक्षंस्तन्मेदसस्तप्रातिपचता-ग्रभीषुरवीवृधन्तपुरोडाशेन त्वामद्यर्षआर्षेयऋषीणां नपादवृ-णीतायं यजमानोबहु०भ्रू ३ हि इदन्द्यावापृथिवी" त्यादि । "अ-

ग्निरिदं० सोमइदं० अग्निरिदं० सोमइदं० सविताउ० इदं० सरस्वतीदं० पूषेदं० मरुतःस्वतवसइदं० विश्वेदेवाइदं० द्यावापृथिवी इदं० देवाआज्यपा" इत्यादि शंयुवाकान्तम् । अनुयाजानां सूक्तवाकस्य शंयुवाकस्य वोपरिष्टाद्वाजिनयागो भवति । ततः पत्नीसंयाजादिप्रायश्चित्तान्तं कृत्वा हृदयशूलावभृथसंस्थाजपं करोति ॥ इति सपशुचातुर्मास्येषु वैश्वदेवपर्व समाप्तम् ॥

अथ वरुणप्रघासे विशेषः ॥ स वक्ष्यते । तत्राग्निप्रणयनम् । तत्र केचिदध्वर्यव एकवचनान्तं प्रैषं प्रयुञ्जन्ति । केचिद्द्विवचनान्तम् । उभयत्राप्यग्निप्रणयने न कश्चिद्विशेषः । द्विवचनपक्षे तु "अग्ने महां असी"त्याहवनीयाभिधाने ऊहो विशेषः । अथ यूपाञ्जनम् । अग्निमन्थनम् । " नमः प्रवक्त्र " इति जपः । सामिधेनीषु धाय्ये भवतः । आवाहने आज्यभागावावाह्य अग्न्याद्याः पञ्चदेवता आवाह्य " इन्द्राग्नी आवह मरुत आवह वरुणमावह वनस्पतिमावह कं उ० आवह देवा आज्यपामि"त्यादि । संमार्गैः संसृज्य प्रवृताहुतीर्जुहोति । स्रुगादापने ऊहः । " घृतवतीमध्वर्यूस्रुचमास्येथां देवयुवं विश्ववारा" इति । प्रयाजादि वैश्वदेववत् । अध्रिगौ तु विशेषः । "दैव्याः श० मेधपतिभ्योमेधौ प्राभ्यामग्निभरत न्वेनोमाता उदीचीमानयोः पदो० पृथिवीमशरीरे एकै० कैकधानयोस्त्वचावाष्व्यतात्पुरात्पुरानाभ्याअपि शसोवपेउत्खिदतादन्तरन्तरेवोष्माणं वारयध्वात् श्येनमनयोर्वक्षसीकृणुतात्प्रशस्याबाहुंच्छलाद्दोषाणिकश्यपे वांसानाच्छिद्राः श्रोणीकवषोरुत्सेकपर्णाष्ठीवन्ताषड्विंशतिः षड्विंशतिरनयोर्वंक्रयस्ता अनुष्ठ्याच्यावयनादृगात्रङ्गात्रमनयोरनूनं कृणुतात् उव० तात् अस्नार तात्० वनुष्टुजनयोर्माराविष्टोरूकंमन्यमानानद्वस्तोकत० तारः अध्रि० अपशमितायेय तात् " द्वयोर्वपयोः श्रप्यमाणयोः स्तोक सूक्तं सकृत्

स्रुगादापनं स्वाहाकृतिप्रैषः । उत्तमाप्री याज्या । आज्यभागादि पूषान्तं वैश्वदेववत्कर्म भवति । तत "इद्राग्नीअवसागतं अथद्रू-त्रमुतसनोतिवाजमि" तीन्द्राग्न्योर्याज्यानुवाक्ये । अथ दक्षिणे वि-हारे प्रतिप्रस्थातुर्मारुती मेषी भवति । तदनु वपाया आमिक्षायाश्च सह प्रदानम् । "शुचीवोहव्यामरुतः शुचीनामि "ति अनुवा-क्या । "होतायक्षन्मरुत आमिक्षायामेष्यावपायामेदसोजुषन्तां हविर्होतर्यजे "ति प्रैषः । "प्रचित्रमर्कंगृणतेतुराये "ति याज्या इति वपायाः । अथोत्तरे विहारे अध्वर्योर्वारुणो मेषो भवति । "अवसिन्धुंवरुणोद्यौरिवस्थादि "त्यनुवाक्या । "होतायक्षद्व-रुणमामिक्षायामेषस्य वपायामेदसोजुषतां हविर्होतर्यजे" ति प्रैषः । "तत्वायामिब्रह्मणावन्दमान " इति याज्या । इति वपायागः । चात्वाले मार्जयित्वा कायेनैककपालेन यजति । "कयानश्चित्र-आभुवद्धिरण्यगर्भः समवर्तताग्र " इति याज्यानुवाक्ये । स्विष्ट-कृदादीडान्तं वैश्वदेववत् । अथानन्तरं पशुपुरोडाशाभ्यां प्र-चरन्ति । "नूष्टिरंमरुतोवीरवन्तमि " त्यनुवाक्या । "होतायक्षन्म-रुतः पुरोडाशस्यजुषन्तां० यजअराइवेदचरमाअहेवे "ति याज्या इति मरुतां पुरोडाशस्य । अथ वारुणस्य पुरोडाशस्य । "अयं सुनुभ्यंवरुणस्वधाव " इत्यनुवाक्या । "होतायक्षद्वरुणं पुरोडा-शस्यजुषतां हविर्होतर्यज तद्धिनक्तन्तद्दिवे "ति याज्या । इति वा-रुणस्य । अथ स्विष्टकृत् । "इडामग्ने " इत्यनुवाक्या । "हो-तायक्षदग्निपुरोडाशयोर्जुषतांह० यज स्वदस्वहव्ये "ति या-ज्या । इडाभक्षणम् । अथ हविर्यागः । मनोता पूर्ववत् । "आ-वोहोताजोहवीतिसत " इत्यनुवाक्या । "होतायक्षन्मरुतोमेष्याह-विषआदन्नद्यमध्यतो० घसंनूनं करन्नेवमरुतोजुषन्तां यज यावः शर्मशशमानायसन्ती "ति याज्या । अस्या अर्द्धर्चे वसाहोम आ-

रभेत् । इति मरुताम् । अथ वरुणस्य । मनोता पूर्ववत् । " एवा-वन्दस्ववरुणं बृहन्तमि " त्यनुवाक्या । " होतायक्षद्वरुणंमेषस्य हविषआददद्यमध्यतोमेदउद्भृतं० घसंन्नूनंद्या० करदेवं वरुणोजुषतां हविर्होतर्यजत अस्तभ्नाद्यामसुरोविश्ववेदा " इति याज्या । वसाहोमार्थमारभेत् । इति वरुणस्य । वनस्पतियागादिप्रायश्चित्तं समानं वैश्वदेवेन व्याख्यातम् । तत्र वनस्पतिप्रैषे विशेषः । "होतायक्षद्वनस्पति० तत्रसोमस्याज्यस्य० यत्रमरुतां मेष्याहविषः प्रि० यत्रवरुणस्यमेषस्यहविषः प्रियाधाम० यत्रवनस्पतेः प्रिया-पाथांसि यत्रदेवानामाज्यपानामि"त्यादि० । तत्र तौ प्रस्तु० इभीयसाविवकृत्वीकरदेवं देवोवनस्पतिर्जुषतां हवि० । स्विष्टकृत्प्रैषे विशेषः । "होतायक्षदग्निस्विष्टकृतमयाडग्निरग्नेराज्यस्य ह-विषः० ण्मरुतां मेष्याहविषः प्रिया० वरुणस्य मेषस्य हविषः प्रिया० ड्वनस्पतेः प्रियापाथांस्ययाड्देवानामि"त्यादि० होतर्यज । अथ सूक्तवाकप्रैषः । "अग्निमद्य० पुरोडाशौ गृह्णन्नग्नय आज्यं गृह्णत्सोमायाज्यं बध्नन्मरुद्भ्योमेषींबध्नन्वरुणायमेषं सूर्यस्याज्येन म-रुद्भ्योमेष्यां वरुणायमेषेणाक्षस्तौमेद० भीषुरवीवृधन्तपुरोडाशा-भ्यांत्वामद्ये" त्यादि० । अथावभृथेष्टिहृदयशूलादिसंस्थाजपान्तं समानम् । तत्र विशेषः । "शुचौस्थोयोस्मान्द्वेष्टियंचवयन्द्विष्मस्त-मभिशोचतम्" । एवं वारुणप्रघासिकर्म समाप्तम् ॥

अथ साकमेधा उच्यन्ते ॥ तत्र आमाहेन्द्याः प्रकृतिवदिष्टयः । अथ माहेन्द्री । तस्या वरुणप्रघासवत्कर्म भवति । तत्रायं विशेषः । "अग्निमग्नआवह सोमावह" । ऐन्द्राग्नान्तं वरुणप्रघासवत् आवाह्य "इन्द्रंवृत्रहणमावह वनस्पतिमावह विश्वकर्माणंउ० आवह देवांआज्यपामि" त्यादि समानम् । अध्रिगौ विशेषः । मेधपतयेमेधमाज्यभागादि ऐन्द्राग्नान्त० वरुणप्रघासवद्यागः । तत

स्रुगादापनं स्वाहाकृतिप्रैषः । उत्तमाप्री याज्या । आज्यभागादि पूषान्तं वैश्वदेववत्कर्म भवति । तत "इद्राग्नीअवसागतं श्रथद्वृत्रमुतसनोतिवाजमि" तीन्द्राग्न्योर्याज्यानुवाक्ये । अथ दक्षिणे विहारे प्रतिप्रस्थातुर्मारुती मेषी भवति । तदनु वपाया आमिक्षायाश्च सह प्रदानम् । "शुचीवोहव्यामरुतः शुचीनामि "ति अनुवाक्या । "होतायक्षन्मरुत आमिक्षायामेष्यावपायामेदसोजुषन्तां हविर्होतर्यजे "ति प्रैषः । "प्रचित्रमर्कंगृणतेतुराये "ति याज्या इतिं वपायाः । अथोत्तरे विहारे अध्वर्योर्वारुणो मेषो भवति । "अवसिन्धुंवरुणोद्यौरिवस्थादि "त्यनुवाक्या । "होतायक्षद्वरुणमामिक्षायामेषस्य वपायामेदसोजुषतां हविर्होतर्यजे" ति प्रैषः । "तत्वायामिब्रह्मणावन्दमान " इति याज्या । इतिं वपायागः । चात्वाले मार्जयित्वा कायेनैककपालेन यजति । "कयानश्चित्रआभुवद्धिरण्यगर्भः समवर्तताग्र " इति याज्यानुवाक्ये । स्विष्टकृदादीडान्तं वैश्वदेववत् । अथानन्तरं पशुपुरोडाशाभ्यां प्रचरन्ति । "नूष्ठिरंमरुतोवीरवन्तमि "त्यनुवाक्या । "होतायक्षन्मरुतः पुरोडाशस्यजुषन्तां० यजअराइवेदचरमाअहेवे "ति याज्या इति मरुतां पुरोडाशस्य । अथ वारुणस्य पुरोडाशस्य । "अयं सुनुभ्यंवरुणस्वधाव " इत्यनुवाक्या । "होतायक्षद्वरुणं पुरोडाशस्यजुषतां हविर्होतर्यज तद्धिनक्तन्तद्दिवे "ति याज्या । इति वारुणस्य । अथ स्विष्टकृत् । "इडामग्ने " इत्यनुवाक्या । "होतायक्षदग्निपुरोडाशयोर्जुषतांह० यज स्वदस्वहव्ये "ति याज्या । इडाभक्षणम् । अथ हविर्यागः । मनोता पूर्ववत् । "आवोहोताजोहवीतिसत " इत्यनुवाक्या । "होतायक्षन्मरुतोमेष्याहविषआदन्नद्यमध्यतो० घसंनूनं करन्नेवमरुतोजुषन्तां यज यावः शर्मशशमानायसन्ती "ति याज्या । अस्या अर्द्धर्चे वसाहोम आ-

रभेत् । इति मरुताम् । अथ वरुणस्य । मनोता पूर्ववत् । " एवा- वन्दस्ववरुणं बृहन्तमि " त्यनुवाक्या । " होतायक्षद्वरुणंमेषस्य हविषआददद्यमध्यतोमेदउद्भृतं० घसंन्नूनंद्या० करदेवं वरुणोजु- षतां हविर्होतर्यजत अस्तम्भाद्यामसुरोविश्वदेवा " इति याज्या । वसाहोमार्थमारभेत् । इति वरुणस्य । वनस्पतियागादिप्रायश्चित्तं समानं वैश्वदेवेन व्याख्यातम् । तत्र वनस्पतिप्रैषे विशेषः । "होतायक्षद्वनस्पतिं० तत्रसोमस्याज्यस्य० यत्रमरुतां मेष्याहविषः प्रि० यत्रवरुणस्यमेषस्यहविषः प्रियाधाम० यत्रवनस्पतेः प्रिया- पाथांसि यत्रदेवानामाज्यपानामि"त्यादि० । तत्र तौ मस्तु० इभीयसाविवकृत्वीकरदेवं देवोवनस्पतिर्जुषतां हवि० । स्विष्टकृ- त्प्रैषे विशेषः । "होतायक्षदग्निस्विष्टकृतमयाडग्निरग्नेराज्यस्य ह- विषः० ण्मरुतां मेष्याहविषः प्रिया० वरुणस्य मेषस्य हविषः प्रिया० ड्वनस्पतेः प्रियापाथांस्ययाड्देवानामि"त्यादि० होतर्यज। अथ सूक्तवाकप्रैषः । "अग्निमद्य० पुरोडाशौ गृह्णन्नग्नय आज्यं गृह्णत्सोमायाज्यं बध्नन्मरुद्भ्योमेषींबध्नन्वरुणायमेषं सूर्यस्याज्येन म- रुद्भ्योमेष्यां वरुणायमेषेणाक्षस्तौमेद० भीपुरवीवृधन्तपुरोडाशा- भ्यांत्वामद्ये" त्यादि० । अथावभृथेष्टिहृदयशूलादिसंस्थाजपान्तं समानम् । तत्र विशेषः । "शुचौस्थोयोस्मान्द्वेष्टियंचवयन्द्विष्मस्त- मभिशोचतम्" । एवं वारुणप्रघासिकर्म समाप्तम् ॥

अथ साकमेधा उच्यन्ते ॥ तत्र आमाहेन्द्याः प्रकृतिवदिष्टयः । अथ माहेन्द्री । तस्या वरुणप्रघासवत्कर्म भवति । तत्रायं विशे- षः । "अग्निमग्नआवह सोमावह" । ऐन्द्राग्नान्तं वरुणप्रघासव- त् आवाह्य "इन्द्रंवृत्रहणमावह वनस्पतिमावह विश्वकर्माणंउ० आवह देवांआज्यपामि" त्यादि समानम् । अध्रिगौ विशेषः । मे- धपतयेमेधमाज्यभागादि ऐन्द्राग्नान्त० वरुणप्रघासवद्यागः । तत

इन्द्रस्य वृत्रघ्नश्चरोर्वपायाश्च सह प्रदानम् । "अभिक्रत्वेन्द्रभूरध-ज्मन्नि" त्यनुवाक्या । "होतायक्षदिन्द्रवृत्रहणंचरोश्छागस्यवपाया मेदसोजुषतामि" ति प्रैषः । "सहदानुंपुरुहूतक्षिपन्तमिं" ति याज्या । मार्जयित्वा वैश्वकर्मणैककपालेन यजति । "विश्वकर्मन्हविषावावृधानोयातेधामानिपरमाणियावमे"ति याज्यानुवाक्ये । स्विष्टकृदादीडान्तं पूर्ववत् । अथ पुरोडाशयागः । "त्वं महा इन्द्र-तुभ्यं हक्षा"इत्यनुवाक्या । "होतायक्षदिन्द्रवृत्रहणं पुरोडाशस्यजुषतां हविर्होतर्यज स्तुत इन्द्रे"ति याज्या । अथ स्विष्टकृदादिकर्म भवति । अथ हविर्यागः । मनोता । "सत्राहणं दाधृषिन्तुम्नमिन्द्रमि"त्य-नुवाक्या । "होतायक्षदिन्द्रवृत्रहणं च्छागस्य हविष आददद्यमध्य-तोमेद उद्भूतं० घसन्नूनं० करदेवमिन्द्रोवृत्रहाजुषतां हविर्होतर्यज एवावस्वइन्द्रः सत्यः सम्नाडि" ति याज्या । वसाहोमः । अथ वनस्पतिप्रैषः । "यत्रेन्द्रस्यवृत्रघ्नश्छागस्यहविषः प्रिया० धामानि-यत्रवनस्पत" इत्यादि समानम् । अथ स्विष्टकृति विशेषः "प्रि-याधामान्ययाडिन्द्रस्य वृत्रघ्नश्छागस्यहविषः प्रियाधामान्ययाड्वन-स्पतेः प्रियापाथांस्ययाट् देवानांयज" । सूक्तवाकप्रैषे विशेषः । "अग्निद्य० डाशं० गृह्णन्नग्नयआज्यं गृह्णत्सोमायाज्यंबन्धन्निन्द्रा-यवृत्रघ्नेच्छागंसूपस्था० द्रायवृत्रघ्नेनाद्यतंमेदस्तः० ग्रभीदवीवृध-तपुरोडाशेने" त्यादि समानम् । ततो हृदयशूलादिसंस्थाजपा-न्तम् ॥ एवं साकमेधिकर्म ॥

अथ शुनासीरीया ॥ सा वाजिनवर्जं समाना वैश्वदेव्या । अ-ग्न्यादिपञ्चदेवता आवाह्य ततः पशुदेवताः "वायुंनियुत्वन्तंउ० आवह वनस्पतिमावह इन्द्रं शुनासीरमावह सूर्यंउ० आवह" । अ-ध्रिगौ विशेषः । "मेधपतयेमेधम्" । वैश्वदेववत्पञ्चदेवता इ-ष्ट्वा ततः पाशुकं तन्त्रम् । पयसश्च वपायाः सह प्रदानम् । "आ-

वायोभूरशुचिपा" इत्यनुवाक्या। "होतायक्षद्वायुंनियुत्वन्तंउ० पयसश्छागस्यवपायामेदसोजुषतां हविर्होतर्यज पीवो अन्नारयिवृधः सुमेधा" इति याज्या। उपांशु मार्जयित्वा इन्द्रशुनासीरादि इडान्तं करोति। ततः पशुपुरोडाशेन चरन्ति। "प्रयाभिर्यासिदाश्वांसमि" त्यनुवाक्या। उपांशु। "होतायक्षत् वायुंनियुत्वन्तम्" उपांशु "पुरोडाशस्यजुषन्तांह० रायेनुयञ्जज्ञतूरोदसीम" इति याज्या। उपांशु स्विष्टकृदादिसमानं करोति। अथ हविर्यागः। मनोता। "आनोनियुद्भिः शतिनीभिरध्वरमि" त्यनुवाक्या। उपांशु। "होतायक्षत् वायुंनियुत्वन्तं उ० छागस्यहविषः आदात् उ० अद्यम० भः घसत् उ० न्नुनंघासे करत् उ० एवं० वायुर्नियुत्वान् हविर्होतर्यज प्रवायुमच्छाबृहतीमनीषे" ति याज्या। उपांशु वनस्पतिप्रैषे। यत्र वायोर्नियुत्वतः। उपां० "छागस्यहविष" इत्येवमादि समानम्। सूक्तवाके "वधन्वायवेनियुत्वतेउ छागं सूपस्थाअद्य० वायवेनियुत्वते उ छागेनाद्यतंमे वृधतपुरोडाशेने" त्यादि समानं शूलविभृथादिसंस्थाजपान्तम्। एवं शुनासीरीया समाप्ता ॥ इतिकपिष्ठलसूत्रस्थानि पशुचातुर्मास्यानि समाप्तानि ॥

अथ पशुबन्धप्रयोगो वक्ष्यते। तत्र पशवो द्विविधाः। सौमिका निरूढाश्चेति। तत्राग्नीषोमीयप्रकृतिकाः सौमिकाः। निरूढाश्चैन्द्राग्नप्रकृतिकाः। इदानीं निरूढानां प्रकृतिभूतस्य ऐन्द्राग्नस्य निरूढपशोः प्रयोग उच्यते। स च षट्सु षट्सु मासेषु संवत्सरे वा कर्तव्यः। निर्मित ऐन्द्राग्नः षाण्मास्यः सांवत्सरो वेत्युक्तत्वात्। तस्य पुरस्तादुपरिष्टाच्चेष्टिर्भवति। अथ वा पुरस्तादेव नोपरिष्टात्। उपरिष्टाद्वा न पुरस्तात्। सा चेष्टिराग्नेयी भवति। आग्नावैष्णवी वा। अथ वा पुरस्तादाग्नेयी उपरिष्टा-

दाग्नावैष्णवी वा। आग्नेय्यामुक्ते याज्यानुवाक्ये। "अग्नावि-ष्णूसजोषसाअग्नाविष्णूमहिधामेत्य" ग्नाविष्णोः। पौर्णमासव-दन्यत् संस्थाजपवर्जम्। यत्रेष्टिः पशोरुभयतोऽन्यतरतो वा वि-हिता सा निरूढैव वेदितव्या। न सौमिकेषु अग्निप्रणयनम्। वरुणप्रघासवत् स्थानाचमने कृत्वा चात्वालोत्करावन्तरेण विहा-रं प्रविश्य पश्चात्पाशुबन्धिकाया वेदेर्निरसनोपवेशने कृत्वा प्रेषि-तोभिहिङ्कृत्य यूपायाञ्जनीया अन्वाह। "अञ्जन्तित्वामध्वरेदेव-यन्त" इत्युत्तमेन वचनेनार्द्धर्च आरमेत्। आसम्प्रैषात्। अथ सम्प्रेषितो "यदूर्ध्वस्तिष्ठा" इत्यर्द्धर्चेन "उच्छ्रयस्ववनस्पत" इत्येतामुपसन्तनोति। "समिद्धस्यश्रयमाण" इत्येका "ऊ-र्ध्वऊषुणऊतय" इति द्वे। "जातोजायतेसुदिनत्वेअह्नाम" त्य-र्द्धर्च आरमेत्। आप्रैषात्। अथ प्रेषितः "पुनन्तिधीरा" इ-त्यनेनार्धर्चेन "युवासुवासा" इति उपसन्तत्य तयैव परिदध्या-त्। अथाग्निमन्थनम्। वैश्वदेवीन्यायेनाग्निमन्थनीया अन्वाह। अथ वेदिश्रोण्योत्तरयेत्येवमादिना स्थित्वा "नमः प्रवक्त" इत्या-दिसप्तदशसामिधेन्यः। आवाहने आज्यभागौ पशौ वैकल्पिकौ। करणपक्षे आवाह्य "इन्द्राग्नी आवह वनस्पतिमावह देवांआज्य-पामि" त्यादि। आज्यभागाभावे "इन्द्राग्नीअग्नआवहे" ति वि-शेषः। अग्नआवहेति तु प्रथमदेवतामिति वचनात्। संमार्गान्ते स्पृष्टोदकं प्रवृताहुतीर्जुहोति प्रत्यगुदगाहवनीयादवस्थायेत्येवमा-दिना धर्मेण। "जुष्टोवाचेभूयासमि" त्येकामाहुतिं हुत्वा ततः पुनरादाय सकृद्गृहीतेन पश्चाहुतीर्जुहोति। "स्वाहावाच-स्पतये स्वाहासरस्वत्यै स्वाहासरस्वते महोभ्यः सन्महोभ्यः स्वाहा स्वाहावाच" इत्यादीनां चतुर्णां मन्त्राणामन्ते स्वा-हाकारो न कर्तव्यः। मन्त्रादावेव पठितत्वात्। त-

था चोक्तं स्वाहाकारान्तैर्मन्त्रैर्न चेन्मन्त्रे पठित इति । सवनीयपशावेवायं होमो नान्यत्रेति केचित् । एषां मन्त्राणां लिङ्गोक्ता देवता । उत्तमस्य तु ब्रह्मा । अथ "प्रशास्तस्तीर्थेनप्रपद्यस्वे" ति प्रशास्तारं तीर्थेन प्रपादयति । एवमुक्तो मैत्रावरुणश्चात्वालोत्करावन्तरेणाभिहृततरेण पादेन विहारं प्रपद्यते । होता तस्मै प्रत्यङ्मुखायावस्थिताय प्राङ्मुखो दण्डं प्रयच्छति । दक्षिणोत्तराभ्यां पाणिभ्यां "मित्रावरुण प्रयच्छामी" त्यन्तेन मन्त्रेण । प्रशास्ता तथाभूताभ्यामेव पाणिभ्यां होतृपाण्योरधस्ताद्गृह्णाति । "मित्राव० भूयासमि" त्येतेन मन्त्रेण । प्रतिगृह्य उत्तरेण होतारमतिव्रजेद्दक्षिणेन दण्डं हरेत् । न च दण्डेनात्मानं वान्यं वा उपस्पृशेत् आप्रैषवचनात् । दक्षिणे होतृषदनात् वेदेरुत्तरश्रोणेर्बर्हिः प्रह्वोवस्थाय प्रेषितो वेद्यां दण्डमवष्टभ्य ब्रूयात् होता होतृषदनाभिमन्त्रणादिं स्रुगादापनान्तं प्रकृतिवत्करोति । अथैकादशप्रयाजा भवन्ति । तेषां प्रैषाः । " होतायक्षदग्निंसमिधात्सुषमिद्धामि"ति प्रथमं सूक्तम् । अध्वर्युणा प्रेषितः मैत्रावरुणः प्रैषैर्होतारं प्रेषयेत् । होता यजत्याप्रीभिः । तत्रापि तनूनपान्नराशंसयोः व्यवस्था प्रकृतिवद्द्रष्टव्या । अथाऽऽप्रीव्यवस्थोच्यते । " समिद्धो अग्निरि" ति शुनकानाम् । "जुषस्वनः समिद्धामिं" ति वसिष्ठानाम् । "समिद्धोअद्यमनुष" इति शुनकवसिष्ठव्यतिरिक्तानां सर्वेषाम् । तत्र "समिद्धोअद्यमनुषोदुरोणे" इत्येतत्सूक्तम् । तत्र अश्व्यादीनां नाराशंस एव द्वितीयो भवति । अस्य सूक्तस्य द्वितीयामुद्धृत्य नराशंसस्य महिमानमेषामिति वासिष्ठी आवपेत् । इति वृत्तिकारोक्तम् । यथाऋषिं वा आप्रीया भवन्ति । तत्र यथाऋषि आप्रीविभागार्थं भगवता शौनकेन श्लोक उक्तः । कण्वोङ्गिरोगस्त्यः शुनको विश्वामित्रोत्रिरेव च । वसिष्ठः कश्यपो वध्न्यश्वो

जमदग्निरथोत्तम इति । "सुसमिद्धोनआवहे"त्ये तत्प्रथमं काण्वाना-म् । "समिद्धोअग्नआवहे" ति तद्यतिरिक्तानामङ्गिरसानाम् । "समिद्धोअद्यराजसी" त्यगस्त्यानाम् । "समिद्धोअग्निर्निहित" इ-ति शुनकानाम् । "समित्समित्सुमना" इति विश्वामित्राणाम् । "सुसमिद्धायशोचिष" इति अत्रीणाम् । "जुषस्वनः समिद्ध" मिति वसिष्ठानाम् । "समिद्धोविश्वतस्परी" ति कश्यपानाम् । "इमांमेअग्नेसमिधंञ्जुषस्वे" ति वध्र्यश्वानाम् । "समिद्धोअ-द्ये" ति शुनकवध्र्यश्वव्यतिरिक्तानां भृगूणाम् । इति यथर्ष्याप्री-विवेकः । प्राजापत्ये तु पशौ शुनकवसिष्ठसहितानां सर्वेषामपि जामदग्न्या एव "समिद्धोअद्यमनुषोदुरोण" इत्येता भवन्ति । अ-त्रापि नाराशंस एव वासिष्ठीद्वितीयो भवति । इत्याप्रीव्यवस्था ॥ अथ प्रयोगानुसारेण दशसु प्रयाजेषु समाप्तेषु पर्यग्नये प्रेषितः प्रशास्तानभिहिंकृत्य "अग्निर्होतान" इति तृचमन्वाह । शस्त्रे-ष्वेव होत्रकाणामभिहिंकार इति वचनात् । आद्योत्तमे त्रिः । पुनः प्रेषितः "अजैदग्निर" त्युपप्रैषमनवानमुक्त्वा अन्तर्वेद्यां द-ण्डं निधाय आसीत । इतः प्राक् दण्डनिधानं न कर्तव्यम् । अत्र प्रसङ्गादध्रिगौ ऊह्यानि पदानि वक्ष्यन्ते । "मेधपतये मेधपतिभ्यां मेधपतिभ्यः, मेधं मेधौ मेधान् मेधां मेधे मेधाः" इति वा । "अस्मै आभ्याम् एभ्यः अस्यै आभ्याम् एभ्यः एनम् एनान् एनां एनेः एना अस्य अनयोः एषाम् अस्याः अनयोः आसां शरीरं शरीरे शरी-राणि त्वचं त्वचौ त्वचः वपां वपेवपाः वक्षः वक्षसी वक्षांसि बाहुः बाहून् दोषणि दोषाणि अंसौ अंसान् अच्छिद्रे अच्छिद्राः श्रो-णी श्रोणीः ऊरूः ऊरून् अष्ठीवन्तौ अष्ठीवन्तः वनिष्टुं वनिष्टू वनिष्टून्" इति ऊहः । "मेधांसयूथ्यः शरीरं वारयध्वात् अ-नूनंकृणुतात् खनतात् सृजतात् छमितारः अध्रिगाउ अपाप"

इत्यवसानानि । अथ प्रयोगः । होता अध्रिगुं यथापठितमेवाह "दैव्याः शमितार" इत्यादि "अपापे" त्यन्तम् । तत्र "अ-स्नारस्यः संसृजतात् शमितारः अपापाघृतानि" यथास्थान उ-पांशु । "अध्रिगोशमी" त्यादि विरुक्त्वा "शमितारोयदत्रमि" ति जपित्वा दक्षिणावृदावर्तते होता मैत्रावरुणश्च सव्यावृतौ ब्र-ह्मयजमानौ। के चित्तूष्णीमावर्तनमिति वदन्ति । संज्ञप्ते पशावावर्ते-रन् । अथ मैत्रावरुणस्तोकेन्वाह । पूर्ववद्दण्डमादायानभिहिंकृत्य । "जुषस्वसप्रथस्तममि" त्येका "इमन्नोयज्ञमि" ति नवर्चं सू-क्तम् । आद्योत्तमे त्रिः । अथ होता तस्मिन्नेवासने पुनर्निरस्यो-पविशति । स्रुगादापने पशाविति वचनात् । ततः स्रुग्वदापनमा-ह । अथ प्रेषितः प्रशास्ता "होतायक्षदग्निस्वाहे" ति प्रैषं ब्रू-यात् । होता आप्र्योत्तमया यजति । वार्त्रघ्नावाज्यभागौ । प्रैषौ वैकल्पिकौ । अप्रैषपक्षे याज्यानुवाक्ये होता ब्रूयात् पौर्णमासव-त् । सप्रैषपक्षे अनुवाक्याप्रैषं मैत्रावरुणो ब्रूयात् । "होतायक्ष-दग्निमाज्यस्यजुषन्तां हविर्होतर्यजे" ति पूर्वस्याज्यभागस्य प्रै-षः । "होतायक्षत्सोममाज्यस्यजुषतां हविर्होतर्यजे" त्युत्तरस्य । सर्वत्र होतायक्षदिति प्रैषादिः । होतर्यजेति प्रैषान्तः । "३ ये-यजामहेजुषाणोअग्निराज्यस्यवेतू ३ वौ० ये ३ यजामहेजुषाणः सोमआज्यस्यहविषोवेतू३ वौ०"। देवतादेशो न कर्तव्यः सप्रैषत्वा-त् । अथ वपायागः । "आवृत्रहणावृत्रहभिरि" त्यनुवाक्या । "होतायक्षदिन्द्राग्नीवपायामेदसोजुषेतामि" ति प्रैषः । "शुचिन्नु-स्तोममि" ति याज्या । चात्वाले मार्जयन्ते । प्रशास्ता दण्डं नि-धाय मार्जनं करोति ब्रह्मा च "इदमापः प्रवहते" त्येतयर्चा "सु-मित्र्या० द्विष्मे" इति मन्त्रेण च । तीर्थेन निष्क्रम्य होतृमैत्रावरु-णावासीतामापुरोडाशश्रपणात् । श्रृते पुरोडाशे अनामन्त्रितावे-

व तीर्थेन प्रविश्य पुरोडाशेन चरतः । "अभरतंशिक्षतामिं" त्य-नुवाक्या । "होतायक्षदिन्द्राग्नीपुरोडाशस्यजुषेतांहविर्होतर्यजे" ति प्रैषः । "गीर्भिर्विप्र" इति याज्या । अथ पुरोडाशास्विष्टकृत् । "इडामग्न" इत्यनुवाक्या । "होतायक्षदग्निंपुरोडाशस्यजुषतामि" ति प्रैषः । "स्वदस्वहव्ये" ति याज्या । निगदोत्र न भवति प-शौ नेति वचनात् । प्रकृतिवदिडोपह्वानम् । कर्मित्वान्मैत्रावरुणो-पि इडां भक्षयति । अत्र न मार्जनम् । न तावन्मार्जनं पशाविति वचनात् । ततो दक्षिणाग्रहणम् । अथ मनोतायै संप्रेषितः प्रशा-स्तानभिहिंकृत्य "त्वं ह्यग्नेप्रथमोमनोते"ति त्रयोदशर्चं सूक्तमन्वाह । आद्योत्तमे त्रिः । अथ हविर्यागः । "उभावामिन्द्राग्नी" इत्यनुवा-क्या । "होतायक्षदिन्द्राग्नीच्छागस्यहविषआत्तामद्येत्यादि०"घस्तां-नूनं०करतएवेन्द्राग्नीजुषेतांहविर्होतर्यजे" ति प्रैषः । "प्रचर्षणिभ्यः पृतनाहवेष्वि" ति याज्या । अर्द्धर्चे आरमेद्वसाहोमार्थम् । वसाहोमे कृते उत्तरमर्द्धर्चं ब्रूयात् ॥ अथ वनस्पतियागः । "देवेभ्योवन-स्पते हवींषि"इत्यनुवाक्या । "होतायक्षद्वनस्पतिमभिहिपिष्टतम-यारभिष्ठयारशनयाधीतं यत्राग्नेराज्यस्य हविषः प्रियाधामानि यत्र सोमस्याज्यस्य हविषः प्रिया० नि यत्रेन्द्राग्न्योश्छागस्य हविषः प्रि० यत्र वनस्पतेः प्रियापाथांसि यत्र देवानामाज्यपानांप्रि-या० नियत्रेन्द्राग्न्यो० याधामानि यत्राग्नेर्होतुः प्रियाधामानि तं-त्रैतं प्रस्तुत्येवोपस्तुत्येवोपावस्रक्ष इभीयां समिवक्रत्वीकरदेवं देवो वनस्पतिर्जुषतां हविर्होतर्यज" । एवं सर्वत्रदेवतावाहनक्रमेण देवता निगमयेत् । आज्यभागयोरकरणपक्षे द्वयोरुद्धारो वनस्पतिस्विष्ट-कृत्सूक्तवाकप्रैषेषु । " वनस्पतेरशनयानिपूये"ति याज्या । अथ स्विष्टकृतः " पिप्रीहिदेवानि"ति पुरोनुवाक्या । " होतायक्षद-ग्निंस्विष्टकृतमयाडग्निरग्नेराज्यस्यहविषः प्रियाधामान्ययाट् सोम-

मस्याज्यहविषः प्रि० डिन्द्राग्न्योश्छागस्य हविषः प्रि० ड्वनस्पतेः प्रियापाथांस्य० यऋडूदेवानामाज्यपानां० यक्षदग्ने० हविर्होतर्यज "अग्नेयदद्ये" ति याज्या । निगदोत्र न भवति आदेशश्च पशौ नेत्युक्तत्वात् सप्रैषत्वाच्च । पूर्ववदिडोपाह्वानम् । इडां मैत्रावरुणोपि भक्षयति । न मार्जनम् । एतावन्मार्जनं पशाविति वचनात् । अथैकादशानुयाजाः । "देवंबर्हिरि" त्येतत्तृतीयं प्रैषसूक्तम् अध्वर्युणा प्रेषितः प्रशास्ता प्रैषैर्होतारं प्रेष्यति । प्रशास्त्रा प्रेषितो होता "देवंबर्हिरि" त्यादिभिर्यजति । याज्या उच्यन्ते । "देवंबर्हिरि" त्येका । "देवीर्द्वारि" इत्यादिकाः षट् । "देवोनराशंस" इत्यष्टमः । "देवोवनस्पतिरि" ति नवमः "दिवंबर्हिर्वारितनामि" ति दशमः । "दिवोअग्निः स्विष्टकृदि" त्युत्तमः । अनवानं प्रेष्यत्यनवानं यजति । उत्तमा तु प्रकृत्या वा । अथ सूक्तवाकार्थमाश्रावणे कृते अप्रेषित एव मैत्रावरुणोग्निमद्येतिसूक्तवाकप्रैषं ब्रूयात् । अत्र वनस्पतिवर्जमावाहनक्रमेणैव देवता निगमयेत् । "अग्निमद्य० डाशंगृह्णन्नग्नयआज्यंगृह्णंत्सोमायाज्यंबध्नन्निन्द्राग्निभ्यां छागं सूपस्था अ० अग्नयआज्येनेन्द्राग्निभ्यां छागेनाघस्तान्तं मेदस्तः प्रतिपचताग्रभीष्टामवीवृधेतां पुरोडाशेनत्वामद्य" त्यादि । आज्यभागयोरकरणपक्षे तयोरुद्धारः । प्रैषान्ते दण्डमाहवनीये प्रक्षिपेत् । सावभृथे तु कर्मणि अप्सु प्रक्षिपेत् । अथ होता सूक्तवाकादिप्रायश्चित्तहोमान्तं प्रकृतिवत्करोति । सूक्तवाके "अग्निरिदं० सोमइदं० इन्द्राग्नीइदं० जुषे० धेतां० क्रातां वनस्पतिरिदं० देवाआज्यपा" इत्यादि । वेदस्तरणं कृताकृतम् । प्रायश्चित्तानन्तरमुभावपि अग्निपशुके व्यवस्य ततः तीर्थेन निष्क्रम्य ततो हृदयशूलं भूमौ प्रक्षिप्यमाणं सर्वे अनुमन्त्रयेयुः बहुवचनत्वात् । "शुगसी" त्यनेन मन्त्रेण । तस्योपरिष्टादप उप-

स्पृशन्ति । "द्वीपेराज्ञ" इत्यादि० "द्विष्म" इत्यन्तेन मन्त्रेण । अथ हृदयशूलमनवेक्षमाणास्तमप्रत्यायन्तः प्रत्येकं तिस्रस्तिस्रः स-मिधः कुर्वते । "अग्नेः समिदसितेजोमेदेही"ति प्रथमाम् । "एधो-स्येधिषीमही"ति द्वितीयाम् । समिदसिसमेधिषीमही"ति तृतीयाम् । ततस्तीर्थेन प्रविश्य प्रत्यगुदगाहवनीयादवस्थायाहवनीयमुपतिष्ठते "आपोअद्यान्वचारिषमि"त्यनयर्चा । तत्र स्थित एव समिधोभ्या-दधाति । यथागृहीतम् । "अग्नेः समिदसितेजोसितेजोसिमेदेहि स्वाहा सोमस्यसमिदसिदुरिष्टेर्मापाहि स्वाहा पितॄणां समिदसिमृ-त्योर्मापाहिस्वाहा" । तत आहवनीयमुपतिष्ठते " ओश्रम" इत्य-नेन ॥ इति पशुतन्त्रम् ॥ मन्द्रादिस्वरविशेषाश्च प्रकृतिवद्द्रष्टव्याः । सर्वेषां पशूनामेतदेव तन्त्रम् । प्रदानानामुक्ताः प्रैषाः । अस्मिन् खण्डे एकादश पशवः समाम्नाताः ते च एकादशिन्यामुच्यन्ते । तेषामेता देवताः । अग्निः, सरस्वती, सोमः, पूषा, बृहस्पतिः, वि-विश्वदेवा, इन्द्रः,मरुतः, इन्द्राग्नी, सविता, वरुण, इति । अग्नीषो-माविमंसुम इत्यस्मिन्खण्डे अष्टादश पशव उक्ताः । तेषां देवताः । अग्नीषोमौ, मित्रावरुणौ, प्रजापतिः, सूर्यः वायुर्नियुत्वान्, वा-युः, अदितिः, विष्णुः, विश्वकर्मा, त्वष्टा, सोमापूषणौ, आदि-त्याः, द्यावापृथिवी, रुद्रः, अश्विनौ, इन्द्रो वृत्रहा, वाक्, सरस्वा-निति । एवमेकोनत्रिंशाः पशवः सूत्रकारेण समाम्नाताः । एषां पशूनां वपापुरोडाशहविर्लक्षणप्रदानत्रयस्य याज्यानुवाक्या "अ-ग्नेनयसुयथारायेअस्मानि" त्यारभ्य "यस्यव्रतंपशवोयन्तिसर्वे" इत्येवमन्ताः । ताः यथाक्रमेणैकैकस्या देवतायाः षद् षद् ऋचो ग्राह्याः । आद्यास्तिस्रोऽनुवाक्याः । उत्तरास्तिस्रो याज्याः । अस्मिन्सूत्रे असमाम्नातानां पशूनां देवतालक्षणा याज्यानुवा-क्या । इत्युक्तलक्षणविशिष्टा याज्यानुवाक्या यथासम्भवं ग्रा-

ह्याः। अयं तु विशेषः। प्रैषासमाम्नाये अग्नीषोमदेवत्याः पठिताः। तत्र देवतान्तरयुक्तेषु पशुषु वपापुरोडाशहविःषु देवतान्तरमग्नीषोमस्थाने निगमयेत्। छागस्थाने पशुतन्त्रे गोपशौ गोशब्दोस्राशब्दयोरन्यतरेणैव निगमनं कुर्यात् नान्येन तद्वाचकेन मेषशब्दाविशब्दयोरन्यतरेणैव हयशब्दाश्वशब्दयोरन्यतरेणैव। अन्यजातीयानां यथार्थं निगमनं भवति। पशुदेवताया एकत्वे बहुत्वे वा "आदत् घसत् करत् जुषतां अद्यत् अग्रभीत् अवीवृधते" ति देवताभिधायिनां पदानां प्रैषेषु यथार्थमूहः कर्तव्यः। नाभिरूपमा मेदो हविरिसनूह्यानि। एषां पशूनां प्राजापत्य उपांशु। सावित्रसौर्यवैष्णववैश्वकर्माणश्चोपांशु इति केचित्। तेषां प्रैषे तु देवताप्रत्यक्षवाचकपदानामुपांशुत्वम्। आददादीनां वैकल्पिकमुपांशुत्वम्। येऽन्ये तद्वचनाः परपक्षास्तानुपांशूच्चैर्वा प्रत्यक्षमुपांश्विति वचनात्। आदत् घसत् करत् इति पदत्रयस्य नित्यमेवोपांशुत्वं पुनर्विधानात्। उक्तादन्यप्रैषेषु उच्चैरेव प्रयोक्तव्यम्। याज्यानुवाक्ये तूपांश्वेव। अयं सर्वेषां पशूनां साधारणविधिः॥

अथ सौत्रामण्याः प्रयोग उच्यते॥ तस्य ऐन्द्राग्नवत्कल्पः। विशेषस्तूच्यते। आश्विनसारस्वतैन्द्राः पशवः। वाहस्पत्यो विकल्पेन चतुर्थः। आश्विनश्छागः। सारस्वतो मेषः। ऐन्द्रो मेषः। ऐन्द्रसावित्रवारुणाः पशुपुरोडाशाः। आवाहने "अग्निमग्नआवह सोममावह अश्विनावावह सरस्वतीमावह इन्द्रमावह वनस्पतिमावह" ततो ग्रहदेवताः सर्वाः पृथगादिश्य सकृदेवावहेत्। एकप्रदानत्वात्। अश्विनौ सरस्वतीमिंद्रं सुत्रामाणमावह इति केचित्। "देवाआज्यपामि"त्यादिपुरोडाशदेवतानामावाहनं भवति। आवाहनादूर्ध्वमुत्पत्तेः। अध्रिगौ विशेषः। "मेधपतिभ्यो मेधान् प्रै-

भ्योअग्निभरत० अन्वेनान्माता उदीचीनामेषां पदोनिधत्ताव शरीराणि एकधैकधैषां त्वच आ पुरानाभ्यां अपि० वपाउत्० दन्तरन्तरेत्रोष्माणंश्येनमेषां वक्षांसि कृ० साबाहूनूशलादोषणी० वामानच्छिद्राः श्रोणीकवयोरुन्त्स्रेकपर्णाष्ठीवतः षड्विंशतिरेषां गात्रमेषामनूनङ्कृणुताव ऊव० अस्नार० वसिष्टूनेषांमारा०” इत्यूह्यानि पदानि। अथ वपायागे प्रथममश्विनोः। “ आयश्रातां नासासे ” त्यनुवाक्या “ होता० अश्विनौछागस्यवपायामेदसोजुषतां हविर्होतर्यज” इति प्रैषः। “उदुस्तोमासो अश्विनो” रिति याज्या। अथ सरस्वत्याः। “ एकाचसत्सरस्वतीनदीनामि” त्यनुवाक्या। “ होतायक्षत्सरस्वतींमेषस्यवपायामेदसोजुषतां हविर्होतयज ” इति प्रैषः। “प्रक्षोदसाधायसे ” ति याज्या। अथैन्द्रस्य। “इद्रं नवोनेमधिता” इत्यनुवाक्या। “ होता० इन्द्रंमेषस्यवपाये ” ति प्रैषः। “ उरुन्नोलोकमनुने ति” याज्या। प्रैषेषु यथार्थमूहः। मार्जनान्ते ग्रहयागः इति के चित्। “युवंसुराममश्विने” ति ग्रहाणां पुरोनुवाक्या। “ होतायक्षत्सरस्वतीमिन्द्रंसुत्रामाणमि ”ति सूत्रोक्तः प्रैषः। “ पुत्रमिवपितरावश्विनौभे ” ति याज्या। “ अग्नेवीही ” त्यनुवषट्कारः। “ सुरासुतस्याग्नेवीही ” ति वा। “ नानाहिवामि ” ति मन्त्रेण स्थालीस्थां ग्रहस्थां वा सुरामवेक्षेत। अधोबाहू कृत्वा “ सोमएष ” इति सोममवेक्षेत। उपहूय “ यदत्ररिप्तमि ” ति प्राणभक्षं भक्षयति। प्रतिभक्षं मन्त्रावृत्तिर्भवति। अथ हविर्यागः। तत्र प्रतिपशु मनोता मन्त्रावृत्तिः सकृदेवेत्येके। प्रथममश्विनोः। “ आनोदेवेभिरुपयातमर्वागि ” त्यनुवाक्या। “ होतायक्ष० दश्विनोच्छागस्यहविष आनामद्य० घस्तांनूनं० करतएवाश्विनौजुषेतांहविर्होतर्यजे ” ति प्रैषः। “ हिरण्यत्वङ्मधुवर्णोघृतस्नुरि ” ति याज्या। अथ सर-

स्वत्याः। " सरस्वत्यभिन " इत्यनुवाक्या। " होताय० सरस्वतीमेषस्यहविष आददद्य०घसन्नूनं० करदेवंसरस्वतीजुषतां० र्यजेति " प्रैषः। "यस्तेस्तन " इति याज्या। अथेन्द्रस्य "इन्द्रोराजाजगत " इत्यनुवाक्या। " होता० दिन्द्रंमेषस्यहविषः आददद्य० घसन्नूनं करदेवेन्द्रोजुषतांह० र्यज"। इति प्रैषः। "स्वस्तयेवाजिभिश्चे " ति याज्या। अथ वनस्पतियागः। पूर्ववत्। प्रैषे विशेषः। " यत्राग्नेराज्यस्यहविषः प्रि० यत्रसोमस्याज्यस्य० यत्राश्विनोश्छागस्यहविषः प्रि० यत्रसरस्वत्यामेषस्यहवि० यत्रेन्द्रस्यमेषस्यहविषः प्रि० यत्रवनस्पतेः प्रियापाथांसि० तत्रैतान्प्र० रभीयसइवकृत्वी०र्यज "। अथ पुरोडाशयागः। ऐन्द्रसावित्रवारुणाः पशुपुरोडाशाः। प्रथममिन्द्रस्य " यइन्द्रशुष्म " इत्यनुवाक्या। " हो० दिन्द्रंपुरोडाशस्य जुषतामि " ति प्रैषः। "प्रससाहिष " इति याज्या। अथ सवितुः। " सद्यानोदेवः सविते " त्यनुवाक्या। " हो० त्सवितारंपुरोडाशस्यजुषतामि " ति प्रैषः " धियंवाजयन्त " इति याज्या। अथ वरुणस्य। " अयंसुतुभ्यंवरुणस्वधावः " इत्यनुवाक्या।" हो०द्वरुणंपुरोडाशस्यजुषतामि " ति प्रैषः। " तद्धिनक्तन्तदिवे " ति याज्या। अथ हविषां पुरोडाशानां च स्विष्टकृत्तन्त्रेण भवति। " पिप्रीहि देवानि " त्यनुवाक्या। " होतायक्षदग्निस्विष्टकृतमि " त्यादि। अयाडग्नेरित्यादि वनस्पतिप्रैषवत्। प्रियाधामान्ययाडिति विशेषः। तत्र पुरोडाशदेवतानां निगमनं नास्ति। आवाहनादूर्ध्वमुत्पत्तेः। " अग्नेयदद्ये " ति याज्या। सूक्तवाकप्रैषे विशेषः। अग्निमद्येत्याज्यभागान्तमुक्त्वा " वध्नन्नश्विभ्यांच्छागंवध्नंत्सरस्वत्या इन्द्रायमेषौसूपस्था " इत्याद्याज्यभागान्तमुक्त्वा " अश्विभ्यांछागेनसरस्वत्या इन्द्रायमेषाभ्यामद्यतान्मेदस्तः प्र-

तिपचताग्रभीषुरवीबृधन्तुपुरोडाशैस्त्वामद्ये ” त्यादि । सूक्तवाके । आज्यभागोत्तरम् “अश्विनाविदं० जुषेतां० सरस्वतीदं० जुषतां० इन्द्रइदं० जुषत कृत वनस्पतिरिदं० अश्विनौसरस्वतीन्द्रः सुत्रामाइदं० देवाआज्यपा ” इत्यादि । हृदयशूलाभिमन्त्रणे “शुचस्थोयोस्मानी ” ति विशेषः । अन्यत्सर्वमैन्द्राग्नवत् । संस्थितेवभृथेष्टिः । तासुत्तरत्र वक्ष्यामः । केषां चिन्मते सौत्रामण्या बार्हस्पत्यः पशुश्चतुर्थो भवति । तस्या “ बृहस्पतेयापरमापशवादि ” ति षट्ऋचः सूत्रपठिता अवदानत्रयस्य याज्यानुवाक्याः । सौत्रामण्यामेव रौद्रं वृषभं के चिदिच्छन्ति । तैः सह प्रयोगे मेषशब्दयोरन्यतरः प्रयोक्तव्यः । समाप्ता सौत्रामणिः ॥

अथ प्रायश्चित्तानि ॥ तत्र ब्रह्मकर्तृकाणि प्रायश्चित्तान्युच्यन्ते । यदा मन्त्रकर्मणोर्विपर्यासो भवति, अथ वा अन्तरायो भवति, स च विपर्यासोन्तरायः स्वयं दृष्टो भवति, अन्येनाख्यातो भवति, यदा वा अन्तराया विपर्यासाश्च समकालिन्य अनेके भवन्ति, तदाजान्वाच्याहुतिमेकां जुहुयात् । यजुर्वेदाच्चेत् “भुवः स्वाहा ” इति दक्षिणाग्नौ जुहुयात् । आग्नीध्रीयप्रणयनादूर्ध्वं यजुर्भ्रेषे “भुवः स्वाहा” इत्याग्नीध्रीये जुहुयात् । न दक्षिणाग्नौ । सामवेदभ्रेषे “स्वःस्वाहे ” त्याहवनीये । यदि त्रिभ्यो वेदेभ्यो भ्रेषो भवति यद्वा अमुकवेदत इत्यज्ञातो भवति तदा “ भूर्भुवः स्वः स्वाहा ” इति त्रिभिर्मन्त्रैरेकामाहुतिमाहवनीय एव जुहुयात् । प्राक् प्रयाजेभ्योङ्गारं बहिष्परिधिनिर्वृत्तं स्रुवदण्डेनाभिनिदध्यात् “ मातप ” इति मन्त्रेण । अत्र सूत्रे बहिःपरिधिशब्दे विप्रतिपन्नाः के चित् नात्र परिधिशब्देन परिधिदेशा गृह्यन्त इति आहुः । अन्तःपरिधिदेशे निवपेयुरितिवत् देशशब्दाभावात् । अन्ये तु प्राच्यां दिशि परिध्यभावेपि प्रायश्चित्ताभिधानादितरत्रापि दिक्षु

परिधिदेश एव गृह्यते इत्याहुः। एतस्मिन्मते परिधिस्थापनात्प्रागप्यङ्गारनिर्गमे प्रायश्चित्तमेतद्भवति। तमङ्गारं बहिःपरिधीनिर्गतं प्रतिदिशम् “ असुंमाहिंसीरि ” ति मन्त्रेण स्रुवदण्डेनाभिनिदध्यात्। तद्यथा। पुरस्ताच्चेदङ्गारो निर्गतः तत “ अध्वर्युंमाहिंसीर्यजमानंमाहिंसीः” । दक्षिणतश्चेन्निर्गतस्ततो “ ब्रह्माणंमाहिंसीर्यजमानंमाहिंसीः ” । पश्चाच्चेन्निर्गतस्ततः “ होतारंमाहिंसीः पत्नींमाहीमीर्यजमानंमाहिंसीः ” । उत्तरश्चेन्निर्गतस्तत “ आग्नीध्रंमाहिंसीर्यजमानंमाहिंसीरि ” ति। अथैनमङ्गारमाहवनीये निक्षिपेत् “आहंयज्ञमि” ति मन्त्रेण। अथ तमङ्गारमभिजुहुयात् “सहस्रशृङ्ग ” इति मन्त्रेण। इति वहिष्परिध्यङ्गारपतनप्रायश्चित्तम्॥

अथ प्रायश्चित्तप्रकरणे अनेककर्तृयुक्ते कर्मणि कर्तृविशेषमनादिश्य यत्र जुहोति जपतीति वा कर्मचोदना भवति तत्र ब्रह्माणं कर्तारं प्रतीयात्। यत्र तु कर्मणि ब्रह्मा नास्ति तत्र कर्तैव जुहुयाज्जपेद्वा। विपर्यासान्तरिते मन्त्रे कर्मणि वाख्याते वोपलक्ष्य वा जान्वाच्याहुतिं जुहुयादित्यादावनुसन्धातव्यम्। अस्मिन्प्रकरणे प्रायश्चित्तेष्टीनां प्रधानहाविर्यागगतमुपांशुत्वमनुसन्धातव्यम्। अन्यदपि परिभाषासिद्धं यथास्थानेनुसन्धेयम्॥

विध्यपराधे प्रायश्चित्तिर्वेदितव्या॥ अयमर्थः। यत्र विहितस्याकरणं भवति अविहितस्य करणं विहितस्याप्यङ्गहीनस्य करणं तत्रैवं विध्यपराधे प्रायश्चित्ताख्यं कर्म कर्तव्यम्। तच्च विध्यपराधज्ञानानन्तरं कार्यमित्युत्सर्गः। अपवादमग्रे वक्ष्यामः। शिष्टाभावे प्रतिनिधिर्भवति। अयमर्थः। यत्र विहितं द्रव्यं कर्मकाले नास्ति जातमपि वा यत् स्तोकत्वात्प्रधानमपि संपादयितुं न शक्नोति तत्र विहितद्रव्यसदृशं द्रव्यान्तरमुपादाय कर्म कर्तव्यम्। यथाऽऽज्य-

पयसोः परस्परं प्रतिनिधित्वम् । यथाह कौण्डिन्यः । आज्याभावे पयः पयसोऽभावे आज्यं तावत् । यथोक्तवस्त्वलाभे तु ग्राह्यं तदनुकारि यत् । यवाभावे हि गोधूमा व्रीह्यभावे तु शालय इति मनुः । प्रतिनिधौ न प्रायश्चित्तम् । अन्वाहिताग्नेः प्रयाणोपपत्तौ पृथगग्नीन्नयेयुः । स्पष्टोर्थः । यदा विहृताग्निस्तस्यां रात्र्यां प्रयासमन्तरेण स्थातुं न शक्नोति तदाग्नीन् पृथक् पात्रे कृत्वा तानग्नीन्बहवः पुरुषा नयेयुः । अथ पक्षान्तरमाह । "तुभ्यंताअङ्गिरस्तमे" ति वाज्याहुतिं हुत्वा समारोपयेत् । "तुभ्यंताअं० येमिरेस्वाहाकामायेदम्" इत्याहवनीये हुत्वा समारोपयेद्वा । "अयन्तेयोनिर्ऋत्विय" इत्यरणीं गार्हपत्ये प्रतितपेत् । "अयन्तेयोनि० नोबर्द्धयागिरः" अनेन मन्त्रेण गार्हपत्ये प्रतितपेत् । नाग्न्यन्तरे । पाणी वा । अथ वा पाण्योः समारोपः । "यातेअग्नेयज्ञियातनूः जातवेदोभुवआजायमनः" इति मन्त्रेण गार्हपत्ये पाणी प्रतितपेत् । यदा तु दक्षिणाग्निः पृथगरणिर्भवति तदा तयोरेव पाण्योः समारोपणं कार्यं तूष्णीम् । मन्त्रेणेत्येके । यदुक्तं पाणिप्रतपनमरणीप्रतापनं च तदग्नीनामेकयोनित्त्वे गार्हपत्य एव कर्तव्यं नेतरयोरित्याहुः । अरणीसमारोपणं पाणिसमारोपणं चाहिताग्निना कर्तव्यं नाध्वर्युणेति भवनागाचार्यो मन्यते । मन्त्रेण स्वरादि सम्यगुच्चार्य समारोपणं कर्तव्यम् । अन्यथाग्नीनां लौकिकत्वं स्यात् ॥ एवमनन्वाहिताग्निरहुत्वा । अन्वाहिताग्नेः प्रत्यक्षानयनं नास्ति । विहारदेशे यत्र क्वापि संचारयितव्ये अनुच्छ्वसता संचारयितव्यम् । समारोपौ पूर्ववत्कर्तव्यौ । या तु विहृताग्नेराहुतिरुक्ता "तुभ्यंताअङ्गिरस्तमे" ति, सा अविहृताग्नेर्न भवति । ततो यथोक्तमाहिताग्निः प्रणयनं कुर्यात् । यदि पाण्योररणी संस्पृश्य मन्थयेत् । यदि पाण्योस्तया समारोपणं कृतं तदानीमग्निहोत्रकाले पाणि-

ध्यामरणीं तूष्णीं संस्पृश्य मन्थयेत् । " प्रत्यवरोहजातवेद० यजमानायशंयोः " इति मन्त्रं स्वयमुक्त्वा मन्थयेत् । अन्यो वा मन्थेत् । यजमानो मन्थनकाले यावदग्नेर्जन्म तावदरणी संस्पृशन्नास्ते । यदि उत्पादनप्रयत्नो निष्फलः स्यात्तदा प्रारम्भावसरे मन्त्रमावर्तयितव्यम् । यदि तु अरण्योः समारोपणंकृतं तदा अग्निहोत्रकाले यजमानो मन्त्रमुक्त्वा मन्थयेदेव । ततोऽग्निहोत्रम् । इति समारोपणप्रकरणम् ॥

अथाहवनीयबहिर्निर्गमनप्रायश्चित्तम् ॥ आहवनीयद्दीप्यमानमर्वाक् शम्यापरासात् आहवनीयस्यैकदेशः समस्तो वा यद्यायतनाद्बहिर्गच्छेत् शम्यापरासादर्वाक् तदा " इदन्तएकं पर० देवानांपरमेजनित्रे " अनेन मन्त्रेणायतनेऽग्निं प्रक्षिप्य तत्रैव व्याहृतिहोमः सर्वप्रायश्चित्तं च नाग्न्यन्तरे प्रायश्चित्तम् । ततूष्णीं प्रक्षेपो व्याहृतिहोमश्च यावत्प्रायश्चित्तकालमग्निश्चेर्ज्जति तदा प्रायश्चित्तं न स्फुलिङ्गमात्रस्य । इति बहिर्निर्गमनप्रायश्चित्तम् ॥

अथाग्निशम्यापरासातिक्रमे, स्वकाले दर्शपूर्णमासानुष्ठानाभावे, अन्यस्याग्निषु यजने, अस्याग्निषु अन्ययजने, अस्याग्निषु अन्येनाग्निना व्यवाये च प्रायश्चित्तम्। यदि त्वतीयाद्यमावास्यां पौर्णमासीं वातीयात् यदि नाऽन्यस्याग्निषु यजेत यदि वास्यान्योग्निषु यजेत यदि वाऽस्यान्योग्निरग्नीन्व्यवेयात् एतेषु पञ्चसु निमित्तेषु पाथिकृतीष्टिर्भवति । अग्नये पथिकृतेऽष्टाकपालं पुरोडाशं निर्वपेत् । तस्य याज्यानुवाक्ये " वेत्थाहिवेधो अध्वनअदेवानामपिपन्थामगन्मे " ति । शकटवहनक्षमो अनड्वान्दक्षिणा भवति । अथ वा पूर्णाहुतिं जुहुयात् । पूर्णाहुतिपक्षे जुह्वां द्वादशगृहीतं चतुर्गृहीतं वा " अग्नयेपथिकृतेस्वाहे " त्याहवनीये जुहु-

याव । " अग्निपथिकृतइदं० " ॥

अथ द्रव्यप्रायश्चित्तम् ॥ यदि वास्याग्निहोत्र उपसन्ने हविषि वा निरुप्ते चरेच्छ्वा पुरुषो वा विहारमन्तरियाव अग्निहोत्रद्रव्ये कुशेषु सादितेषु पूर्णमासादिषु हविर्निरुप्ते, रथशकटादिश्वमनुष्यजातिपशुपक्षिमार्जारमूषकनकुलादिभिर्विहारातिक्रमे, यजमानस्य प्रवासमरणइत्यादिनिमित्तेषु सत्सु पाथिकृतीष्टिः पूर्णाहुतिर्वा । इतरेष्टिमध्येऽमूनि निमित्तानि उत्पन्नानि तर्हि प्रक्रान्तेष्ट्या समानं तत्र पथिकृती कार्या । दर्विहोममध्ये चेत् प्रक्रान्तं समाप्यानन्तरं कर्तव्या । अग्निभिन्नव्यवाये इष्टेः प्राक् गामन्तरेण नयेत् । तत्र शुनो गमने शेषः । " इदंविष्णु " रेतयर्चा भस्मना शुनः पादानि प्लवेत् । प्रतिपदं मन्त्रावृत्तिः । "अनन्तरं तन्तुन्तन्वन्रजसो भानुवीही " सनयर्चा गार्हपत्याहवनीययोरन्तरं भस्मराज्योदकज्या च सन्तनुयाव । प्रतिधारा मन्त्रावृत्तिः । तत आहवनीयमनुगमय्य पुनः प्रणीय " यदग्नेपूर्वंप्रहि० सुमत्यावाजवत्या त्वग्नेसप्रथाअसि० तन्वते " इति द्वाभ्यामुपतिष्ठेत । अस्यां पथिकृदिष्ट्यां बलीवर्दो दक्षिणा । इति रथाद्यन्तरागमनप्रायश्चित्तम् ॥

यद्याहिताग्निर्ग्रामान्तरे मृतस्तदा मरणश्रवणानन्तरं पथिकृतिं कृत्वा अन्यवत्सेनान्यां गां दुग्ध्वा तस्मिन्नेव विहारे तूष्णींधर्मकं सायं प्रातरग्निहोत्रसंज्ञकं कर्मान्तरं यजमानस्य शरीरसंस्कारपर्यन्तं जुहुयाव । सर्वहुतं प्रजापतिध्यानं " प्रजायतयइदं " तद्यथा । अध्वर्युः प्राचीनावीती परिसमूहनादि कृत्वा गार्हपत्यदक्षिणार्धे तूष्णीमधिश्रयणादि कृत्वा दक्षिणत उद्वास्य तूष्णीं स्रुचि क्षीरं क्षिप्त्वा पलाशीसमिधमधस्ताद्धारयमाणो दक्षिणेन विहारं गत्वा आहवनीयस्य पश्चात्कुशेषु उपसाद्य समिधमाधाय तू-

ष्णीं सकृदेव सर्वं जुहुयात् । अन्यत्सर्वं लुप्। अत्रैव ब्राह्मणे विशेषः । यस्याः कस्याश्चिद्गोः पयसा पुत्रो जुहुयुः नाभिवान्यवत्सानियमः इत्येकः पक्षः । पुनः पक्षरमाह प्रवासमृतस्य अङ्गानामानयनपर्यन्तमाहवनीयादीनां प्रधारणं नात्र पूर्वोक्तहोमः । सर्वदा प्रज्वलेयुः सा तत्र प्रायत्तिः । इत्याहिताग्नेर्ग्रामान्तरमरणे प्रायश्चित्तम् । यद्याहितामरपक्षे मरणशङ्का स्यात् तदानीमारभ्य तस्य पक्षस्य शिष्टा अयः पक्षहोमन्यायेन हुत्वा दर्शं च कृत्वा पूर्वपक्षं नयेत् । इ जीवत एव । केचिद्दक्षिणायने मरणशङ्कायामपि उदगयनात्कुर्वन्ति । शास्त्रान्तरे वचनं दृश्यते ॥

अथ हविर्दोषप्रायश्चित्तानि ॥ यद्यानादूर्ध्वं प्रधानयागादर्वाक् केशादिभिर्हविर्दुष्टं तदा आज्येष्टैः सह प्रकृतामिष्टिं समाप्य यद्देवत्यं हविर्व्यापन्नं तस्यैवान्वाधानादि पुनर्यागः कर्तव्यः । एवं द्वयोर्बहूनां व्यापत्तौ द्र्ष्ट । एवं प्रधानयागोत्तरं नाशे शेषकार्यमाज्येनैव कर्तव्यं न पुनरापत्तिः । दुष्टानि हवींषि भिन्नसिक्तानि च तूष्णीमप्सु प्रक्षि । दुष्टसान्नाय्यं " प्रजापतेनत्वदेतान्यन्य० स्यामपतयोरयीं " इत्यनयर्चा वल्मीकद्वारि मध्यमेन पलाशपर्णेन जुहुया अप्सु वा तूष्णीं प्रक्षिपेत् । यदि सान्नाय्यं विष्यन्दमानं कुतीत्याग्निं भूमीं वा प्राप्नुयात् तत्सिक्तं तद्दुष्टं च तदेव । स्थितेनादुष्टेन यागः । यत्कुम्भ्यां बहिर्गमनमात्रेण विष्यन्दति तक्तमदुष्टं च । यदुष्टं तत् " महीद्यौः पृथिवीचन० भरीमा अनेनान्तः परिधिदेशे निनयेत् । परिध्यभावेपि सायन्दोहनातदोहं द्विधा कृत्वा एकं भागं दधिभावायातं कृत्वा ताभ्रधिपयोभ्यां यागः कर्तव्यः । प्रातर्दोहनाशे तत्स्थाने पुरो यजेत् । उभयदोषे ऐन्द्राग्नान् पञ्च

यात् । "अग्नयेपथिकृतइदं०" ॥

अथ व्यवायप्रायश्चित्तम् ॥ यदि वास्याग्निहोत्र उपसन्ने हविषि वा निरुप्ते चक्रीवच्छ्वा पुरुषो वा विहारमन्तरियात् अग्निहोत्रद्रव्ये कुशेषु सादिते दर्शपूर्णमासादिषु हविर्निरुप्ते, रथशकटादिश्वमनुष्यजातिपशुपक्षिसर्पमार्जारमूषकनकुलादिभिर्विहारातिक्रमे, यजमानस्य प्रवासमरणे इत्यादिनिमित्तेषु सत्सु पाथिकृतीष्टिः पूर्णाहुतिर्वा । इतरेष्टिमध्ये एतानि निमित्तानि उत्पन्नानि तर्हि प्रक्रान्तेष्ट्या समानं तत्र पथिकृतिः कार्या । दर्विहोममध्ये चेत् प्रक्रान्तं समाप्यानन्तरं कर्तव्या । अग्निभिन्नव्यवाये इष्टेः प्राक् गामन्तरेण नयेत् । तत्र शुनो गमने विशेषः । "इदंविष्णु" रेत्यर्चा भस्मना शुनः पादानि पूरयेत् । प्रतिपदं मन्त्रावृत्तिः । "अनन्तरं तन्तुन्तन्वन्रजसो भानुमन्वीही" सनयर्चा गार्हपत्याहवनीययोरन्तरं भस्मराज्योदकराज्या च सन्तनुयात् । प्रतिधारा मन्त्रावृत्तिः । तत आहवनीयमनुगमय्य पुनः प्रणीय "यदग्नेपूर्वंप्रहि० सुमत्यावाजवत्या त्वमग्नेसप्रथाअसि० तन्वते" इति द्वाभ्यामुपतिष्ठेत । अस्यां पथिकृदिष्ट्यां बलीवर्दो दक्षिणा । इति रथाद्यन्तरागमनप्रायश्चित्तम् ॥

यद्याहिताग्निर्ग्रामान्तरे मृतस्तदा मरणश्रवणानन्तरं पथिकृतिं कृत्वा अन्यवत्सेनान्यां गां दुग्ध्वा तस्मिन्नेव विहारे तूष्णींधर्मकं सायं प्रातरग्निहोत्रसंज्ञकं कर्मान्तरं यजमानस्य शरीरसंस्कारपर्यन्तं जुहुयात् । सर्वहुतं प्रजापतिध्यानं "प्रजापतयइदं" तद्यथा । अध्वर्युः प्राचीनावीती परिसमूहनादि कृत्वा गार्हपत्यदक्षिणार्धे तूष्णीमधिश्रयणादि कृत्वा दक्षिणत उद्वास्य तूष्णीं स्रुचि क्षीरं क्षिप्त्वा पलाशीसमिधमधस्ताद्धारयमाणो दक्षिणेन विहारं गत्वा आहवनीयस्य पश्चात्कुशेषु उपसाद्य समिधमाधाय तू-

ष्णीं सकृदेव सर्वं जुहुयात् । अन्यत्सर्वं लुप्त । अत्रैव ब्राह्मणे विशेषः । यस्याः कस्याश्चिद्गोः पयसा पुत्रो जुहुयुः नाभिवान्यवत्सानियमः इत्येकः पक्षः । पुनः पक्षरमाह प्रवासमृतस्य अङ्गानामानयनपर्यन्तमाहवनीयादीनां प्रधारणं नात्र पूर्वोक्तहोमः । सर्वदा प्रज्वलेयुः सा तत्र प्रायत्तिः । इत्याहिताग्नेर्ग्रामान्तरमरणे प्रायश्चित्तम् । यद्याहितानरपक्षे मरणशङ्का स्यात् तदानीमारभ्य तस्य पक्षस्य शिष्टा अयः पक्षहोमन्यायेन हुत्वा दर्शं च कृत्वा पूर्वपक्षं नयेत् । इ॒ जीवत एव । केचिद्दक्षिणायने मरणशङ्कायामपि उदगयनात्कुर्वन्ति । शास्त्रान्तरे वचनं दृश्यते ॥

अथ हविर्दोषप्रायश्चित्तानि ॥ यद्यानादूर्ध्वं प्रधानयागादर्वाक् केशादिभिर्हविर्दुष्टं तदा आज्येष्टैः सह प्रकृतामिष्टिं समाप्य यद्दैवत्यं हविर्व्यापन्नं तस्यैवान्वाधानादि पुनर्यागः कर्तव्यः । एवं द्वयोर्बहूनां व्यापत्तौ द्र॒ष्ट । एवं प्रधानयागोत्तरं नाशे शेषकार्यमाज्येनैव कर्तव्यं न पुनरापत्तिः । दुष्टानि हवींषि भिन्नसिक्तानि च तूष्णीमप्सु प्रक्षि । दुष्टसान्नाय्यं "प्रजापतेनत्वदेतान्यन्य० स्यामपतयोरयीं" इत्यनयर्चा वल्मीकद्वारि मध्यमेन पलाशपर्णेन जुहुया अप्सु वा तूष्णीं प्रक्षिपेत् । यदि सान्नाय्यं विष्यन्दमानं कुम्भीत्याग्नि भूमीं वा प्राप्नुयात् तत्सिक्तं तद्दुष्टं च तदेव । स्थतेनादुष्टेन यागः । यत्कुम्भ्यां बहिर्निर्गमनमात्रेण विष्यन्दति क्तमदुष्टं च । यदुष्टं तत् "महीद्यौः पृथिवीचन० भरीमा" अनेनान्तः परिधिदेशे निनयेत् । परिध्यभावेपि सायन्दोहनातदोहं द्विधा कृत्वा एकं भागं दधिभावायातं कृत्वा ताभ्यां दधिपयोभ्यां यागः कर्तव्यः । प्रातर्दोहनाशे तत्स्थाने पुरो यजेत् । उभयदोषे ऐन्द्राग्नान् पञ्च-

शरावपरिमितान् व्रीहीन्निरूप्य गार्हपत्ये श्रपयित्वा द्वयोः पात्रयोरुद्धृत्य तस्मादेव हविषःप्रचरणकाले अग्निमिष्ट्वा इन्द्रं यजेत। अग्निर्देवानां प्रथमं यजेदिति श्रुतेः। ऐंद्रमेवैके। अस्मिन्नपि पक्षे प्रचरणकाले ऐन्द्रं पञ्चशरावमोदनं विभज्येन्द्रं यजेत। आज्यान्वाहार्यादीनामल्पोपहतौ प्रोक्षणं सर्वप्रायश्चित्तं च। अग्निहोत्रोच्छेषणनाशे तण्डुलैरातञ्चनं सर्वप्रायश्चित्तं च। इति हविर्दोषसान्नाय्यप्रायश्चित्तम् ॥

सान्नाय्यार्थमपाकृता वत्सा यदि निःशेषं पिबेयुस्तदा वायुदेवत्या यवाग्वा सह प्रक्रान्तामिष्टं समाप्य पुनर्यागः। अथाऽसर्वपाने यागपर्याप्ते सर्वप्रायश्चित्तं पुनर्यागः। इदमपि हविर्दोषप्रायश्चित्तम्।

अथाग्निहोत्रार्थमधिश्रितद्रव्यक्षरणे प्रायश्चित्तम् ॥ अधिश्रितमग्निहोत्रद्रव्यं स्थालीमूलेन यदि श्रवति तदा "गर्भस्रवन्तमगदम० निर्ऋतिं परस्तात्" अनेनाभिमन्त्र्य दुष्टमप्सु प्रक्षिप्य सर्वप्रायश्चित्तं हुत्वा शेषेण जुहुयात्। अशेषे पुनर्दुग्ध्वा अग्निहोत्रं जुहुयात् ॥

अथ गोदोहनकाले गोरुपवेशने प्रायश्चित्तम् ॥ दोहनकाले वत्ससंसर्गादिदोहनसमाप्त्यन्तं यदि गौरुपविशेत्तदा "यस्माद्भीषा निषीदसि० नमोरुद्रायमीढुषे" अनेन तामभिमन्त्र्य "उदस्थाद्देव्यदि" ति "वरुणायच" अनेन मन्त्रेण तामुत्थापयेत्। उभयमपि एककर्तृकम्। अथास्या ऊधसि च मुखे चोदपात्रमुपोद्गृह्य ततस्तां दुग्ध्वा तत्पयो ब्रह्माणं पाययेत्। तदन्नं यावज्जीवं संवत्सरं वा नाश्नीयात्। अथ वा तां ब्राह्मणाय दद्यात् ॥

अथ दोहनकालीनगवाक्रन्दनप्रायश्चित्तम् ॥ दोहनकाले यदि गौः शब्दं कुर्यात् तदा "सूयवसाद्भगव० मुदकमाचरन्ती" इति मन्त्रेण तस्य भक्षं प्रकल्पयेत् ॥

अथ दोहनकाले रुधिरस्रावे प्रायश्चित्तम् ॥ शोणितं दुग्धं गार्हपत्ये संस्थाप्य पुनस्तामन्यां वा दुग्ध्वा तेन जुहुयात् ॥

अथ भिन्नसिक्तप्रायश्चित्तम् ॥ स्थालीभेदेन विक्षिप्तं द्रव्यं भिन्नं तत्समग्रं दुष्टं सिक्तं स्कन्दने च यावत् स्कन्नं तद्दुष्टं भवति न पात्रगतम्। तदुभयं दुष्टं "समुद्रंवः प्रहिणोमि० सन्तुगोपतौ" अनेन मन्त्रेणाभिमन्त्र्यापोऽभ्यवहरेत्। दोहनाद्याहोमात्पयसि अन्येषु द्रव्येषु च भेदने पूर्वोक्तेनाभिमन्त्रणं स्कन्दने पुनः पयसि वक्ष्यमाणत्वादिदमभिमन्त्रणं स्कन्दने द्रव्यान्तरेष्वेव भवति ॥

अथ दोहनाद्यवस्थायां स्कन्नप्रायश्चित्तम् ॥ दोहनाद्यवस्थायां पयसि स्कन्ने "यदद्यदुग्धंपृथिवीं० अस्तुतन्मयि" अनेनाभिमन्त्रयेत्। पयोलिङ्गत्वात्पयस एव इदं भवति। दोहनाद्याप्राचीनहरणात्। तत्र यत्परिशिष्टं स्यात्तेन जुहुयात्। शेषकार्यापर्याप्तावपि शेषकार्यस्य भक्ष्यादेर्लोप एव स्यात्। तद्यदि प्रधानापर्याप्तं तदा अन्यत्पय आनीय जुहुयात्। अधिश्रिते पयसि स्कन्ने "यदद्यदुग्धमि"ति अनेनैवाभिमन्त्रणं न ब्राह्मणोक्तम्। न द्रव्यान्तरे भवति। विष्यन्दने पयसि ब्राह्मणोक्तम्। तद्यथा। अधिश्रयमाणमारभ्य विष्यन्दने स्कन्दने वा जलेन प्रतिषिच्य तत्स्कन्दनं विष्यन्दिते च दक्षिणेन पाणिना अभिमृश्य जपति। "दिवंतृतीयंदेवान्यज्ञोगात्ततोमाद्रविणमाष्टं यथोरोजसास्कभितारजां० पूर्वेहुता" इति च। शेषं दुग्धवत्। प्राचीनहरणात्पयस्यैव स्कन्दने "प्रजापतेर्विश्वभृतितन्वंहुतमसि" इत्यनेनाभिमृश्य होमापर्याप्तावपि शेषेण जुहुयात्। द्रव्यान्तरे "समुद्रंव" इत्यनेनाभिमन्त्रणं विशेषः। अशेषस्कन्ने यावत्यध्वनि गते तत्रैवोपविश्य अन्ये स्रुवां स्थालीश्चानीय चतुरुन्नीय जुहुयात्। स्थाल्यामपि यदा नास्ति आज्यं यथावत्संस्कृत्योन्नीय जुहुयात्। आहवनीये आहुति-

द्रव्यापर्याप्तं प्रायश्चित्तम् । शेषेण जुहुयादित्यादिषु त्रिषु पक्षेषु यां कां चिद्वारुणीं जपित्वा यया कया चिद्वारुण्या होमः विशेषाभावात् । "अग्निः सूर्योज्योतिरि" त्येतयोरपवादो वारुणी । अनशनयान्यस्माद्धोमकालाद्यजमानस्य पुनर्होमं च गाणगारिः । पुनर्होमे च पूर्वहोमं समाप्य पुनर्विहरणादि कुर्यात् । पुनर्होम आचार्याणामनभिमतः । इति दोहनादिषु स्कन्दनप्रायश्चित्तम् ॥

यद्यधिश्रितमग्निहोत्रं द्रव्यं शब्दयेत्तदा " समेषपाप्मान" मित्यनेन तद्द्रव्यमभिमृशेत् । इति शब्दायमानप्रायश्चित्तम् ॥

अथोद्वासिते विष्यन्दिते "महीद्यौः पृथिवीचन" इत्याहवनीयस्य भस्मान्ते निनयेत् । ततः सर्वप्रायश्चित्तम् । "दोहनाद्यवस्थायामपि पयसि विष्यन्दिते इदमेव । केशादिना बीभत्सितमग्निहोत्रद्रव्यं "प्रजापतेनत्वदेतान्यन्य" इति ऋचा मध्यमेन पलाशपर्णेन जुहुयाद्वल्मीकवपायामप्सु वा तूष्णीं प्रक्षिपेत् । द्रव्यान्तरमुत्पाद्य होमः । अधिश्रयणाभावोप्यन्येषामिदम् । इति बीभत्सप्रायश्चित्तम् ॥

अथाग्निहोत्रद्रव्याभिवर्षणप्रायश्चित्तम् । अग्निहोत्रद्रव्येभिवृष्टे "मित्रोजनान्यात० घृतवज्जुहोतस्वाहा" अनया समिदन्तरमाधाय प्रकृतिवद्धोमः । उत्तराहुत्यभिवर्षणे इदमेव वृत्तिकृता उक्तम् । अन्ये तु अग्निहोत्रार्थमग्न्युद्धरणप्रभृति आउत्तरपरिषेकात् अग्निषु वर्षे तदेव प्रायश्चित्तं वदन्ति । तदसत् । अहोत्रद्रव्यप्राये पठितत्वात् ॥

अथोत्तराहुतिकाले द्रव्यस्कन्नप्रायश्चित्तम् । यदि पूर्वाहुतौ हुतायामुत्तराहुतिः स्वस्थानाद्बहिः स्कन्देत् तदा " यत्रवेत्थवनस्पते० गामयस्वाहा " इति समिधमाधाय शेषेण जुहुयात् । सर्वस्कन्दने तत्रैव स्थालीमानीय पुनस्त्रीनुन्नीय " यत्रवेत्थ इति समिधमाधाय उत्तराहुतिप्रभृति कर्तव्यम् ॥

अथाग्निहोत्रकालात्ययप्रायश्चित्तम् । उद्धृतेष्वग्निषु सायं पूर्वप्रहरत्यागे गार्हपत्ये तूष्णीमाज्यं संस्कृत्य जुह्वां चतुर्गृहीतं गृहीत्वा " दोषावस्तर्नमस्वाहा " इत्याहवनीये जुहुयात् । ततोग्निहोत्रमुपसाद्य " भूर्भुवः स्वः " इति जपित्वा गां दत्वा शेषं समाप्य तेष्वेवाग्निषु वारुणीमिष्टिं कुर्यात् । तत्र वरुणो देवता । " इमंमेवरुण तत्वायामी " ति याज्यानुवाक्ये । उद्धृतेष्वग्निषु प्रातर्दशनाडिकात्यये पूर्ववदाज्यं संस्कृत्य जुह्वां चतुर्गृहीतं गृहीत्वा " प्रातर्वस्तर्नमस्वाहा " इत्याहवनीये हुत्वा ततोग्निहोत्रमुपसाद्य " भूर्भुवः स्वः " इति जपित्वा अग्निहोत्रं हुत्वा वृष्ट्यन्ते वरदानं कर्तव्यम् । समाप्ते अग्निहोत्रहोमे आहवनीयमनुगमयित्वा " इहैवक्षेम्यएधिमाप्रहासीर्देवदत्तजामदग्न्यम् " इति मन्त्रमुक्त्वा पुनराहवनीयमुद्धरेत् । पित्रादौ जीवति जामदग्न्यायनमिति वदेत् । दक्षिणाग्निस्त्वग्निहोत्रिक एव । ततो मित्रसूर्याभ्यामिष्टिं कुर्यात् । तत्र " अप्सियोमहिनादिवं प्रसमित्रमर्तो अस्तुप्रयस्वानि " ति मित्रस्य याज्यानुवाक्ये । " तरणिर्विश्वदर्शतश्चित्रंदेवानामि " ति सूर्यस्य । समाप्तायामिष्टौ पत्नीयजमानौ यतवाचौ भूत्वा तानेवाग्नीन् ज्वलयन्तौ अनश्नन्तौ अहःशेषमुपासीयाताम् । ततस्तेष्वग्निषु द्वयोर्गवोर्दुग्धं पृथगानीय एकमधिश्रित्य तस्मिन्नेव द्वितीयमवनीय श्रपयेत् । तेन पयसा अग्निहोत्रं समाप्य अग्न्योरपवर्गः । ततः प्रातरग्निहोत्रं हुत्वा पुनर्विहारादिव्रतभृदिष्टिं कुर्यात् । " त्वमग्नेव्रतभृच्छुचिर्व्रतानिबिभ्रद्व्रतपाअदब्ध " इति याज्यानुवाक्ये । पर्वणि दुःखेनाश्रुपातेप्येषैवेष्टिः ।

अथाविहृतेषूक्तकालातिपत्तौ अत्यन्ता यदि अनुद्धृतप्रायश्चित्तं कृत्वा होमं कुर्यात् । अनापदि गार्हपत्ये आज्यं संस्कृ-

त्य चतुर्गृहीतमाहवनीये मनस्वत्या हुत्वा अनुद्धृतप्रायश्चित्तसहितो होमः कार्यः । इति अविहृतेषु कालात्ययप्रायश्चित्तम् ॥

विहृतेषु अहुतेषु होमान्तरकालप्राप्तौ उपक्रान्तहोमे एव कालातिपत्तिप्रायश्चित्तसहितं होमं कृत्वा वर्तमानकालीनमनुद्धृतप्रायश्चित्तसहितं होमं कुर्यात् । अविहृतेषु कालान्तरप्राप्तौ मनस्वतीहोमं कृत्वातिपन्नहोमं च कृत्वा अनुद्धृतप्रायश्चित्तसहितो मुख्यकालीनहोमः एवमनेककालातिपत्तावपि द्रष्टव्यम् । विहृतेष्वविहृतेषु वा अनेककालातिपत्तौ मनस्वतीहोमं प्रतिहोमं चावश्यकं कुर्यात् । विहृतेषु तेष्वेवाग्निषु अविहृतेषु चाग्नीन्विहृत्य मनस्वत्यादि कृत्वा प्राप्तकालस्य विहरणादि क्रियेत ॥ इति विहृताविहृतकालात्ययप्रायश्चित्तम् ॥

अथानुद्धरणप्रायश्चित्तम् ॥ यद्याहवनीयमप्रणीतमभ्यस्तमियात् तदा बहुविद्ब्राह्मणमानीय तेनाहवनीयार्थमुद्धृत्य अन्येन दर्भैर्हिरण्यं बध्वा अग्रतो ह्रीयमाणे निधानान्तं कुर्यात् । अनुद्धृतमभ्युदिते सति बहुविदग्निमुद्धृत्य जुह्वां चतुर्गृहीतमाज्यं रजते चाग्रतः कृत्वा नयेत् । निहितस्याहवनीयस्य पुरस्तात्प्रत्यङ्मुख उपविश्य " उषाः केतुनाजुषतां स्वाहा " इति अध्वर्युस्तदाज्यं जुहुयात् । सायमनुद्धरणेग्निहोत्रहोममारभ्य वारुणीपर्यन्तं सायङ्कालात्ययवत्कुर्यात् । तथा प्रातरनुद्धरणेषु आहवनीयानुगमनवर्जमग्निहोत्रहोममारभ्य व्रातपतीष्ट्यन्तं प्रातःकालात्ययवत्कुर्यात् ॥ इत्यनुद्धरणप्रायश्चित्तम् ॥

अथाहवनीये विद्यमाने गार्हपत्यानुगमनप्रायश्चित्तम् ॥ यद्याहवनीये विद्यमाने गार्हपत्योनुगतस्तदा तत्काष्ठानि तूष्णीं मन्थेयुः। विद्यमानमाहवनीयमनुगमयेत् । क्षामाभावे भस्मनारणी संस्पृश्य मन्थयेत् । " इतोजज्ञे० हव्यंवहनः प्रजानन् " इत्यनेन मथि-

त्वाहवनीयं पुनस्तूष्णीं प्रणीय "अग्नेसम्राडिषेण्ये० पत्यादधत्" अनेन तमुपतिष्ठेत। सर्वावस्थस्य गार्हपत्यस्य मन्थनेनैवोत्पत्तिः। अथ कल्पान्तरा उच्यन्ते। विद्यमानमाहवनीयं गार्हपत्यं कृत्वा ततः प्राञ्चमाहवनीयमुद्धरेत्। दक्षिणाग्निमपि तत उद्धृत्य दक्षिणतो निदध्यादिति एकः। आहवनीयाद्गार्हपत्यार्थमुद्धरेदित्यपरः। गार्हपत्यर्थमन्थनमेव दक्षिणाग्न्याहवनीयौ यथास्थिताविति तृतीयः। अथ वा गार्हपत्यार्थं मथित्वा विद्यमानमाहवनीयं दक्षिणाग्निं चानुगमयित्वा पुनः प्रणयेदिति चतुर्थः। अथ वा आहवनीयं भस्मना सहोद्धृत्य दक्षिणतो विहारं पश्चान्नीत्वा गार्हपत्यायतनात् भस्मापोह्य गोमयेनोपलिप्य अग्निं तत्रैव विधाय आहवनीयायतनमुपलिप्य गार्हपत्यादाहवनीयमुद्धरेन्मन्त्रेण। दक्षिणाग्निमपि तत उद्धृत्य दक्षिणतो निदध्यादिति केचित्। तेष्वेवाग्निषु इष्टिं कुर्यात्। तपस्वाञ्जनद्वान् पावकवान्गुणकोग्निर्देवता। "आयाहितपसाजनेषु आनोयाहितपसाजनेषु" इति याज्यानुवाक्ये॥

अथगार्हपत्यानुगमनप्रायश्चित्तम्॥ सर्वावस्थस्य गार्हपत्येनुगते भस्मनाऽरणी संस्पृश्य "इतोजज्ञेप्रथम" इति मन्त्रेण मथित्वा प्रकृतिवत्प्रणीय अग्नये तपस्वते जनद्वते पावकवतेऽष्टाकपालं पुरोडाशं निर्वपेत्। तत्स्थाने पूर्णाहुतिं वा। "अग्नेतपस्वतेजनद्वतेपावकवतेस्वाहा" इति पूर्णाहुतिं विधाय ततो होमः॥

अथ दक्षिणाग्न्यनुगतप्रायश्चित्तम्॥ अनुगतं दक्षिणाग्निं स्वायोनित उत्पाद्य प्रणीय तत आहवनीये पूर्णाहुतिः इष्टिर्वेति पूर्ववत्। अस्य प्रधानहोमोत्तरं नोत्पत्तिः॥

अथाहवनीयानुगतप्रायश्चित्तम्॥ प्रणीतमाहवनीयं पूर्वाहुतेः प्राक् अनुगते अग्निर्ज्योतिष्मान्वरुणश्च देवते। "उदग्नेशु-

चयस्तवाग्नेटहत्तुषमामूर्ध्वोअस्थादि” ति याज्यानुवाक्येऽग्नेर्ज्यो- तिष्मतः । “इमम्मेवरुण तत्वायामी” ति वरुणस्य । पूर्णाहुतिर्वा । “अग्नयेज्योतिष्मतेस्वाहा वरुणायस्वाहा” । उत्पत्तिस्तु तदाहुर्य- स्याग्निमनुदृधृतमादित्योऽभ्युदियाद्वाऽभ्यस्तमियाद्वा प्रणीतो वा प्राग्घोमादुपशाम्येदित्यादि । हिरण्यं पुरस्कृत्य सायमुद्धरेन्मन्त्रेण रजतमन्तर्द्धाय प्रातरुद्धरेद्व मन्त्रेण । इति ब्राह्मणोक्ता उत्पत्तिर्ग्रा- ह्या । हिरण्य उत्तरा जुहुयादिति वचनादुत्तराहुत्यर्थमग्नेर्नोत्पत्तिः ॥

अथाऽनस्तमिते होमप्रायश्चित्तम् ॥ यद्यनस्तमिते अस्तमित- भ्रान्त्या होमो भवति तदा तस्मिन्नेवाहवनीये पुनर्होमः । होमोत्तरं यजमानो गार्हपत्याहवनीयावुपतिष्ठेत । “ भवतं नः समनसौसमो- कसावरेपसौ मायज्ञं हिंसिष्टमायज्ञपतिंजातवेदसौशिवोभवतमद्यनः” इति । एवं प्रातरुदयात् प्राक् होमे ॥

अथ नित्यहोमातिक्रमे प्रायश्चित्तम् ॥ अग्निहोत्रहोमान्मन- स्वत्या चतुर्गृहीतं हुत्वा अतिक्रान्तहोमः कार्यः । एवमाद्विरात्रादिषु होमविच्छेदे ज्ञेयम् ॥

अथ सर्वानुगमनप्रायश्चित्तम् ॥ सर्वेषामनुगमने सूर्योस्तमि- यादभ्युदियात्तदाग्न्याधेयं पुनराधेयं वा प्रायश्चित्तम् ॥ एतदे- वसमारूढेषु चारणीनाशेपि । अत्राग्न्याधेयपुनराधेयशब्दाभ्यां से- ष्टिके एव गृह्येते । अजस्रपक्षेपि इदमेव । अग्निहोत्रद्रव्याधिश्रय- णार्थं गार्हपत्त्यादुदृधृतेष्वङ्गारेषु यदि उदृधृतस्य गार्हपत्यस्य च नाशस्तदा गार्हपत्यं मथित्वा पूर्ववत्तपस्वतीष्टिः । अपोढे वर्तमाने गापत्यानुगमने अपोढैकदेशं गार्हपत्ये निधाय सर्वप्रायश्चित्तम् । एवं गार्हपत्यदक्षिणाग्न्याहवनीयानुगतेषु तान्येव यथासभवं क- र्तव्यानि । तथा सति सर्वानुगमन एव अग्न्याधेयं पुनराधेयं वा प्रायश्चित्तम् । न केवलं गार्हपत्यस्यानुगमने गार्हपत्याहवनीययो-

रनुगमने वा ॥

अथ समारूढारणीनाशे प्रायश्चित्तम् ॥ अग्निष्वरण्योः समारूढेषु सत्सु द्वयोरन्यतरनाशे वा अग्न्याधेयं पुनराधेयं वा कर्तव्यम् ॥

अथानेकनिमित्तेषु तत्तद्गुणविशिष्टाग्नेय्य इष्टय उच्यन्ते ॥ तत्रौपवसथ्ये हवनीयजमानपत्न्योर्व्रतातिपत्तौ व्रतपतीष्टिः ॥ तत्र व्रतपद्गुणकोऽग्निर्देवता । "त्वमग्नेव्रतपा असियद्वोवयं प्रमिनामव्रतानी"ति याज्यानुवाक्ये । निवृत्तकर्मणा अनिवृत्तकर्मणा वा अग्निना सहितो आहवनीयायतने यदि अन्योऽग्निराहवनीयार्थमुद्ध्रियेत तमनिधायैव स्मरति चेदायतनस्थं व्युदूह्य उद्धृतं निदध्यात् । तत्र अप्रवृत्ते कर्मोदूह्य तदा व्याहृतिप्रायश्चित्तम् । अप्रवृत्ते उद्धृतस्याग्नेरनिधाने पुनस्तूष्णीं गार्हपत्ये समाप्य सर्वप्रायश्चित्तं कुर्यात् । निधाने वक्ष्यमाणलौकिकाग्निसंसर्गप्रायश्चित्तम् । अनप्रवृत्ते यद्यस्मृत्वैव पूर्वप्रणीतेऽग्नौ निदध्यात् तदा इष्टिः कर्तव्या । तत्राग्निमद्गुणकोऽग्निर्देवता । "अग्निनाग्निः समिध्यतेत्वंह्यग्ने अग्निने"ति याज्यानुवाक्ये ॥ अगारदाहे क्षामवतीष्टिः कर्तव्या ॥ "अग्नेत्वमस्यद्युयोध्यमीवा अक्रन्ददग्निस्तनयंनिवद्यौरि"ति याज्यानुवाक्ये इत्यादयः सर्वे सगुणा आग्नेयेष्टाकपाला ज्ञेयाः ॥ शवाग्निना संसर्गेषु शुचयेष्टिः । "अग्निः शुचिव्रततम उदग्ने शुचयस्तवे"ति याज्यानुवाक्ये ॥ गार्हपत्यादीनां परस्परसंसर्गे विविचयेष्टिः ॥ "वितेविष्वग्वातजूतासो अग्नेत्वामग्नेमानुषीरीलतेविश" इति याज्यानुवाक्ये । ग्राम्येण संसर्गे संवर्गेष्टिः ॥ "कुवित्सुनोगविष्टयेमानो अस्मिन्महाधने" इति याज्यानुवाक्ये ॥ वैद्युतेनाग्निना संसर्गे अप्सुमतेष्टिः ॥ "अप्स्वग्नेसधिष्टवपदग्नेदिविजा असी"ति याज्यानुवाक्ये । द्विपदन्नभोजने वैश्वानरीयेष्टिः ॥ "वैश्वानरो अजीजनत्पृष्टोदिवी"ति याज्यानुवाक्ये । उद्वासनात्प्राक् कपालना-

श्चने अनुद्धासनपक्षे कर्ममध्येपि येषां श्रवणोत्तरमुद्धासनं तस्मिन्न-कृते आश्रावणे कृते च वैश्वानरीयेष्टिः ॥ यजमाने जीवति मृत-शब्दं श्रुत्वा सुरभयेष्टिः कर्तव्या ॥ तत्र सुरभयगुणकोग्निर्देवता । सूत्रे एवकारपाठान्न सुरभिमतः । "अग्निर्होतान्यसीदद्यजीयान्त्सा-ध्वीमकर्देववीतिन्नोअद्ये" ति याज्यानुवाक्ये ॥ यस्य भार्या गौर्वा यमौ जनयेदिष्टिर्मरुतः ॥ मरुतो देवता । "मरुतोयस्यहिक्षयेप्रश-र्द्धायमारुतायस्वभानव" इति याज्यानुवाक्ये ॥ इत्याग्नेय्य इष्टयः ॥

अथाऽकाले दर्शारम्भप्रायश्चित्तम् ॥ यद्यकाले दर्शारम्भे अ-कालोयमिति ज्ञाते स एव दर्शस्त्रैधातवीयेष्ट्या समाप्येत । वृध-न्वन्तावित्यमावास्याधर्मा भवन्ति । तत्र देवता दाता अग्नेर्गुणकः । प्रदाता इन्द्रस्य । शिपिविष्टो विष्णोः । "अग्नेदादाशुषेरयिंसयन्ता-विप्रएषामि" त्यग्नेर्दातुः । "दीर्घस्तेअस्त्वङ्कुशोभद्रातेहस्तासुकृता-तपाणी" इतीन्द्रस्य प्रदातुः । "वषट्तेविष्णवासआकृणोमिप्रततेअ-द्यशिपिविष्टनामे" ति विष्णोः शिपिविष्टस्य । अत्र पुनर्योगो ना-स्तीति अध्वर्युभिः सह निश्चयः ॥ अत्र प्रायश्चित्तप्रकरणे सूत्रो-क्ता ब्राह्मणोक्ता इष्टयः । तासां देवतानां प्रतिदैवतं तस्यै तस्यै देवतायै द्वादश गृहीतेन स्रुचं पूरयित्वा चतुर्थ्यन्तेन देवतानामम-न्त्रेण पूर्णाहुतिं जुहुयात् । इदं तु कर्ममध्ये वा अशक्तौ वा अना-रब्धदर्शपूर्णमासस्य वा भवन्ति । आरब्धदर्शपूर्णमासस्य च इ-ष्टिः पूर्णाहुतिर्वा ॥ इतीष्टानुकल्पः ॥

अथ हविस्कन्दनप्रायश्चित्तम् ॥ यदि हविः स्कन्नं तदा "देवां-जनमगन्य०द्रप्सश्चस्कन्द" । इत्येतदन्तेन मन्त्रेण सर्वत्र स्कन्नम-भिमृशेत् । सर्वप्रायश्चित्तञ्च ॥

अथाहुतेर्बहिस्कन्नप्रायश्चित्तम् ॥ अथ हूयमानाहुतिः यदि परि-धेर्बहिः पतेत्तदा तस्याः स्कन्नं पूर्ववदभिमर्शने कृते आग्नीध्रस्ता-

मादाय तूष्णीमेव जुहुयात्। आग्नीध्राय येन केनचिद्वान्येन रसादिना वा पूर्णपात्रं दद्यात्। सर्वप्रायश्चित्तं च ॥

अथानेकविपर्यासप्रायश्चित्तानि ॥ देवताविपर्यासो नाम आवाहनादिषु व्युत्क्रमः। अनुवाक्याविपर्यासो नाम अन्यदिष्टमन्यस्यानुब्रूयात्। एवं याज्याविपर्यासे जौहवैापभृतयोराज्यविपर्यासे ध्रौवाज्यविपर्यासेपि। अवदानविपर्यासो नाम मध्यात्पूर्वार्द्धादित्यादिषु वैपरीत्यम्। हविर्विपर्यासो नाम निर्वापादिषु व्युत्क्रमः। अन्यदीयेन हविषा अन्यस्य यागो वा। एतेषु सर्वेषु "यद्वो देवाअति० तन्निधेतनस्वाहा देवेभ्यइदं"० इत्याज्याहुतिं हुत्वा हुतवते ब्रह्मणे मुख्यं धनं दद्यात्। मुख्यं धनं नाम सद्यो गृहे यत्प्रधानभूतं च। एतेषु निमित्तेषु प्रधानयागोत्तरं स्मृते सति यद्वोदेवा सर्वप्रायश्चित्तं च न यागाभ्यासः ॥ इति विपर्यासप्रायश्चित्तम् ॥

अथ प्रधानदेवतामनावाह्य देवतान्तरायप्रायश्चित्तम् ॥ देवतावाहनकाले विहितदेवतामनावाह्य उत्तरं कर्म कुर्यात्तदा यावति गते स्मरति तदवधिस्वरेण विहितामावाहयेत्। मनसावाहयेदित्येके। यद्यविहितामावाहयेत्तदा यस्मिन्नेव क्रमे निगदादिषु पठितास्तेनैव क्रमेण चतुर्गृहीतेनाज्येन तां यजेत् ॥

अथ हविरपक्वप्रायश्चित्तम् ॥ यदा हविरपक्वं स्यात्तदा तेनैव प्रक्रान्तं समाप्य दक्षिणाग्निं पुनर्विहृत्य चतुःशरावपरिमितव्रीहिभिः ओदनं श्रपयित्वा चतुरो ब्राह्मणान् भोजयेत् ॥

अथ हविष एकदेशदाहे कृत्स्नदाहे वा प्रायश्चित्तम्। यदा यद्धविर्दग्धं तदेकदेशा अवदानपर्याप्तः स्यात्तदा तेनैव प्रकृतं समाप्यैतस्मिन्प्रयोगे दक्षिणा द्वेष्ट्रे दातव्या न ऋत्विग्भ्यः। पुनरन्वाधानादि तद्दैवत्यो यागः कर्तव्यः। अवदानपर्याप्ते सर्वप्राय-

श्चित्तमेवन पुनर्यागः । एवं द्वयोर्बहूनां ज्ञातव्यम् । यदा कृत्स्नं दग्धं तदा तस्मिन्नेव प्रयोगे निर्वापादिना तद्धविरुत्पाद्य प्रकृतं समापयेत् । इयं न पुनरावृत्तिः ॥

अथावाहनात्प्राक् हविर्दोषप्रायश्चित्तम् ॥ आवाहनात्प्राग्घविर्दोषे सति आवृत्तिरेव । अङ्गहविषां दोषे सति कर्मसमाप्तिपर्यन्तं पुनरुत्पत्तिरेव । आवाहनादूर्ध्वं प्रधानहविषां व्यापत्तौ यदुक्तं तस्य विधिः स्विष्टकृतः प्रागेव तेनाप्यत्राङ्गानां पुनरावृत्तिरेव ॥

अथ गृहीतावदानदोषप्रायश्चित्तम् ॥ मध्यात्पूर्वार्द्धाद्गृहीतं यदि दुष्टं भवति तदा सर्वप्रायश्चित्तं हुत्वा पुनस्तत एव मध्यात्पूर्वार्द्धाद्गृहीत्वा यजेत् । सर्वेषु कर्मसु विहितदक्षिणादानाशक्तौ उर्वरां दद्यात् । उर्वरा नाम सस्यसंपन्ना भूमिः । विहितदक्षिणाकालातिक्रमे एषा दक्षिणेति के चित् ॥

अथ कपालभेदनप्रायश्चित्तम् ॥ यदि पुरोडाशश्रपणात्प्राक् कपालं भिन्नं तदा "गायत्र्यात्वाशताक्षरयासंदधामि" इति सन्धानद्रव्येण सन्धाय सर्वप्रायश्चित्तं हुत्वा "अभिन्नोघर्मोजीरदानु० यज्ञोयप्येतुदेवान्" इति द्वाभ्यामप्सु प्रक्षिपेत् । सर्वप्रायश्चित्तं कृत्वा अन्यत्कपालमानीय यथापूर्वं संस्कारं कृत्वा मन्त्रेण तत्र निधाय पुरोडाशं श्रपयेत् ॥ श्रपणोत्तरकालभेदने न तत्प्रायश्चित्तम् ॥

अथ कपालाशुचिसंबन्धप्रायश्चित्तम् ॥ यदि कपालानि श्वादिभिर्दशनाक्षिप्तानि अशुचिना वा स्पृष्टानि तदा "अभिन्न" इति द्वाभ्यामेवाप्सु प्रक्षिपेत् । सर्वप्रायश्चित्तं च ॥

अथ कर्ममध्ये मृण्मयसाधारणप्रायश्चित्तम् ॥ अथान्यानि मृण्मयानि दुष्टानि "भूमिर्भूमिमगा० द्वेष्टिसमिध्यतां" इति मन्त्रेणाप्स्वेव प्रक्षिपेत् । सर्वप्रायश्चित्तं च ॥

अथ पुरोडाशभेदनोत्पतनप्रायश्चित्तम् ॥ यदि पुरोडाशो

भिद्येत उत्पतेत वा तदा "किमुत्पतसिकिं० स्वमासीदसदनंस्वं" इति मन्त्रेण वर्हिष्येनं निधाय "माहिंसीर्देवप्रेरितआ० अस्मिन्नासीदवर्हिषि" अनेन तमभिमन्त्र्य सर्वप्रायश्चित्तं कुर्यात् ॥

अथोद्धरणकाले समारूढमथ्यमानाऽग्नेरनुत्पत्तिप्रायश्चित्तम् ॥ यदि समारूढोग्निः प्रणयनकाले मथ्यमानो न जायेत तदा लौकिकमानीय गार्हपत्ये निधाय ततः प्रणीय तत्रैवाग्निहोत्रं जुहुयात्। एतदनुगते न भवति। अनुगते तु मन्थनादि तपस्वतीष्ट्यन्तं तत्र प्रायश्चित्तम्। अनुगतावजायमानेपि यावज्जन्म तावन्मथितव्यमेव। ततस्तपस्वतीष्टिः। ततोग्निहोमोनुद्धृतप्रायश्चित्तेन सह यदि होमकालोतिपन्नस्तदा मनस्वतीहोमश्च कार्यः। अनुगतपक्षेपि लौकिकाग्नौ होम इति केचित् ॥

अथाग्न्यभावे ब्राह्मणपाण्यजकर्णदर्भस्तम्बाप्सु ॥ काष्ठेषु पृथिव्यादयो ग्राह्याः। पाण्यादीनां चतुर्णामिन्धानाश्रपणादिदृष्टार्थान्विर्जयित्वा अन्यत्सर्वमदृष्टार्था भवन्ति। पृथिव्यामाहुतिधारणार्था समिन्न भवति। पूर्वालाभेषु उत्तरोत्तरेषु उक्तप्रकारेणाग्निहोत्रहोमं हुत्वा अनन्तरं तदैव मन्थयेत्। न पुनर्होम इति। पाणिहोमे ब्राह्मणवासावरोधः। कर्णे त्वजमांसं वर्जयेत्। स्तम्बे चेद्दर्भेनाधिशयीत। अप्सु चेत्सम्यगसम्यग्विवेको न। एतत्सांवत्सरव्रतं यावज्जीविकं वा ॥ इत्यग्न्यभावप्रायश्चित्तम् ॥

अथ पूर्वाहुत्यनन्तरमाहवनीयानुगमने प्रायश्चित्तम् ॥ उत्तराहुतिकाले अग्न्यनुगमने आयतने हिरण्यं निधाय तत्रैवोत्तरां जुहुयात् ॥

इति श्रीमंचनार्यभट्टविरचितायामाश्वलायनसूत्रप्रयोगदीपिकायां तृतीयोध्यायः ॥

अथ सप्तसंस्थो ज्योतिष्टोमाख्यः सोमस्तत्प्रयोगोऽभिधीयते ॥

तत्र सर्वेषामेकाहाहीनसत्राणां नानाप्रकृतिभूतः परिमितशस्योऽग्निष्टोमसंस्थो ज्योतिष्टोमस्तावदुच्यते ॥ तस्यादौ ऋत्विग्वरणसमये "अमुकशर्मणः सोमो भविष्यति तत्र भवता हौत्रं कर्तव्यमि"ति सोमप्रवाकेणोक्ते होता "को यज्ञः क ऋत्विजः को दक्षिणे"ति तं पृच्छति। तेन प्रतिवचने दत्ते "अग्निर्मेहोते"त्येवमादिना मन्त्रेण यजमानो होतारं वृणीते । स वृतो जपेत् "महन्मेवोच" इत्यादि " तेन भुक्षिषीये " त्यन्तं जपित्वा " अग्निष्टेहोतास्तेहोताहोताहंतेमानुष " इति मन्त्रेणाभ्युपगच्छति । होत्रकाणामप्येवं वरणविधिः । अयं तु विशेषः । " आपस्तेहोत्राशंसिन्यस्तास्तेहोत्राशंसिन्योहोत्रकावयंतेमानुषा " इति सर्वे युगपत्प्रतिजानीते । एवमृत्विजो वृत्वा वरणक्रमेणैव तावन्मधुपर्केण पूजयेद्यजमानः । तत्रास्मदीयानां होत्रादीनामाश्वलायनोक्तविधिना मधुपर्को भवति । स उच्यते । पूर्वमेव विष्टरः पाद्यमर्घ्यमाचमनीयं मधुपर्को गौरिति एतावद्द्रव्याणि उपकल्प्य होतारमासने प्राङ्मुख उपविश्य प्रथमं विष्टरं निवेदयेत् । " विष्टरः " इति ति त्रिरुक्त्वा " प्रतिगृह्यता " मिति वदेत् " प्रतिगृह्णामि " इति होता तं गृहीत्वा । " अहंवर्ष्मसजातानांविभिदासति " अनेनोदगग्रे विष्टर उपविशेत् । तत " पाद्यम् " इति त्रिरुक्त्वा निवेदयति । " अर्घ्यमि " ति त्रिरर्घ्यम् । " आचमनीयमि " ति आचमनीयं शुद्धोदकं निवेदयति । होता तद्गृहीत्वा तस्यैकदेशम् "अमृतोपस्तरणमसी " ति मन्त्रेणाचमेत् । ततः शौचार्थमाचमनं कर्तव्यम् । अथाह्रियमाणं मधुपर्कं " मित्रस्यत्वाचक्षुषाप्रतीक्षे " इति मन्त्रेण होताऽवेक्षेत । दधनि मध्वानीय सर्पिर्वा मध्वलाभे तत्कांस्यपात्रे कृत्वा कांस्यपात्रेणैव पिधाय " मधुपर्क " इति निवेदयति । होता " देवस्यत्वे " ति मन्त्रेणाञ-

लिना प्रतिगृह्य " मधुवाताऋतायत " इति तृचेनावेक्ष्य अनामिकया चाङ्गुष्ठेन च त्रिः प्रदक्षिणमालोड्य " वसवस्त्वागायत्रेणच्छन्दसाभक्षयंत्वि " ति पुरस्तान्निमार्ष्टि। " रुद्रास्त्वात्रैष्टुभेनच्छन्दसाभक्ष० " दक्षिणतः। " आदित्यास्त्वाजागतेनच्छन्दसा० " पश्चात्। " विश्वेत्वादेवाआनुष्टुभेनच्छन्दसा० " उत्तरतः। " भूतेभ्यस्त्वे " ति मध्ये त्रिरुद्गृह्य। " मन्त्रस्यावृत्त्या ऊर्ध्वं क्षिपति। मधुपर्कस्यैकदेशं गृहीत्वा " विराजोदोहोसी " ति प्रथमं प्राश्य आचम्य पुनः किञ्चिद्गृहीत्वा " विराजोदोहमशीये " ति द्वितीयं प्राश्याचम्य " मयिदोहदोहः पाद्यायैविराज " इति तृतीयं प्राश्याचम्य पूर्वावशिष्टाचमनीयस्यैकदेशं गृहीत्वा " अमृतापिधानमसी " ति पिबेत्। शौचार्थमाचमनं कृत्वा पुनस्तदेवाचमनशेषं " सत्यंयशश्रीर्मयिश्रीःश्रयतामि " ति पिबेत्। शौचार्थमाचमनं कृत्वा। अथ "गौर्गौर्गौ" रिति त्रिरुक्त्वा गां निवेदयति। होता " मातारुद्राणामि " ति ऋचं जपित्वा " ॐमुत्सृजते " ति ब्रूयात्। ततोस्मिन्नेवकाले गन्धमाल्यवस्त्राभरणानि ददाति। एवमेव प्रशास्त्रादीनां मधुपर्कः॥ अथ प्रकृतस्य ज्योतिष्टोमस्य प्रयोगोऽनुसन्धिष्यते॥ यत्र सोमः साग्निचित्यः तत्र अग्निचयननिमित्तोखासम्भरणीयेष्टिः केषांचिन्मते भवति। तस्यां देवताः अग्निर्ब्रह्मण्वान्, अग्निः क्षत्रवान्, अग्निः क्षत्रभृत् इति तिस्रः। " एतेनाग्नेब्रह्मणा वावृधस्वब्रह्मचतेजातवेदोनमश्चे " त्यग्नेर्ब्रह्मण्वतो याज्यानुवाक्ये। " पुरुण्यग्नेपुरुधात्वायासचित्रचित्र " मित्यग्नेः क्षत्रवतः। " अग्निरीशेबृहतः क्षत्रियस्याग्निर्वाजस्यपरमस्यरायः " ... " अग्निरीशेबृहतः क्षत्रियस्यार्चामितेसुमतिंघोष्यर्वाङि " त्यग्नेः क्षत्रभृतः। पौर्णमासवदन्यत्। उखासम्भरणीयाप्रभृतीनि कर्माणि औपवसथ्यपर्यन्तानि तेषूत्तरोत्तरं यत्कर्म तत् पूर्वस्मात्कर्मणोऽन्यूनस्वरं

भवति । उखासम्भरणीयमपि कर्म पौर्णमासाच्छनैस्तरां भवति । एतच्छनैस्तरत्वं प्रधानसममेवेति वेदितव्यम् । अङ्गेषु तन्त्र एव । यत्र पुनरिष्टिर्नास्ति तत्र दक्षिणीयाप्रभृतिषूत्तरोत्तरं कर्म शनैस्तरं भवति।

अथ साग्निचित्ये एव क्रतौ प्राजापत्यः पशुः । अग्निनिमित्तः तस्य वायव्यः पशुपुरोडाशो भवति । एषाश्वलायनमतिः । आपस्तंबानां तु वायवे नियुत्वते श्वेतः पशुर्भवति । प्राजापत्यः पुरोडाशः । तस्यैन्द्राग्नवत्कल्पः । विशेषस्तूच्यते । आवाहने वैकल्पिकाज्यभागावाहनानन्तरं " वायुंनियुत्वन्तमावह वनस्पतिमावह देवा " इत्यादि । प्राजापत्ये पशौ तु " समिद्धोअद्ये " ति जामदग्न्य एव सर्वेषामाप्रिया भवन्ति इत्युक्तं पूर्वमेव । वपायोगे " आवायोभूषशुचिपा " इत्यनुवाक्या । "होतायक्षद्वायुंनियुत्वन्तंच्छागस्यवपायामेदसोजुषतामि " ति प्रैषः । " पीवोअन्नारयिवृध " इति याज्या । प्राजापत्यः पशुपुरोडाशस्तस्योपांशु प्रचारः । " यआत्मदाबलदा " इत्यनुवाक्या । "हो०व प्रजापति०ड पुरोडाशस्यजुषतामि"त्युपांशु उच्चैर्वा । "हविर्होतर्यजे " ति प्रैषः । " येनद्यौरग्ने " ति याज्या । अथाङ्गानाम् । " आतोनियुद्भिः शतिनीभिरध्वरमि " ति अनुवाक्या । " होता०वायुंनियुत्वन्तंच्छागस्यहविषआदद्य० घसन्नूनं० करदेवंवायुर्नियुत्वाञ्जुषतामि " ति प्रैषः । " प्रवायुमच्छे " ति याज्या । वनस्पतिस्विष्टकृत्सूक्तवाकप्रैषेषु आवाहनवद्देवता निगमयेत् । अन्यत्सर्वमैन्द्राग्नवत् ॥

अथ साग्निचित्ये अनग्निचित्ये च दीक्षणीयेष्टिः ॥ तस्याः प्रयोगः । सामिधेनीषु धाय्ये " अग्निमग्नआवह सोममावह अग्नाविष्णूआवह देवांआज्यपां आवहे " त्यादि । पञ्चमे प्रयाजे " स्वाहाग्निं स्वाहा सोमं स्वाहा अग्नाविष्णू स्वाहा देवाआज्य-

पा " इत्यादि । वार्त्रघ्नावाज्यभागौ । प्रधानस्य " अग्निर्मुखं-प्रथमो० हविरागच्छतनः ॐउच्चैः येहेअग्नाविष्णू अग्निश्चविष्णो तपउत्तमं० यजमानायधत्तां वौषट् " विराजौ स्विष्टकृतः संयाज्ये " ये ३ एग्नेः भि० सोमस्यभि० ट्ट अग्नाविष्णोः भि० ट्ट देवानामि " त्यादि । दीक्षणीयाप्रभृतिषु इष्टिषु मार्जनं न भवति पुरस्तागुदगयनीयायाः । इदमादीडायां सूक्तवाके चागूराशीस्थाने भवति । तद्यथा । "उपहूतोयंयजमानोस्ययज्ञस्यागुरनुद्दउदचमशीयेत्याशास्तेयदनेनहविषाशास्त" इत्यादि । सूक्तवाके नात्र नामः । आसवनीयपशिवडाया उर्ध्वं प्रकृत्या संस्थाजपवर्जम् । अन्यत्सर्वं पौर्णमासवत् ॥ आज्येडान्ता दीक्षणीया । साग्निचित्ये सोमे त्वयं विशेषः । अग्नाविष्णू वैश्वानरः आदित्येभ्यः भुवद्वद्भ्यः भुवनपतिभ्यः एतेषां त्रयाणां विकल्पः । सरस्वती अदितिर्वा द्वयोर्विकल्पः । एवमग्नाविष्णूसहिताश्चतस्रः प्रधानदेवता भवन्ति । अग्नाविष्णोरुक्ते याज्यानुवाक्ये । "वैश्वानरोअजीजनत्पृष्टोदिवी" ति वैश्वानरस्य । "धारयन्तआदित्यासोजगस्था" इति द्वे आदित्यानाम् । एते एव भुवद्वद्भ्यो भुवनपातिभ्यो वा । "पावकानः सरस्वतीयावरिवीकन्याचित्रायुरि" ति सरस्वत्याः । "उतत्वामदितेमहीमूष्वि" त्यदितेः । इति बौधायनसंमतिः । आपस्तंबमते तु अग्नाविष्णू, अग्निर्वैश्वानरः, अदितिः, इति तिस्रः प्रधानदेवताः । उक्तास्तासां याज्यानुवाक्याः । अन्यत्समानम् । एका तिस्रो वा दीक्षाः ॥

अथ प्रायणीया ॥ सा शंय्वन्तानाज्यभागान्यदि पूर्वकारिणः कुर्वन्ति तथासति आवाहने अनाज्यभागेऽयं विशेषः । "पथ्यांस्वस्तिमग्नआवह अग्निमावह सोममावह सवितारमा० अदितिमावहदेवांआज्यपां" इत्यादि । पञ्चमे प्रयाजे "ये० हेस्वाहा प-

थ्यांस्वस्तिस्वाहाअग्निस्वाहा सोमंस्वाहासवितारंस्वाहाअदितिंस्वाहादेवाआज्यपा" इत्यादि । प्रधानस्य । "स्वस्तिनः पथ्यासुधन्वंस्वि" ति द्वे पथ्यायाः स्वस्तेः । "अग्नेनयसुपथारायेआदेवानामपिपन्थामि" त्यग्नेः । "त्वंसोमप्रचिकितोयातेधामानिदिवियामि" ति सोमस्य । "आविश्वदेवंसत्पतिंयइमाविश्वाजातानी" ति सवितुः । "सुत्रामाणंपृथिवीमहीमूषुमातरमि" त्यदितेः । अथ स्विष्टकृतः । "सेदग्निरग्नीरत्यस्त्वन्यामि" त्यनुवाक्या । "येय० हेग्निं स्विष्टकृतमयाडग्निः पथ्यायाः स्वस्तेः प्रिद्रू० अग्नेः प्रि० द्रूसोमस्य प्रि० द्रूसवितुः प्रि० द्रू अदित्याः प्रि० द्रूदेवतामि" त्यादि । "जुषतांहविः सेदग्नि" रिति याज्या । इडायां पूर्ववत् । सूक्तवाके च । "पथ्याः स्वस्तिः इदंहविरि" त्यत्र पूर्ववत् शंयुवाकान्तं न पत्नीसंयाजाः ॥

अथ राजक्रयः ॥ संस्थितायां प्रायणीयायां राजानं क्रीणीते तत्र ब्रह्मा दक्षिणत आस्ते । अध्वर्यवः सोमं मनसि कृत्वा नयन्ति । तदा होता शुचिर्भूत्वा अनसः पश्चात्त्रिपदमात्रे देशे चक्रेण वर्त्मना अवस्थाय प्रेषितः सन् "त्वंविप्रस्त्वंकविरि" त्यनेन मन्त्रेण पादस्य प्रपदेन दक्षिणस्यां दिशि पांसूंस्त्रिरुद्वपेत् । पार्ष्णिमचालयन्त्सकृन्मन्त्रेण द्विस्तूष्णीम् । अथाभिहिंकृत्य मन्द्रस्वरेण सोमप्रहवणीया अन्वाह । प्रायणीयावत्सोमप्रवहणमित्युक्तत्वात् । "भद्रादभिश्रेयः प्रेही" त्येतामृचं तिष्ठन्ननुब्रूयात् त्रिः । अस्यास्तृतीये सवने अर्द्धर्चेऽवस्येद्यावदध्वर्यवो न गच्छन्ति । गच्छत्सु तिष्ठन्नेव शिष्टार्द्धर्चमुक्त्वा चक्रवर्त्मनी अन्तरेणैवानुव्रजन्नुत्तरा अनुब्रूयात् । "सोमयास्तेमयोभुव" इति तिस्रः । "सर्वेनन्दन्ती" त्येका । "आगन्देवऋतुभिर्वर्धतुक्षयमि" त्यर्द्धर्च आरमेत् । अथ पत्नीशालायाः अग्रतः उदङ्मुखे नसि व्यवस्थिते तस्य दक्षिणपार्श्वेन गत्वा

राजानमभिमुखोऽवतिष्ठेत। दूराद्दण्डस्य आप्रपदनात्। प्रपाद्यमाने राजनि शकटमग्रेणातिक्रम्य राजानमनुव्रजन् "सनः क्षपभि" रित्यर्धर्चेन "यातेधामानिहविषायजन्ती" त्येतामृचमुपसन्तनोति। अर्धर्च आरमेत्। यावद्राजानि संधानं भवति। निहिते राजनि "गयस्फानः प्रतरणः इमांधियंशिक्षमाणस्ये" त्येतामृचमुपसन्तत्य तया परिदध्यात्। राजानमुपस्पृशन् वसनेंशुषु वा प्रक्रमस्थाने गत्वा तिष्ठन्नेव "भूर्भुवः स्वरि" ति वाचं विसृजेत्। तिष्ठत्संप्रैषेषु तथैव वाग्विसर्ग इत्युक्तत्वात्। ब्रह्मा तु बहिर्वेदि यां दिशं व्रजेत् कर्तारस्तां प्राचीं कृत्वा तद्दक्षिणतो व्रजेयुः॥

अथातिथ्येष्टिः॥ होतामन्त्रितः स्थानाचमने कृत्वा तीर्थेन प्रविश्य अग्निमन्थनीया अन्वाह। वैश्वदेव्युक्तन्यायेन। सामिधेनीषु धाय्ये भवतः। आवाहने "अग्निमग्नआवहसोममावह विष्णुमावह देवांआज्यपामिं" त्यादि। पञ्चमे प्रयाजे "ये० स्वाहासोमंस्वाहाग्निस्वाहासोमंस्वाहाविष्णुंस्वाहादेवा" इत्यादि। "समिधाग्निदुवस्यत आप्यायस्वसमेतुत" इत्यातिथिमन्तावाज्यभागयोः पुरोनुवाक्ये। नित्ये याज्ये। प्रधानस्य। "इदंविष्णुर्विचक्रमे तदस्यप्रियामभिपाथोअश्यामि" ति विष्णोर्याज्यानुवाक्ये। स्विष्टकृतः "होतारंचित्ररथमि" त्यनुवाक्या। "ये० प्रिस्विष्टकृ० इग्ने० प्रि० इसोमस्यापि० इविष्णोः प्रि० इदेवानामाज्यपानामि" त्यादि। "जुषतां हविः प्रमायमि" ति याज्या। इडा पूर्ववत्। स्वरस्तु प्रथमयमः वषट्कारे द्वितीययमः। इडान्तेयमिष्टिः। सौमिकस्य सर्वा अपीष्टय उपांशु भवन्ति। सौमिकस्य इत्युक्तत्वात्। प्रायणीयायां पथ्यां स्वस्तिअग्नआवहेत्यत्राग्निशब्द उच्चैर्भवति। संस्थितायामातिथ्याया-मृत्विजः सर्वे तानूनत्प्रमाज्यमभिमृशंति। तस्य क्रमः। होता मैत्रावरुणो ब्राह्मणाच्छंसी पोता नेष्टा अच्छावाको ग्रावस्तुदाग्नीध्र

इत्येते आश्वलायनमार्गेण अभिमृशंति "अनाधृष्टमि" तिमन्त्रेण । तानूनत्प्रभृति आमख्यविसर्जनान्तमन्योन्यं द्वेषादि न कर्तव्यम् ॥ अथ स्पृष्टोदकं राजानमाप्याययन्ति । "अशुंरंशुष्टेदेव" इति मन्त्रेण । इदमाशुपसत्सु उदकोपस्पर्शनं यत्र यत्र विधीयते तत्र तत्र मदन्तीभिरेव कर्तव्यम् । सौम्याप्यायनं नाम अद्भिः संस्पर्शनम् । स्पृष्टोदकं निन्हवन्ते प्रस्तरेण पाणीन्निधायोत्तानान्दक्षिणान्सव्यान्नीचः "एष्टाराय" इति मन्त्रेण । निन्हवो नाम द्यावापृथिवीभ्यां नमस्करणम् ॥ अथ प्रवर्गेषु प्रचरिष्यन्त्सु पूर्वकारिषु होता तीर्थेन प्रविश्य स्पृष्टोदकमुत्तरेण स्वयं गत्वा पश्चादस्य निरसनोपवेशने कृत्वोपविशेत् । तत अध्वर्युणा "ब्रह्मन्प्रवर्गेणप्रचरिष्याम" इति प्रेषितः ब्रह्मा "भूर्भुवः स्वर्बृहस्पतिप्रसूत" इति जपित्वा "ॐ प्रचरत" इत्युच्चैरनुजानाति । सर्वत्र यथाकर्म त्वादेशा इत्युक्तत्वात् । ततोभिष्टुयाद्धोता ऋगावानमृचमृचमनवानमुक्त्वा प्रणुत्यावस्येत् । मध्यमस्वरेण वोत्तमस्वरेणाभिष्टुयात् ॥ मध्यमादि धर्मे इत्युक्तत्वात् । पूर्वपटलस्य मध्यमस्वर उत्तमस्य उत्तम इति केचित् । अभिहिंकृत्य "ब्रह्मजज्ञानंप्रथमंपुरस्तादि" ति त्रिः "इयंपित्रेराष्ट्र्ये" त्येका "महान्महीअस्तभाये"त्येका "अभित्यंदेवसवितार" इत्येका । अस्यां कृपास्वस्तृपास्वरिति पदविकल्पः । इति चतस्रः प्रकृत्याजाः ।अथ साद्यमाने महावीरे "संसीदे"स्त्येकां ब्रूयात् । आद्राङ्ज्यमाने महावीरे "अञ्जन्तियंप्रथयन्त"इति ब्रूयात् ।सादनाञ्जनयोर्विपर्यासे ऋग्विपर्यासो भवति । "पतंगमक्तमसुरस्यमायये" तिद्वे "श्येनः सनुत्योअभिदासदग्न" इति द्वे " भवानोअग्नेसुमनाउपेताविे" ति द्वे "कृणुष्वपाज" इति पञ्च । "परित्वागिर्वणोगिरः" त्येक द्रुतिष्वानीयमानासु ऋक् । "अधिद्वयोरदधा" इत्यृक् । "यद्रुत्सद्रेसमिथौविरनीद्यातीशुक्रंतेअन्यदि" त्येका । सुवर्णरुक्मे उ-

विज्ञापनम् ।

बनारससंस्कृतसीरीज़नाम्नी वाराणसेयसंस्कृतपुस्तकावली ।

इयं पुस्तकावली खण्डशो मुद्रिता भवति । अस्यां संस्कृतभाषानिबद्धा बहवः प्राचीना दुर्लभा उत्तमोत्तमाः केचिदङ्गलभाषानुवादसहिताश्च ग्रन्था मुद्रिता भवन्ति । तांश्च ग्रन्थान् काशिकराजकीयसंस्कृतपाठशालीयपण्डिता अन्ये ऽपि विद्वांसः शोधयन्ति । यैर्ग्राहकमहाशयैरियं पुस्तकावली नियमेनाविच्छेदेन संग्राह्या तैस्तदेकैकस्य खण्डस्य कृते ।॥।) मूल्यं प्रापणव्ययश्च =) देयः । अन्यैर्महाशयैर्यैः कानिचित् खण्डानि संग्राह्याणि तैश्च प्रत्येकं खण्डानां कृते १) मूल्यं प्रापणव्ययश्च =) देय इति ॥

तत्र मुद्रिता ग्रन्थाः ।

	रु०	आ
सिद्धान्ततत्त्वविवेकः खण्डानि ५	५	०
अर्थसङ्ग्रहः अंग्रेजीभाषानुवादसहितः	०	
तन्त्रवार्त्तिकम् खण्डानि १३		
कात्यायनमहर्षिप्रणीतं शुक्लयजुःप्रातिशाख्यम् सभाष्यं ख		
सांख्यकारिका चन्द्रिकाटीकागौडपादभाष्यसहिता		
वाक्यपदीयम् खण्डानि ६ (प्रथमभागः प्रथमद्वितीय		
पुण्यराजटीकासहित खण्डानि ३। द्वितीयभागः तृतीय		
ण्डम् हेलाराजटीकासहित खण्डानि ३)		
रसगङ्गाधरः खण्डानि ९		
परिभाषावृत्तिः खण्डे २		
वैशेषिकदर्शनं किरणावलीटीकासंवलितप्रशस्तपादप्र		
भाष्यसहितम् खण्डे २		
शिक्षासङ्ग्रहः खण्डानि ५		
नैष्कर्म्यसिद्धिः खण्डानि ४		
महर्षिकात्यायनप्रणीतं शुक्लयजुस्सर्वानुक्रमसूत्रम्		
ऋग्वेदीयशौनकप्रातिशाख्यं सभाष्यम् खण्डानि ४		
(बृहत्) वैयाकरणभूषणम् पदार्थदीपिकासहितम्		
विवरणोपन्यासः सटीकवाक्यसुधासहितः		

तत्त्वदीपनम् (पञ्चपादिकाविवरणस्य व्याख्यानम्) ख० ८ ८

वेदान्तदीपः (श्रीभगवद्रामानुजाचार्यविरचितः) खण्डानि ३ ३

टुप्टीका खण्डानि ४ ४ ०

पातञ्जलदर्शनम् श्रीरामानन्दयतिकृतमणिप्रभाऽख्यवृत्ति स० १ ०

व्याकरण मिताक्षरा । श्रीमदन्नंभट्टप्रणीता खण्डानि १० १० ०

रसमञ्जरी । व्यङ्ग्यार्थकौमुद्या प्रकाशेन च सहिता ख० ३ ३ ०

भेदधिक्कारः व्याख्यासहितः श्रीमदप्पयदीक्षितकृत उपक्रम ०

पराक्रमसहितः खण्डे २ २ ०

बोधसारो नरहरिकृतः तच्छिष्यदिवाकरकृतटीकया स० ख० १० ०

ब्रह्मसूत्रदीपिका श्रीमच्छङ्करानन्दभगवद्भिर्विरचिता खण्डे २ २ ०

दैवज्ञकामधेनुः अर्थात् प्राचीनज्योतिषग्रन्थः खण्डानि ३ ३ १

श्रीमदणुभाष्यम् । श्रीश्रीवल्लभाचार्यविरचितम् । ...स्यम् । २

गोस्वामिश्रीपुरुषोत्तमजी महाराजविरचितभाष्यप्रकाशाख्य... ...काश्मीरिककेश-

व्याख्या समेतम् खण्डानि १५ ...विन्दभट्टाचार्यकृतवि-

... ... २

तत्त्वशेखरः । श्रीभगवल्लोकाचार्यप्रणीतः । तथा—तत्त्व... महामहोपाध्याय श्रीमि-

संग्रहः । कुमारवेदान्ताचार्यश्रीमद्वरदगुरुविरचितः ६

श्रीभाष्यवार्तिकम् । श्रीमद्रामानुजाचार्यविशिष्टाद्वैत... ...देवविवेचनम् श्रीषिमानन्द

...म् । ...महत्त्वयाथार्थ्यदीपनम् भा-

...सा) ...व्याख्या सर्वोपका-

...का । श्रीमद्भागवतदशमस्कन्धस्थरास... ...ारथिमिश्र ... १

...यणप्रणीत... ...श्रीवेदान्ताचार्यप्रसा-

...त्रप्रयोगदीपिका । श्री (विद्वद्वर) ...व्याख्यानम् । ...ायसारसमाख्यया

। ...र्मिता सम्पू... ... ४

...ब्रह्मनिरूपण... कृष्णभट्टकृत-

...मुनमुनिभि... ... २

ब्रजभूषण दास चौ... ...दबोधभट्टार... । श्रीमदनन्तदेव-

...तव्याख्या... ...ख्यासहित यन्त्रस्थः

चांदनीचौक के उत्तर नई सड़... ...सारि...नकृद्वाचस्पतिमिश्रविरचि-

श्री...रमिश्रविरचित "तत्त्वविभा-

यन्त्रस्थः ...